3. यह बात अपूर्ण है ।मूर्तिपूजक सम्प्रदाय दस प्रकीर्णकों को 'आगम' के स्वरूप में नहीं अपितु '४५ आगम' के स्वरूप में स्वीकृत करता है । अन्य-अन्य प्रकीर्णकों को 'आगम नहीं हैं' - ऐसा यह सम्प्रदाय नहीं मानता । ।

# પ્રત-દર્શન

પ્રસ્તુત સંપાદનમાં ઉપયુક્ત હસ્તલિખિત પ્રતોના આદ્ય-અંત પૃષ્ઠોની પ્રતિકૃતિઓ અને આદ્ય-અંત વાક્યાંશ અહીં આપવામાં આવેલ છે.

આના નિરીક્ષણથી કઈ કઈ પ્રતિઓનો ઉપયોગ અમે કર્યો છે તેનો ય ખ્યાલ આવશે. અમને મૂળ પ્રતો મળી નથી. પણ તેની ઝેરોક્ષ કરાયેલ નકલો જ મળી હતી. પ્રસ્તુત સંશોધન અને સંપાદન પણ એ ઝેરોક્ષ કોપીઓના આધારે જ શક્ય બન્યું છે.

આ પ્રતો અમને પૂરી પાડનાર ડહેલાનો ઉપાશ્રય, એલ.ડી. ઈન્સ્ટીટ્યૂટ, શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા), શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર (પાટણ), લુહારની પોળ ઉપાશ્રય આદિના જ્ઞાનભંડારો તેમજ ગ્રંથાલયોના વહીવટદારો અને મેળવી આપનારા પૂજ્યો તેમજ સુશ્રાવકોને શ્રુતભક્તિનો લાભ થયો છે. તેમની શ્રુત-સેવા અનુમોદનીય છે.

**– સંપાદક**



ડહેલાનો ઉપાશ્રય જ્ઞાન ભંડાર, અમદાવાદ.

નં. ૪૩૪૪ સંજ્ઞા. ડ૧

શરૂઆત : नमः श्री वर्धमानाय । त्रैलोक्यप्रकट...

અંત : समाप्तचतुःशरणाध्यनविवरणम् छ । ग्रन्थाग्रं श्लोक-१०८० ।। शुभं भवतु कल्याणमस्तु ।।





ડહેલાનો ઉપાશ્રય જ્ઞાન ભંડાર, અમદાવાદ.

નં. ૧૪૫/૬૭૫૯/૧૧ સંજ્ઞા. ડર

શરૂઆત : ॐ नमः श्रीवर्धमानाय । त्रैलोक्यप्रकट...

અંત : समाप्तं चतुःशरणाध्ययनविवरणम् । ग्रन्थाग्रं-१०८० विनयराजगणि ।



ડહેલાનો ઉપાશ્રય જ્ઞાન ભંડાર, અમદાવાદ.

શરૂઆત : પહેલું પાનું નથી. સંજ્ઞા. ડઉ

અંત : समाप्तचतुःशरणाध्ययनविवरणम् ।। ग्रन्थाग्रं-१०८० ।।



લાલભાઈ દલપતભાઈ સંસ્થા, અમદાવાદ. સંજ્ઞા. લ

શરૂઆત : नमः श्री वर्धमानाय । त्रैलोक्य प्रकट...

અંત : समाप्तचतु:शरणाध्ययनविवरणम् ।।छ।। ग्रन्थाग्रं-१०८० ।छ।।



શ્રી કૈલાશસાગરસૂરિ જ્ઞાન ભંડાર, કોબા, અમદાવાદ.

નં. ૧૧૮૦૪

શરૂઆત : इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात्...

અંત : इदमध्ययनेऽतिदेशकरणादपि ज्ञायतेऽस्याऽपि स एव कर्त्तेति ।। ८४ इति श्रीधर्मघोषसूरिशिष्य श्रीमहेन्द्रसूरिविरचितवृत्त्यनुसारेण श्रीगच्छेराभट्टारकप्रभुपरमगुरुश्रीसोमसुन्दरसूरिपादैः कृताऽवचूर्णिः समाप्ता । भद्रं भवतु श्रीसंघस्य ।।छ।।



શ્રી ડહેલાનો ઉપાશ્રય જ્ઞાન ભંડાર, અમદાવાદ.

નં. ૪૭૬૧

શરૂઆત : इदमध्ययनं परमपदप्राप्तिबीजभूत....

અંત : इति श्रीचतुःशरणप्रकीर्णकावचूरिः ।छ।। इति बृहत्तपागच्छपूरन्दरश्रीसोमसुन्दरसूरिविरचिता ।छ।। मुनिजयसागरेणालेखि स्वयं ज्ञानार्थम् ।ठः।ठः।।



શ્રી ડહેલાનો ઉપાશ્રય જ્ઞાન ભંડાર, અમદાવાદ.

ડા.નં. ૯૩ પ્રત નં. ૪૭૭૯

શરૂઆત : नमः श्रीजिनाय ।। इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात्...

અંત : इति चतुःशरणप्रकीर्णकावचूरिः संवत १६६३ वर्षे भाद्रपदमासे शुक्ल पक्षे त्रयोदशीतिथौ गुरु वासरे । श्रीअञ्चलगच्छेश ॐ श्रीविद्यासागरगणिलत् शिष्य ॐ श्रीविवेकसागरगणिलखितं ।। श्री देवकोटिमध्ये श्रीअजितनाथप्रासादात् कल्याणं भूयात् ।।श्रीः। ठः ।।



લાલભાઈ દલપતભાઈ સંસ્થા, અમદાવાદ.

નં. ૩૮૬૦

શરૂઆત : ॐ नमः श्रीसर्वज्ञाय ।। अर्हं ।। चतुःशरणविषमपदविवरणम् ।। सावज्ज० सह अवद्येन पापेन वर्त्तत इति...

અંત : इतिसंस्तारकप्रकीर्णकावचूरिः ।। कृतिरियं श्रीगुणरत्नसूरिपादानाम् ।।छ।।शुभं भवतु ।।।श्रीः।।



લાલભાઈ દલપતભાઈ સંસ્થા, અમદાવાદ.

નં. ૧૯૪૨

શરૂઆત : अर्हम् ।। चतुःशरणविषमपदविवरणम् । सावद्य सहेअवद्येन पापेन...

અંત : संस्तारकप्रकीर्णकावचूर्णिः ।। कृतिरियं श्रीगुणरत्नसूरीणाम् ।। शुभमस्तु सकलजगतः ।छ।छ।।श्रीः।।



શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાન મંદિર, પાટણ.

નં. ૧૬૯૮૨ ડા.નં. ૩૫૮

શરૂઆત : अर्हम् ।। चतुःशरणविषमपदविवरणम् । सावद्य० सह अवद्येन पापेन वर्त्तंत इति...

અંત : संस्तारकप्रकीर्णकावचूर्णिः ।। कृतिरियं श्रीगुणरत्नसूरिणाम् । छ ।। ग्रन्थाग्रं ।।९५० । छ ।।



લુહારની પોળ, ઉપાશ્રય - જ્ઞાન ભંડાર, અમદાવાદ.

શરૂઆત : अर्हम् ।। चतुःशरणविषमपदविवरणम् ।। साव० सह अवद्येन पापेन वर्त्तन्त इति...

અંત : संस्तारकप्रकीर्णकावचूर्णिः । कृतिरियं श्रीगुणरत्नसूरीणाम् ।।छ।। शुभं भवतु । कल्याणमस्तु ।।छ।।

परमगुरुश्रीआणंदविमलसूरिशिष्य पं. श्री धनविमलगणिशिवविमलसींहविमलपठनार्थम् ।।



શ્રી નિત્યવિનય જીવનમણી વિજયજી જૈન પુસ્તકાલય, ચાણસ્મા

નં. ૨૪૯-૨૨

શરૂઆત : ।। अर्हम् ।। चतु:शरणविषमपदविवरणम् साव० सह अवद्येन पापेन वर्त्तन्त इति...

અંત : इति प्रकीर्णकावचूरिः श्री गुणरत्नसूरिकृता ।।श्री।। शुभं भवतु ।। कल्याणमस्तु ।।



**બાલાવબોધની ત્રણ પ્રતો**

આ.શ્રી. કૈલાસસાગરસૂરિ જ્ઞાન મંદિર, કોબા, અમદાવાદ.

નં. ૧૫૮૮૭

શરૂઆત : ૐ नत्वा चतुःशरण प्रकीर्णक शिरोमणेः ।...

અંત : श्रीकीर्तिविजयवाचकशिष्योपाध्यायश्रीविनयविजयेन एष चतुःशरणार्थो रचितो बालवबोधाय ।।१।।



આ.શ્રી. કૈલાસસાગરસૂરિ, જ્ઞાનમંદિર, કોબા, અમદાવાદ

નં. ૭૫૫૧

શરૂઆત : ॐ नत्वा चतु:शरण प्रकीर्णक शिरोमणेः ।...

અંત : श्रीकीर्तिविजयवाचकशिष्योपाध्यायश्रीविनयविजयेन एष चतु:शरणार्थो रचितो बालावबोधाय ।।



શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર, પાટણ
પ્રવર્તક શ્રી કાન્તિવિજયજી જૈન જ્ઞાન, ભંડાર.
નં. ૧૦૮૪૫ ડા. ૨૩૧

શરૂઆત : श्रीजिनाय नमः पण्डितश्री पू. श्रीनयविजयगणिशिष्यगणिश्रीसत्यविजयगणिगुरुभ्यो नमः। ॐ नत्वा चतुःशरण...

અંત : श्रीकीर्तिविजयवाचकशिष्योपाध्यायविनयविजयेन । एष चतुःशरणार्थो रचितो बालावबोधाय ।।१।।

સં. १८४४ वर्षे फाल्गुण सुदि-२ दिने श्री पल्लिकानगरे लिखीकृतः ।। श्रीरस्तु ।। श्री कल्याणमस्तु ।। शुभं भवतु ।।श्रीः।।

आगम-

# श्रीचतुःशरणप्रकीर्णकम्

## खण्ड - १

■ अज्ञातकर्तृकबृहद्विवरणयुतं श्रीचतुःशरणप्रकीर्णकम्

चत्तारि मंगलं, अरिहंता मंगलं,
सिद्धाम मंगलं,
साहू मंगलं,
केवलिपन्नत्तो धम्मो मंगलं ।

चत्तारि लोगुत्तमा, अरिहंता लोगुत्तमा,
सिद्धा लोगुत्तमा,
साहू लोगुत्तमा,
केवलिपन्नत्तो धम्मो लोगुत्तमो ।

चत्तारि सरणं पवज्जामि
अरिहंते सरणं पवज्जामि,
सिद्ध सरणं पवज्जामि,
साहू सरणं पवज्जामि,
केवलिपन्नत्तं धम्मं सरणं पवज्जामि ।

।। सर्ववाञ्छित-मोक्षफलप्रदायक-श्रीशङ्खेश्वर-चिन्तामणिपार्श्वनाथाय नमो नमः ।।

।। नमोऽत्थु णं समणस्स भगवओ महावीरस्स ।।

त्रैलोक्यबीजं परमेष्ठिबीजं, सज्ज्ञानबीजं जिनराजबीजम् ।
यन्नाम चोक्तं विदधाति सिद्धिं; स गौतमो यच्छतु वाञ्छितं मे ।।

।। श्रीवीरविभुहस्तदीक्षितवीरभद्रगणिने नमः ।।

।। नमामि नित्यं गुरुरामचन्द्रम् ।।

।। ऐं नमः।।

श्रीचिरन्तनाचार्यविरचितबृहद्विवरणसमेतं श्रीवीरभद्रगणिप्रणीतं

# चतुःशरणप्रकीर्णकसूत्रम्

[ शार्दूलविक्रीडितवृत्तम् ]

**त्रैलोक्यप्रकटप्रभावशुभगं भूष्णुप्रभं शोभते,**
**ज्योतिर्यस्य स विश्वशस्यमहिमा श्रीवर्धमानः प्रभुः ।**
**सिद्धार्थान्वयवार्धिवर्धनविधुर्बन्धूकबन्धूल्लसत्;**
**पादाम्भोजनखद्युतिर्वितरतु श्रेयः सतां वत्सलः ।।१।।**

[ अनुष्टुब्वृत्तम् ]

**निस्तन्द्रमुनिचन्द्राय, समुद्राय श्रुताम्भसाम् ।**
**नमः श्रीवीरभद्राय, भद्राऽऽध्यासितबुद्धये ।।२।।**

इह हि अपारसंसारपारावारोत्तरणाय[1] सततमपि विशेषत[2] उत्तमार्थं प्रतिपत्तुकामैर्भव्यैः प्रवणप्रवहणकल्पचतुःशरणाद्यनुस्मरणं विधेयम् । तच्च याथातथ्येन चतुःशरणाध्ययनपवित्रसूत्रं विना न भवति इति । अतः परित्यक्तदोषविग्रहः सर्वसत्त्वोपरिकृताऽनुग्रहः श्रीवीरभद्रो मुनीन्द्रः प्रभूताऽर्थसार्थमहार्थं चतुःशरणाध्ययनं जग्रन्थ ।

तदादौ प्रयोजना-ऽभिधेय-सम्बन्ध-मङ्गलाद्यभिधातव्यानि, यतोऽविदितार्थस्वरूपाः शिष्यास्तदध्येतुं[3] नोत्सहन्ते निष्प्रयोजनत्वात् कण्टकशाखामर्दनवत्, निरभिधेयत्वात् काकदन्तपरीक्षावत्, असम्बद्धत्वाद् दशविधत्वाद् दाडिमानीत्यादिवत्, मङ्गलरहितत्वेन सविघ्नत्वात् ।

तत्र प्रयोजनमनन्तरपरम्परभेदाद् द्विधा, पुनरेकैकं कर्तृश्रोतृभेदाद् द्विधैव[4], तत्र चतुःशरणाध्ययनकर्तुरनन्तरं[5] प्रयोजनं शिष्यावबोधः, परम्परं त्वर्थमपवर्गप्राप्तिः[6]। श्रोतुरप्यनन्तरं तदर्थावगमः

१. रोत्तारणाय-ल, २. विशेषेण तत-ल, ३. तमध्येतुं-ल, ४. द्विविधैव-ल, ५. अनन्तरप्रयोजनं- डर, ६. त्वपवर्गप्राप्तिः-ल, त्वर्थपवर्गप्राप्तिःड-३

परम्परं मुक्तिपदप्राप्तिः । अभिधेयं चतु:शरणादिः, तस्यैव भणिष्यमाणत्वात् । सम्बन्धश्च उपायोपेयभावलक्षणः, तत्र प्रवचनरूपापन्नमिदमेवाऽध्ययनमुपायः, उपेयं तु तदर्थपरिज्ञानम् । इदं चाऽध्ययनं परमपदप्राप्तिबीजभूतत्वात् श्रेयोभूतम्, तदारम्भे च मङ्गलमभिधातव्यम् । तच्चानेकधा भवतीत्यतः प्रथमं सङ्क्षेपतः सामायिकाद्यर्थनिर्णयद्वारेण तदाह, सामायिकादीनामपि मङ्गलरूपत्वात् । तदनु च द्रव्यमङ्गलभूतत्वात्, भावमङ्गलकारणत्वाद् वा, गजादिस्वप्नसन्दर्शन-तद्व्यावर्णनव्याजेन 'सर्वतीर्थकृत एतत्स्वप्नसंसूचिता' इति वाक्यगर्भं द्वितीयं मङ्गलमाह । ततोऽपि च शास्त्रकर्तुरनन्तरोपकारित्वादभीष्टदैवतस्य वर्धमानस्वामिनो नमस्करणद्वारेण तृतीयं मङ्गलमाह । अथवा चतु:शरणाध्ययनेन उत्तमार्थाराधना भवति, षडावश्यकस्याऽप्याराधनापर्यायत्वात् । यदाह –

[A] **"आवस्सयं अवस्सकरणिज्जं, धुव निग्गहो विसोही य ।**
**अज्झयणछक्कवग्गो, नाओ आराहणा य मग्गो"** ।। [अनु.द्वा. सू. २९]

अतः षडावश्यकमप्याराधनारूपं [1]विवरीतुकामस्तदादौ 'सावज्जजोग' इत्याद्याऽऽह, यदि वा [2]सामायिकार्थवेदिन एव सम्यक् चतु:शरणादिप्रतिपत्तिर्भवतीत्यादौ तदर्थनिर्णयायाऽऽह -

[B] **सावज्जजोगविरई, उक्कित्तण गुणवओ य पडिवत्ती ।**
**खलियस्स निंदणा, वणतिगिच्छ गुणधारणा चेव ।।१।। [अनु.द्वा. सू. ७३]**

**सावद्ययोगविरतिरुत्कीर्त्तनं गुणवतश्च प्रतिपत्तिः ।**
**स्खलितस्य निन्दना व्रणचिकित्सा गुणधारणा चैव ।।१।।**

सहावद्येन पापेन वर्तन्ते इति सावद्याः, युज्यन्त इति योगाः मनो-वाक्-कायव्यापाराः, सावद्याश्च ते योगाश्च **सावद्ययोगाः** । विरमणं 'विरतिस्तेषां विरतिस्तद्**विरतिः**, [3]सा सामायिकेन क्रियते इत्यध्याहार्यम् । **उत्कीर्त्तनम्** उत्कीर्तना सा चतुर्विंशतिस्तवेन क्रियते । गुणा ज्ञान-दर्शन-चारित्राद्यास्ते विद्यन्ते येषां ते गुणवन्तस्तेषां प्रतिपत्तिर्भक्तिः **गुणवत्प्रतिपत्तिः** सा वन्दनकेन क्रियते । तथा **स्खलनं** स्खलितमात्मनः, साऽतिचारकरणम्, **तस्य निन्दनं** निन्दना 'न पुनः करिष्यामि' इत्यभ्युपगमनम्, सा प्रतिक्रमणेन क्रियते । चिकित्सनं चिकित्सा, व्रणस्याऽतिचाररूपभावव्रणस्य चिकित्सा **व्रणचिकित्सा,** सा कायोत्सर्गेण क्रियते । तथा गुणा विरत्यादयः, धरणं धारणा, तेषां धारणा **गुणधारणा,** सा प्रत्याख्यानेन क्रियते । **चेवे** ति समुच्चये । उक्तः सङ्क्षेपतः सामायिकाद्यर्थः ।।१।।

अथ **तेषां** षण्णामपि सामायिकादीनामाचारपञ्चकविशुद्धिलक्षणफलप्रदर्शनार्थं किञ्चिद्विशेष-

१. वितरीतुकाम० ल, २. सामायिकाद्यर्थःड२, ३. 'सा' इति ड१, ड२, प्रत्यो नास्ति, A-B परि० २ ।

स्वरूपभणनार्थं च गाथाषट्कमाह -

**चारित्तस्स विसोही, कीरइ सामाइएण किल इहयं[1] ।**
**सावज्जेयरजोगाण, वज्जणाऽऽसेवणत्तणओ ।।२।।**
**चारित्रस्य विशोधिः क्रियते सामायिकेन किल इहैव ।**
**सावद्येतरयोगानां वर्जनाऽऽसेवनातः ।।२।।**

चयस्य रिक्तीकरणाच्चारित्रम्, सूत्रस्य सूचकत्वात् **चारित्रस्य** चारित्राऽऽचारस्य । **पणिहाण** इत्यादि अष्टविधस्य शोधनं विशोधिः, चारित्रस्य **विशोधिश्चा**रित्रविशोधिः **क्रियते** । केन ? **सामाइएणं** ति सामायिकेन समो रागद्वेषवियुक्तो यः सर्वभूतान्यात्मवत् पश्यति तस्याऽऽयः प्रतिक्षण[2]मपूर्वापूर्वज्ञानदर्शनचारित्रपर्यायाणां निरूपमसुखहेतुभूतानामधःकृतचिन्तामणिकल्पद्रुमोपमानां लाभः [3]समायः स प्रयोजनं यस्य क्रियाकलापस्येति सामायिकं तेन सामायिकेन समभावलक्षणेन,

**"जो समो सव्वभूएसु, तसेसु थावरेसु य ।**
**तस्स सामाइयं होइ, [4]इई केवलिभासियं"** ।। [आव. नि. ७९८] इति वचनात् ।

**किले**ति सम्भावनायाम्, किं सम्भावयति ? **इहयं** ति इहैव जिनशासने, न शाक्यादिदर्शने, तद्दर्शनेषु 'सामायिक' इति भाषाया अप्यभावात् । कथं च सामायिकेन विशोधिः क्रियते ? इत्याह **सावज्जेयर** त्ति सावद्याः सपापा इतरे च निरवद्याः, सावद्याश्च इतरे च सावद्येतराः ते च ते योगाश्च सावद्येतरयोगास्तेषां वर्जना च आसेवना च वर्जनाऽऽसेवने, ताभ्यां **वर्जनाऽऽसेवनातः**, यथासङ्ख्येन सावद्यानां वर्जनत इतराणां [इतरेषां] त्वासेवनतो विशोधिस्तेन च क्रियत इति तात्पर्यार्थः ।।२।।

उक्ता सामायिकेन चारित्राचारशुद्धिः, अथ दर्शनाऽऽचारशुद्धिमाह –

**दंस[5]णायारविसोही, च[6]उवीसायत्थएण कज्जई य ।**
**अच्चब्भुयगुणकित्तणरूवेणं जिणवरिंदाणं ।।३।।**
**दर्शनाचारविशोधिश्चतुर्विंशत्यात्मस्तवेन क्रियते च ।**
**अत्यद्भुतगुणकीर्त्तनरूपेण जिनवरेन्द्राणाम् ।।३।।**

१. इहइं-पु०, इहय-ड, डर, २. मपूर्वज्ञान-डर, ३. समयोःड, डर, ड, ४. इयं-ल, ५. दंसणयार-ड, ६. चउवीसाइत्थएण-ड,डर, C परि-२ ।

दृश्यन्तेऽवबुध्यन्ते [१]यथावस्थितस्वरूपेण पदार्था अनेनेति दर्शनं सम्यक्त्वम्, तस्याचारो **दर्शनाचारः, "निस्संकिये"**त्याद्यष्टविधस्तस्य **विशोधिः चउवीसायत्थएणं** ति चतुर्विंशतेरात्मनां जीवानां तीर्थङ्करसम्बन्धिनां स्तवनं स्तवः क्रियते यत्र स चतुर्विंशत्यात्मस्तवस्तेन चतुर्विंशत्यात्मस्तवेन । **चउवीसाएत्थएणं** ति पाठे चतुर्विंशतिःस्तवेन **क्रियते** - यदाह -

[D] **"चउवीसत्थएणं भंते ! जीवे किं जणयइ ? -**

**चउवीसत्थएणं दंसणविसोहीं जणयइ"** [उत्तरा. अध्य. २९ सू. ९] त्ति ।

किम्भूतेनेत्याह - **अब्भुय** त्ति अत्यद्भुता अतिशायिनो लोकोद्योतकरादयो ये **गुणास्**तेषाम्, **यदुत्कीर्त्तनं** वर्णनं **तद्रूपेण,** केषां तद् ? इत्याह - **जिणवरिंदाणं** ति रागादिजयाज्जिनाः, उपशान्तमोहादयस्तेषां मध्ये वराः घातिकर्मचतुष्टयक्षीणेन [क्षयेण] सामान्यकेवलिनस्तेषामिन्द्रा इव इन्द्रास्तीर्थङ्करा जिनवरेन्द्रास्तेषामित्यर्थः ।।३।।

उक्ता चतुर्विंशतिस्तवेन दर्शनाचारशुद्धिरिदानीं ज्ञानाचारशुद्धिमाह –

**नाणाईया उ गुणा, तस्संप[२]न्नपडिवत्तिकरणाओ ।**
**वंदणएणं विहिणा, कीरइ सोही उ तेसिं तु ।।४।।**

**ज्ञानादिकास्तु गुणास्तत्सम्पन्नप्रतिपत्तिकरणात् ।**
**वन्दनकेन विधिना क्रियते शोधिस्तु तेषां तु ।।४।।**

**नाण** त्ति सूचनात् **"काले विणए"** इत्यादिकोऽष्टविधो ज्ञानाचारो गृहीतः। **आइ** त्ति आदिग्रहणात् दर्शनाचारचारित्राचारग्रहो यतो ज्ञानवानपि दर्शनचारित्रगुणयुक्त एव वन्दनकप्रतिपत्तियोग्यः येन ज्ञानवन्तोऽपि पार्श्वस्थादयोऽवन्द्याश्चारित्ररहितत्वात्, तथा व्यवहारात् चारित्रिणोऽपि निह्नवा वन्दनकाऽयोग्या जिनवचनाऽश्रद्धानेन दर्शनाऽभावादित्यर्थः । ज्ञानमादौ येषां ते **ज्ञानादिकाः, तु**रवधारणार्थः, एते एव **गुणा** इत्यर्थः, **तत्सम्पन्न** त्ति तैर्ज्ञानादिगुणैः सम्पन्ना युक्तास्ततसम्पन्नास्तेषां **प्रतिपत्ति**र्भक्तिस्तस्याः करणम्, तस्मात् **तत्सम्पन्नप्रतिपत्तिकरणाद्** विनयकरणादित्यर्थः । केन ? **वन्दनकेन,** कथम् ? **विधिना** विधिवत्, द्वात्रिंशद्दोषरहिततया पञ्चविंशत्यावश्यकपरिशुद्धतया **च क्रियते, शोधिरिति तेसिं तु** त्ति तेषां ज्ञानाचारादीनां तुः पुनरर्थे, चारित्राचारदर्शनाचारयोः शोधितयोरपि विशेषेण शोधनार्थः । यतो [३]वन्दनकप्रदानादेवं गुणाऽवाप्तिर्भवति ।

१. यथावस्थिततत्त्वरूपेण-ल. २. तस्संपुन्न-ड, ड२, ३. वन्दनप्रदाना-ल, D परि-२ ।

[E]"विणयोवयार माणस्स, भंजणा पूयणा गुरुजणस्स ।
तित्थयराण य आणा, सुयधम्माराहणाऽकिरिया" ।। [आ. नि. १२१५]

इति प्रतिपादिता वन्दनकेन ज्ञानाद्याचारत्रयशुद्धिः ।।४।।

पुनस्तेषामेव त्रयाणां विशेषतो गाथाद्वयेन प्रतिक्रमणकायोत्सर्गाभ्यां तामाह –

**खलियस्स य तेसि, पुणो विहिणा जं निंदणाइपडिकमणं[1] ।**
**तेण पडिक्कमणेणं, तेसिं पि य कीरए सोही ।।५।।**

**स्खलितस्य च तेषां पुनर्विधिना यन्निन्दनादिप्रतिक्रमणम् ।**
**तेन प्रतिक्रमणेन तेषामपि च क्रियते शोधिः ।।५।।**

**चरणाइयाइयाणं, जहक्कमं वणतिगिच्छरूवेणं ।**
**पडिकमणासुद्धाणं, सोही तह काउसग्गेणं ।।६।।**

**चरणातिगादिकानां यथाक्रमं व्रणचिकित्सारूपेण ।**
**प्रतिक्रमणाशुद्धानां शोधिस्तथा कायोत्सर्गेण ।।६।।**

**स्खलितस्य** व्रतविषयेऽतिक्रमादिना सञ्जातस्याऽपराधस्य **तेसि त्ति** ज्ञानाचारादीनाम् । कथम् ? **पुणो** त्ति, पुनरपि प्रतिषिद्धकरण-कृत्याऽकरणा-ऽश्रद्धान-विपरीतप्ररूपणादिषु **विधिना** सूत्राऽनतिक्रमेण । **जं निंदणाय** त्ति यत् निन्दना, प्राकृतत्वात् निन्दनं दुष्टं मयैतत्कृतमिति, परसाक्षिकमात्मदोषाविष्करणम् । यदाह –

"मणसा मिच्छादुक्कड-करणं भावेण इह पडिक्कमणं ।
स चरित्तपच्छयावो, निंदा गरिहा गुरुसमक्ख त्ति" ।। [ ]

'न पुनः करिष्यामि' इति यदुररीकरणम्, तस्माद्दोषजातान्निवर्त्तनम्, तत्**प्रतिक्रमणमु**च्यते, प्रतीपं क्रमणं प्रतिक्रमणमिति व्युत्पत्तेः[2], केषाञ्चित्[3] तद्विधेयमित्याह –

[F]"मिच्छत्तपडिक्कमणं[4], तहेव अस्संजमे पडिक्कमणं ।
कसायाण[5] पडिक्कमणं, जोगाण य अप्पसत्थाणं" ।। [आ. नि. १२५०]

इत्यादि । अतः कारणात्तेन **प्रतिक्रमणेन तेसिं पि य** त्ति न केवलं सामान्यापराधानाम्, तेषामपि ज्ञानाचारादीनां **क्रियते शोधिः** । यदाह भगवान् सुधर्मा –

१. निंदणइ ड, डर, २. व्युत्पत्तिः ल, ३. केषां च ड३, ४. मिच्छित-ल, ड, ५. कषाया पडि-डर, E-F परि-२ ।

[G]"**पडिक्कमणेणं भंते ! जीवे किं जणयइ ?**
**पडिक्कमणेणं वयछिद्दाई पिहेई...**" [उत्तरा. २९/११] त्ति ॥५॥

**चरणाइय** त्ति चरणमतिगच्छन्त्यतिक्रामन्ति चरणातिगास्ते आदौ येषां ते **चरणातिगादिकाः** अतिचारा दृश्यन्ते, तेषाम् । **यथाक्रमं** क्रमप्राप्तेन पञ्चमप्रायश्चित्तेन, **वणतिगिच्छरूवेणं** ति द्रव्यभावभेदेन द्विधा व्रणस्तत्र द्रव्यव्रणः कण्टकादिः, भावव्रणस्त्वतिचारशल्यरूपः । यदाह –

[H]"**मूलुत्तरगुणरूवस्स, ताइणो परमचरणपुरिसस्स ।**
**अवराहसल्लपभवो, भाववणो होइ नायव्वो**" ॥ [आव. नि. १४२४ अन्त. गाथा]

तस्य या चिकित्सा प्रतीकारः सैव रूपं यस्य स तेन व्रणचिकित्सारूपेण तत्प्रतीकारकारणत्वात् । चरणातिगादिकानां कथम्भूतानाम् ? **प्रतिक्रमणेनाशुद्धानाम**र्धशुद्धानां वा । **'सोही तह'** त्ति तथैव शुद्धिः क्रियते । केन ? **'काउस्सग्गेणं'** त्ति उत्सर्जनं त्यजनं उत्सर्गः [कायस्य उत्सर्गः] कायोत्सर्गः, तेन ते [१]शोध्यन्त इत्यर्थः, कायोत्सर्गस्य ❖महन्निर्जराकारणत्वात्, तथाहि –

[I]"**जह करगओ निकिंतइ, दारुं इंतो पुणो वि वच्चंतो ।**
**इय कंतंति सुविहिया, काउस्सग्गेण कम्माइं**" ॥ [आव. नि. भाष्य-२३७]

[J]"**काउस्सग्गे जह, सुट्ठियस्स भज्जंति अंगुवंगाइं ।**
**इय भिंदंति सुविहिया, अट्ठविहं कम्मसंघायं**" ॥ [आव. नि. १५५१]

[K]"**तम्हा उ निम्ममेणं, मुणिणा उवलद्धसुत्तसारेण ।**
**काउस्सग्गो उग्गो, कम्मक्खयट्ठा य कायव्वो**" ॥ **इति** [आव. नि. १५५४]

ननु 'नाणाईया उ गुणा' इत्यत्र ज्ञानादय इत्युक्तम्, '[२]चरणाइयाइयाण'मित्यत्र चरणादय इति तत्कोऽत्र विशेषः ? उच्यते – एकत्र ज्ञाननयप्राधान्याश्रयणेन ज्ञानादय इति [३]उक्तमपरत्र क्रियानय-प्राधान्य[४]विवक्षणेन चरणादय इति ॥६॥

वर्णिताऽऽचारत्रयशुद्धिर्गाथापञ्चकेनाऽथ चतुर्थपञ्चमाचारावेकगाथयैवाऽऽह –

**गुणधारणरूवेणं, पच्चक्खाणेण तवइयारस्स ।**
**विरियायारस्स पुणो, सव्वेहि वि कीरए सोही ॥७॥**

---

१. साध्यन्त-ल, ड३। सोध्यन्त-ड, २. चरणाइयाणम् ड२, ड३, ल, ३. उक्तं परमत्र-ल, ४. विचक्षणेन-ड, ल, ड३, G-H-I-J-K-परि-२ ।

❖ व्याकरणोक्तसामान्यनियमेनात्र 'महानिर्जराxx' पदं सम्भाव्यते । किन्तूपलब्धासु सर्वासु प्रतिषु 'महन्निर्जराxx' पदमेव लभ्यते, तस्मादार्ष इति न्यायेन तदेव स्वीकृतम् - सम्पा०

**गुणधारणरूपेण प्रत्याख्यानेन तपोऽतिचारस्य ।**
**वीर्याचारस्य पुनः सर्वैरपि क्रियते शोधिः ॥७॥**

**गुणाः** विरत्यादय उत्तरोत्तरगुणाः, [विरतेः] आश्रवद्वारस्थगनम्, तत् स्थगनाच्च तृष्णाव्यवच्छेदस्तृष्णाव्यवच्छेदाच्चातुलोपशमस्तस्माच्च[1] प्रत्याख्यानशुद्धिस्तच्छुद्धेश्च चारित्रनैर्मल्यं तस्माच्च कर्मविवेकस्तस्माच्चापूर्वकरणम्, अपूर्वकरणाच्च केवलज्ञानम्, ततश्च मोक्षो भवतीत्युत्तरोत्तरगुणास्तेषां गुणानां धारणं **गुणधारणं** तदेव **रूपं** यस्य, तेनानागतादिदशविधेन सप्तविंशतिविधेन वा यदाह चूर्णिकृत् -

**"एयस्स दसविहस्स पञ्चक्खाणस्स सव्वस्स वा सत्तावीसइविहस्स,**
**तं जहा - पंचमहव्वया, दुवालसविहो सावगधम्मो,**
**दसविहं उत्तरगुणपञ्चक्खाणं एए सत्तावीसहा"** [आव. चूर्णि. पत्र-३११]

इत्यनेन **प्रत्याख्यानेन तप आचारातिचारस्य "बारसविहंमि वि तव"** इत्यादिकस्य शुद्धिः क्रियते इति हृदयम् ।

**'वीरियायारस्स'त्ति** विशेषेणेरयति प्रवर्त्तयत्यात्मानं तासु तासु क्रियास्विति वीर्यमुत्साहविशेषस्तच्च पञ्चधा, यदाह -

**"तवविरियं गुणविरियं, चरित्तविरियं समाहिविरियं च ।**
**आयविरियं [2]पिय तहा, पंचविहं वीरियं होई"** ॥ [ ]

तस्याऽऽचारो वीर्याचारः **"अणिगूहियबलविरिओ"** इत्यादिकस्तस्य **सर्वैरपि** षड्भिरपि **शुद्धिः क्रियते** इत्यर्थः । यदाह -

**"आवस्सएसु जह जह, कुणइ पयत्तं अहीणमइरित्तं ।**
**तिविहकरणोवउत्तो, तह तह से निज्जरा होइ"** ॥ [आव० नि. १२१४] इति ॥७॥

व्यावर्णिताचारपञ्चकशुद्धिरथ सर्वतीर्थङ्करगुणोत्कीर्त्तनगर्भं मङ्गलभूतं गजादिसन्दर्भमाह -

**गय वसह सीह अभिसेय, दाम ससि दिणयरं झयं कुंभं ।**
**पउमसर सागर विमाण-भवण रयणुच्चय सिहिं च ॥८॥** [कल्प.सू.]

**गजं वृषभं सिंहम् अभिषेकं (श्रियः), दाम शशिन दिनकरं ध्वजं कुम्भम् ।**
**पद्मसरः सागरं विमान-भवनं, रत्नोच्चयं शिखिनं च ॥८॥**

---
१. छेदात् तृष्णोपशम-ड, २. पि तहा ड२ । L-परि-२ ।

**गय** त्ति तत्र जिनजननी चतुर्दन्तं, प्रक्षरन्मदनदीसुन्दरं, गोक्षीर[१]धारासोदरमुच्चैस्तरं, जङ्गमं रजताचलमिव गजकलभं यदपश्यत् तदतुलबलपराक्रमनिधिं, गरीयसामपि गुरुं, पवित्रं पुत्रं सूचयति । **वसह** त्ति यच्च वर्णतः शङ्खसुहृदं, प्रौढककुदं, हम्भारम्भास्वरभासुरं, प्रमाणतो बृहत्तरं [२]ककुद्मन्तमपश्यत् तन्महामोहपङ्कमग्नधर्मरथधुरोद्धरणक्षमं तनयं सूचयति । **सीह त्ति** कपिललोचनयुगलं, चटुलकेसराविसरं, दीर्घरसनं, पुच्छच्छटाऽऽच्छोटितभूपीठं कण्ठीरवं यद् ददर्श तद् सर्वत्राऽस्खलितविक्रमं, शूरं, धीरं, पुरुषसिंहमुद्वहं सम्भावयति । **अभिसेय त्ति** पार्श्वद्वय-वर्त्तिकरिकलभप्रचण्डशुण्डादण्डविधृतकलकलशयुगलाऽभिषिच्यमानमूर्तिं, कमलासनां कमलां यदद्राक्षीत् तत् त्रैलोक्यसाम्राज्यलक्ष्मीनाथं नन्दनमावेदयति । **दाम य त्ति** उच्छलन्मञ्जुलमकरन्दरजः पुञ्जाम्, अमलबहुलपरिमलाऽऽकृष्टभ्रमरभरभज्यमानां, पञ्चवर्ण[३]कुसुमस्तोमां मालां यदवलोकयत् तत् त्रिजगतोऽपि मालामिव शिरोवाह्यशासनं नन्दनं दर्शयति । **ससि त्ति** कुमुदाकरामोदकं पार्वणेन्दुं यद् दृष्टवती तत्त्रिभुवनजननयनचकोरचमत्कृतिकारकं दारकमावेदयति । **दिणयरं ति** अस्ततमोनिकरं, लोकोद्योतकरं दिनकरं यदीक्षामास तन्निहतकुमतोलूकततिं, त्रिजगदुल्लासकमतिं, विक्षिप्तमहामोहान्धकारस्थितिं सुतं प्रथयति । **झयं ति** सरलसन्ततिविडम्बितं, किङ्किणीसहस्र-परिमण्डितं महाध्वजं यदवलोकयामास तन्निजवंशप्रासादशिरोदेशस्य ध्वजविभ्राजिवैभवमात्मसम्भवं सम्भावयति । **कुंभं ति** यच्च कमल[४]परिधानं, प्रभूतरत्ननिधानं, शातकुम्भमयं कुम्भमवलोकितवती तत् सकलातिशयशालिनं, निजकुलप्रासादस्य कलशसदृशं पुत्रं प्रकाशयति । **पउमसरं ति** यच्च पालीपर्यन्तायातसलिलकुसलीसङ्कुलं, पद्मखण्डमण्डितं पद्मसरो दृष्टवती तत् संसारकान्तार-परिभ्रमणश्रान्तसमस्तजनसन्तापाऽपहारिणं, [५]गुणकारिणं पुत्रं प्रकटयति । **सागरं ति** यच्च [६]प्रचुरपरिमज्जज्जलचरजन्तुविसरं भूरिरत्नाकरं व्यलोकयत् तद् गरिमगम्भीरिमारम्यं, परतीर्थिभिरगम्यं, सागरान्तमेदिनीजनाऽनुष्ठितशास[७]नं नन्दनं कथयति । **विमाण त्ति** अनेकरत्नमयस्तम्भशताऽऽकीर्णं, क्षुद्रघण्टिकामन्दटणत्कारमुखरितदिगन्तरं, जयजयारावसुन्दरं विमानं यदपश्यत् तद् वैमानिक-सुराणामपि सेव्यं [८]तनूद्भवमुद्भावयति । **भवणं ति** विमान-भवनयोराकारकृतो विशेषः । किञ्च तीर्थकृतो हि नरकदेवलक्षणगतिद्वयादेव समायाता भवन्ति । तत्र नरकगतेराद्यपृथ्वीत्रयादेव, देवगतेरपि भवनपतिव्यन्तरज्योतिष्कवर्जितेभ्यो वैमानिकेभ्य एव, तत्र यस्तीर्थकृत् विमानवासिभ्यः समायाति तज्जननी विमानं पश्यति, यस्तु [९]नरकात्समायाति तज्जननी भवनमिति । **रयणुच्चयं ति** यच्च

१. धारासुन्दरमु-ड२, २. कुकुदमन्तमिति पाठो ल, ड, ड३ प्रतिष्वस्ति । किन्तु स अशुद्धः प्रतिभासते । ३. स्तोमं-ड-ड२, ल, प्रतिष्वशुद्धः पाठ आभाति ४. पिधानं-ड, ५. 'गुणकारिणम्' इति पाठो 'ड२' आदर्शे नास्ति । ६. 'प्रचुर' इति पाठो-ल, ड२, आदर्शे नास्ति । ७. नाकृष्टित-ड, ८. सेव्यमुद्भावयति इति ल, ड२ प्रत्योः पाठोऽस्ति। ९. नारकात्-ल, ड२ ।

प्रतिहततमस्तोमंतेजःपुञ्जाकीर्णं, पञ्चवर्णं रत्नराशिमपश्यत् तदत्यद्भुतगुणरत्नव्रजमात्मजमावेदयति । **सिहिं च** त्ति चः समुच्चये यच्च विगतधूमं, ज्वलज्ज्वालामालाऽऽकुलं ज्वलनं विलोकितवती तदन्यतेजस्वितेजोऽपहारिणं पुत्रं सूचयति । तदेभिश्चतुर्दशभिर्महास्वप्नैः सूच्यते चतुर्दशरज्ज्वात्मकस्याऽपि लोकस्योपरिवर्ती पुत्रो भविष्यतीति ।।८।।

इति निवेदितं सर्वतीर्थकृद्गुणव्यावर्णगर्भं मङ्गलम् । अथाऽऽसन्नोपकारित्वात् श्रीमन्महावीरस्य नमस्करणद्वारेण पुनस्तदाह –

**अमरिंद-नरिंद-मुणिंदवंदियं वंदिउं महावीरं ।**
**कुसलाणुबंधि बंधुरमज्झयणं कित्तइस्सामि ।।९।।**

**अमरेन्द्रनरेन्द्रमुनीन्द्रवन्दितं वन्दित्वा महावीरम् ।**
**कुशलानुबन्धि बन्धुरमध्ययनं कीर्त्तयिष्यामि ।।९।।**

उपक्रमकृतेनाऽपि मृत्युना न म्रियन्ते इत्यमरास्तेषामिन्द्राः [**अमरेन्द्राः**], नराणामिन्द्रा **नरेन्द्राः**, मुनीनामिन्द्रा **मुनीन्द्रा**स्ततो द्वन्द्वस्तै**र्वन्दितं, वन्दिउं** त्ति वन्दित्वा, महद् वीर्यं यस्याऽसौ **महावीरस्तम्** । यदाह चूर्णिकृत् **"महावीरो नाम गुणनिप्फन्नं"** ति महन्तं वीरियं यस्य स भवति महावीरः,

**"सव्वदेवा वि णं अंगुट्ठएणं पंडुकंबलसिलाए**
**अवट्ठियं तित्थयरं उप्पिलिज्जा न सक्केंति उप्पिल्लेउं**
**एवं सकलरयणप्पभाइ पुढवी मेरुंमि[१] घित्तूण,**
**सत्त वि पुढवीओ साहणित्ता अलोए[२] पक्खिविज्जा[३]**
**एरिसं वीरियं सा य अईव लण्हा उज्झा य ततो**
**महाविरियजुत्तो" इति महावीरो त्ति नामं[४] इत्ति** [आव. चूर्णि]।

कुशलो मोक्षस्तमनुबध्नातीत्येवंशीलं **कुशलाऽनुबन्धि बन्धुरं** मनोज्ञम् । अधीयते ज्ञायते परिच्छिद्यतेऽर्थसमुदायोऽस्मादिति **अध्ययनं** शास्त्रं **कीर्त्तयिष्यामि** वर्णयिष्यामि[५] ।।९।।

---

१. 'मेरुं' इति पाठो ल, डर प्रत्योरस्ति । २. आड२/ड३, ३. खिविज्जा-ड२, ४. नाममित्ति इति पाठो 'ल' प्रतौ नास्ति।
५. वर्णयिष्यामि इति पाठो 'ड२/ड३' प्रत्योः नास्ति ।

अथ वर्णनीयाध्ययनाऽर्थाऽधिकारानाह –

**चउसरणगमण, दुक्कडगरिहा सुकडाणुमोयणा चेव ।**
**एस गणो अणवरयं, कायव्वो कुसलहेउ त्ति ।।१०।। [यो०श०५०]**

**चतु:शरणगमनं, दुष्कृतगर्हा, सुकृतानुमोदना चैव ।**
**एष गणोऽनवरतं कर्त्तव्यः कुशलहेतुरिति ।।१०।।**

चतुर्णामर्हत्-सिद्ध-साधु-धर्माणां शरणं गमनं **चतु:शरणगमनं,** तदिह प्रथमोऽर्थाऽधिकारः । दुष्टं कृतं **दुष्कृतं** तस्य **गर्हा** गुरुसाक्षिकमात्मदोषकथनं स द्वितीयोऽर्थाऽधिकारः । शोभनं कृतं **सुकृतं,** तस्याऽ**नुमोदना** भव्यं मयैतत् कृतमिति, स तृतीयोऽर्थाऽधिकारः । **चैव** समुच्चये, **एष** अयं यो भणितुमारब्धः, **गण** स्त्रयाणां समुदायः, **अनवरतं** सततं **कर्तव्योऽनु**सरणीयः । **कुशलो** मोक्षः तस्य **हेतुः** कारण**मिति** कृत्वा ।।१०।।

अथ चतु:शरणमिति प्रथमाधिकारं वर्णयितुमाह –

**अरिहंत सिद्ध साहू, केवलिकहिओ सुहावहो धम्मो ।**
**एए चउरो चउगइहरणा, सरणं लहइ धन्नो ।।११।।**

**अर्हन्तः, सिद्धाः, साधवः, केवलिकथितः सुखावहो धर्मः ।**
**एते चत्वारश्चतुर्गतिहरणाः, शरणं लभते धन्यः ।।११।।**

देवेन्द्रादिकृतां पूजामर्हन्तीत्य**र्हन्तः** । यदाह –

M"**अरिहंति वंदण-नमंसणाणि, अरिहंति पूयसक्कारं ।**
**सिद्धिगमणं च अरिहा, अरिहंता तेण वुच्चंति"** ।। [आव. नि. ९१५]

**तेऽर्हन्तः** प्रथमं शरणम् ।

तथा सिद्ध्यन्ति निष्ठितार्था भवन्तीति सिद्धाः, सितं ध्मातं वाऽष्टप्रकारं कर्म **यैस्ते सिद्धाः** । तथा च -

N"**दीहकालरयं जं तु, कम्मं से सियमट्ठहा ।**
**सियं धंतं ति सिद्धस्स सिद्धत्तमुवजायई"** ।। [आव. नि. ९४७]

---

१. गुणो ड, ड२, ड३ । M-N परि-२ ।

किं च-"**सिद्ध त्ति य बुद्ध त्ति य पारगे**"त्यादि तद् द्वितीयं शरणम् ।

तथा निर्वाणसाधकान् योगान् साध्नुवन्ति कुर्वन्तीति **साधवः**,

°"**निव्वाणसाहए जोगे, जम्हा साहंति साहुणो ।**
**समा य सव्वभूएसु, तम्हा ते भावसाहुणो**" ।। [आव. नि. १००४]

इत्यादि तत्तृतीयं शरणम् ।

धरति दुर्गतौ प्रपतन्तं[1] प्राणिनमिति **धर्मः**, किम्भूतः ? केवलिभिर्ज्ञानिभिः कथितः प्रतिपादितः **केवलिकथित** इत्यनेन स्वमतिप्रकल्पितान्यतीर्थिकधर्मनिरासमाह । पुनः कथम्भूतः ? सुखमावहत्यनुबध्नातीति **सुखावहः** । अनेनेहलोकेऽपि मिथ्यादृष्टिधर्मस्य भैरवपतननदीप्लवनशिरःक्रकचदापना[दि]दुःखाकीर्णत्वात् परत्र च भवभ्रमणकारणत्वात् तन्निषेधं चाह, अयं चतुर्थं शरणम् ।

**एते चत्वार**श्चतुर्गतिं नरक-तिर्यग्-नरा-ऽमरलक्षणां हरन्तीति सिद्धिलक्षणपञ्चमगतिप्रापणेन **चतुर्गतिहरणा** यस्मादित्यर्थः । इह हि जन्मजरामरणविविधाऽऽधि-व्याधि-भय-शोकेष्टवियोगा-ऽनिष्टसम्प्रयोगदारिद्र्य-दौर्भाग्यादिश्चापदसन्दोहदुर्गाम्, बहूपसर्गाम्, निर्नासितसद्बोधाम्, अत्यन्तप्रबल-क्रोधादिक्रुध्यत्किरातकृतसन्मार्गरोधाम्, दुर्गचतुर्गतिगर्तासङ्कटां भवाटवीमटन्तः स्पष्टदुष्टाष्ट-कर्मचरटैरटन्तः शरणरहिता नीयन्ते दुर्गतौ प्राणिनः । उक्तञ्च -

[आर्यावृत्तम् ]

"**धम्मरहियाण तिजए, सरणविहूयाण[2] दुक्खतवियाणं ।**
**मरणभयपीडियाणं, सरणं चिअ नत्थि संसारे**" ।। [ ]

**किञ्च - (शिखरिणीवृत्तम्)**

"**पितुर्मातुर्भ्रातुस्तनयदयितादेश्च पुरतः,**
**प्रभूताऽऽधिव्याधिव्रजविधुरिताः[3] कर्मचरटैः ।**
**रटन्तः क्षिप्यन्ते यममुखगुहान्तस्तनुभृतो;**
**ह हा कष्टं लोकः शरणरहितः स्थास्यति कथम् ?**" ।।

१. पतन्तं-ड, २. विहूणाल-ड, ३. निगडिताः प्रव.सारो.मु., O-परि-२ ।

[शार्दूलविक्रीडितवृत्तम्]

"ये जानन्ति विचित्रशास्त्रविसरं ये मन्त्रतन्त्र[१]क्रिया-
प्रावीण्यं प्रथयन्ति ये च दधति द्योतिः कलाकौशलम् ।
तेऽपि प्रेतपतेरमुष्य सकलत्रैलोक्यविध्वंसन-
व्यग्रस्य प्रतिकारकर्मणि न हि प्रागल्भ्यमाबिभ्रति" ।।

"नानाशास्त्रपरिश्रमोद्भटभटैरा[२]वेष्टिताः सर्वतः,
गत्युद्दाममदान्धसिन्धुरशतैः केनाऽप्यगम्याः क्वचित् ।
शक्रश्रीपतिचक्रिणोऽपि [३]सहसा कीनाशदासैर्बला-
दाकृष्टा यमवेश्म यान्ति [४]हहहा वि[५]स्त्राणता प्राणिनः" ।।

[प्रव. सारो. ६७ द्वार, ५७३ गाथाया आन्तरश्लोका-१,२,३]

अथ कथमपि बहुक्षीणेष्वशुभकर्मसु, प्राग्जन्मोपात्तशुभकर्मवशाच्च युगसमिलान्यायेन कथञ्चनापि मानुषत्वाद्यवाप्तिस्ततोऽपि देशविरतिसर्वविरतिलाभस्तल्लाभेऽपि सति **धन्यः** सुकृतकर्मा एवार्हत्सिद्ध-साधुधर्मान् **शरणं** कथञ्चन **लभते** शरणत्वेन प्रतिपद्यत इति गाथार्थः ।।११।।

अथ यथाविधिना एतान् शरणं प्रतिपत्स्यति तथा आह –

**अह सो जिणभत्तिभरुच्छरंतरोमंचकंचुयकरालो ।**
**पहरिसपणउम्मीसं सीसम्मि कयंजली भणइ ।।१२।।**

**अथ स जिनभक्तिभरोच्छलद्रोमाञ्चकञ्चुककरालः ।**
**प्रहर्षप्रणयोन्मिश्रं शीर्षे कृताञ्जलिर्भणति ।।१२।।**

**अथ स** शरणप्रतिपत्तौ[६] चतुर्विधसङ्घस्यान्यतमो जीवः कथम्भूतः ? जिनेषु भक्तिर्**जिनभक्ति**स्तस्य भरस्तस्माज्जिनभक्तिभरा**दवस्तृणन्नु**दयं [७]गच्छन्नसौ **रोमाञ्चः** स एव **कञ्चुको** रोमाञ्चकञ्चुकस्तेन **करालो**ऽन्तरङ्गशत्रूणां भीषणः । तथा **प्रहर्षाद्** यत् प्रणतं प्रणामस्तेनोन्मिश्रं व्याकुलं भवत्येवम् । यदिवा [८]प्रहर्षवशाद् योऽसौ **प्रणय** आनन्दाश्रु गद्गदस्वरस्तेन [९]**शीर्षे** मस्तके **कृतकरकुड्मलः** सन् **भणति** ।।१२।।

---

१. क्रियाः ड२, ल, २. वेष्टितः ड२, ल, ३. महसा-ड, ४ हहा ल, ड२, ड३, ५. निस्त्राणता प्रव.सारो. मु, ६. प्रतिपत्ता-ड, ७. गच्छन् योऽसौ-ड, ८. 'प्रवशाद्' इत्याकारकः पाठोऽसमीचीनः भाति । ९. 'शीर्षे' इति पाठः ल, ड२ प्रत्योर्नास्ति ।

यदसावर्हच्छरणमुररीकुर्वन् भणति तद् गाथादशकेनाऽऽह –

**राग-द्दोसारीणं हंता कम्मट्ठगाइअरिहंता ।**
**विसय-कसायारीणं अरिहंता हुंतु मे सरणं ।।१३।।**

**रागद्वेषारीणां हन्तारः कर्माष्टकाद्यरिहन्तारः ।**
**विषयकषायारीणामर्हन्तो भवन्तु मे शरणम् ।।१३।।**

द्रव्य-[१]भावभेदाद् द्वेधा रागः, तत्र द्रव्यरागो हरिद्रादिः, भावरागस्त्रिधा-दृष्टिरागः, विषयरागः, स्नेहरागः । तत्र दृष्टिरागो यथा स्वर्गादागतस्य कपिलस्य आसुरे रमसे रमसे [२]इत्येवं भणतः । विषयरागः सुकुमारिकायां [३]देवगतिराजस्येव । स्नेहरागो नाम [४]यो यस्मिन् भावे मूर्छितः, यथा अर्हन्नकपत्नी अरिहमित्रेऽ[५]ध्युपपन्ना । अथवा [६]मायालोभभावेनाऽभिष्वङ्गमात्रं रागः । द्वेषः परद्रोहाऽध्यवसायः मधुदेवपिप्पलादयोरिवाथवानभिव्यक्त[७]क्रोधमानस्वरूपमप्रीतिमात्रं द्वेषः । मदमत्सराऽहङ्काराणां तज्जातीयानां [८]रागद्वेषावुपलक्षणम्, ततस्त एवाऽरयो **राग-द्वेषारयस्तेषां हन्तारः** । कर्माष्टकं प्रतीतम्, आदिशब्दात् परीषहवेदनोपसर्गग्रहः, ततः कर्माष्टकाद्येवाऽरयः **कर्माष्टकाद्यरयो** लुप्तषष्ठीविभक्तित्वात्तेषां [९]**हन्तारः** शब्द-रूप-गन्ध-रस-स्पर्शा **विषयाः**, क्रोध-मान-माया-लोभाश्चत्वारः **कषायाः**, पुनरेकैकशोऽपि अनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनभेदाच्चतुर्धा । विषयाश्च कषायाश्च इति द्वन्द्वस्त एवा**ऽरयस्तेषां हन्तारोऽर्हन्तो** जिना **मे** मम अपारसंसारकारागृहपरिचङ्क्रमणभयाऽऽतुरस्य प्रबलरागादिदुष्टपापिष्ठगुप्तिपालानिष्टकदर्थनात्रा-सवित्रस्तमनसः समाश्वासनस्थानकल्पं **शरणं** परि[१०]त्राणं **भवन्त्वि**त्यर्थः ।।१३।।

**रायसिरिमवकसित्ता तव-चरणं दुच्चरं अणुचरित्ता ।**
**केवलसिरिमरिहंता अरिहंता हुंतु मे सरणं ।।१४।।**

**राज्यश्रियमपकृष्य तपश्चरणं दुश्चरमनुचर्य ।**
**केवलश्रियमर्हन्तोऽर्हन्तो भवन्तु मे शरणम् ।।१४।।**

**राज्यश्रियं** राज्यलक्ष्मी**मपकृष्या**ऽवधूय, तप्यते कर्ममलाऽपनयनेनाऽऽत्मा सुवर्णमिवाऽग्निना अनेनेति **तप**स्तस्य **चरणं** सेवनम्, कथम्भूतम् ? **दुश्चरं** सामान्यसाधुभिः कर्तुमशक्यम्, तथा च -

---

१. भावाद्-ड२, २. इति-ड२, ड३ प्रत्योः नास्ति । ३. देवरति-ड, ४. 'यो' इति पाठ ड२, ड३, ल प्रतिषु नास्ति । ५. ध्योपपन्ना-ल, ड२, ६. स्वभावेन-ड, ७. मायालोभकोधमान स्वरुप-ड, ८. रागद्वेषानुपलक्षणं ल, ड२, ड३, ९. 'तेषां हन्तारः' इति पाठः ड२, ल पुस्तके नास्ति । १०. क्रषायाश्च इतिपाठः ड२, ल पुस्तके नास्ति ।

[P]"**संवच्छरमुसभजिणो, छम्मासा वद्धमा[१]णजिणचंदो ।**
**इय विहरिया निरसणा, जइज्ज एयाणुमाणेण"** ।। इत्यादि [उपदेशमाला-३]

तत्तपोऽ**नुचर्य** आसेव्य ये **केवलश्रियं** केवलज्ञानविभूतिमर्हन्तस्तस्या योग्या भवन्ति [ते] **अर्हन्तस्तीर्थ**कृतो **मे शरणं** परित्राणं **भवन्त्वि**ति सर्वत्र योज्यम् । अथवा ये [२]**राज्यश्रीमपकर्षयन्त**-स्त्यजन्त:, तथा **तपश्चरणं दुश्चरम**नुचरन्त: **केवलश्रीं चाऽर्हन्त:** प्राप्नुवन्तो ये, [३]**मे** शरणम्, एतेन यद्यपि शक्रादयो गर्भस्थमात्रमपि जिनं नमस्कुर्वन्ति, तथाऽपि गृहवासे तेषामप्यविरतत्वात् साधूनां तिसृष्व-वस्थासु ते नमस्करणयोग्या इति दर्शितम् । यच्चाऽनागतजिना नमस्क्रियन्ते तत्तेऽपि चारित्रा-वस्थास्था एवेति भाव: ।।१४।। [द्रव्यजिनानां नमस्करणीयतायां सर्वविरतानां साधु-साध्वीनां देशविरतानामविरतानां च श्रावक-श्राविकाणां किदृश: कियद् वाऽधिकारो वर्त्तत इत्येवात्र समाधिप्रापणाय पू. उपाध्यायप्रवरश्रीधर्मसागरगणिसंदब्धप्रवचनपरीक्षाया: पू. महोपाध्यायश्री यशोविजयगणिविरचितप्रतिमाशतकस्य संटङ्क उल्लेख: सूक्ष्मबुद्ध्याऽवलोकनीयो जिज्ञासुभि: । द्वावप्युल्लेखौ परिशिष्ट-११ मध्ये संकलय्य मुद्रितावस्माभि:- सम्पादक:]

**थुय-वंदणमरिहंता अमरिंद-नरिंदपूयमरिहंता ।**
**सासयसुहमरहंता अरिहंता हुंतु मे सरणं ।।१५।।**

**स्तुतिवन्दनमर्हन्तोऽमरेन्द्रनरेन्द्रपूजामर्हन्त: ।**
**शाश्वतसुखमर्हन्तोऽर्हन्तो भवन्तु मे शरणम् ।।१५।।**

थुय-स्तुति: स्तव: **"सव्वन्नु सोमदंसण"** इत्यादि, **वंदणं**-कायिकप्रणाम**स्तावर्हन्तस्त**योर्योग्या इत्यर्थ: । **अमरेन्द्रनरेन्द्राणां पूजां** समवसरणादिकां समृद्धि[४]**मर्हन्त**स्तस्या अपि योग्या [५]भवन्तु इत्यर्थ: । शश्वद् भवं शाश्वतम्, तच्च तत् सुखं च **शाश्वतसुखं** निर्वाणानन्तरं तदप्य**र्हन्ती**त्यर्थ:। शेषं तथैव ।।१५।।

**[६]परमणगयं मुणित्ता जोइंद-महिंदझाणमरिहंता ।**
**धम्मकहं अरिहंता अरिहंता हुंतु मे सरणं ।।१६।।**

**परमनोगतं जानन्तो योगीन्द्रमहेन्द्रध्यानमर्हन्त: ।**
**धर्मकथामर्हन्तोऽर्हन्तो भवन्तु मे शरणम् ।।१६।।**

परेषामात्मव्यतिरिक्तानां मनांसि **परमनांसि** तेषु **गतं** स्थितं चिन्तितमित्यर्थ:, 'मुणत्' प्रतिज्ञाने [सिद्धहेमधातुपाठे तस्य १३६५ - धात्वङ्क] तं **मुणन्तो** जानन्त: । यदाह –

१. 'जिण'-ड प्रत्यां नास्ति । २. राज्यश्रिय-डर, ल, ३. ते-ड, ४. त: तत्तस्या-डर, ५. भवन्तु' डर नास्ति । ६. गई-ड, P-परि-२ ।

**"दव्वमणोजोएणं मणनाणीणं अणुत्तराणं पि ।**
**संसयवोच्छेयं केवलेण नाऊण सयं कुणइ" ।। इत्यादि,** [आव.हा.वृ०ध्या० श.१]

**योगीन्द्रा** गौतमादयः, **महेन्द्राः** शक्रादयस्तेषां **ध्यानं** स्थिराध्यवसायरूपं **तदर्हन्तीति** । तथा चाह -

**"पडिवन्नचरमतणूणो[1] अइसयलेसं पि जस्स दट्ठूणं ।**
**सवहुत्तमणा झायंति जोगिणो तं जिणं नमह" ।। [ ]**

तथा - **"बहुभत्तिब्भरनिब्भरहियया दट्ठूणगण गब्भवासे वि ।**
**सक्काइया जिणिंदं थुणंति वंदंति झायंति" ।।**

तथा **धर्मकथां** दान-शील-तपो-भावनादिकां कथयितु**मर्हन्त**स्तस्याः कथनयोग्या ज्ञातार इत्यर्थः । उक्तञ्च –

**°"कुञ्जा जिणाइपूया परिणामविसुद्धिहेउओ निञ्चं ।**
**दाणादओ य मग्गप्पभावणाओ य कहणं च" ।।** [वि० आ० भा० ३२४७]

छद्मस्थावस्थायां तु जिनानां धर्मकथनाऽनर्हत्वात् । शेषं तथैव[2] ।।१६।।

**[3]सव्वजियाणमहिंसं अरिहंता सञ्चवयणमरिहंता ।**
**बंभव्वयमरिहंता [4]अरिहंता हुंतु मे सरणं ।।१७।।**

**सर्वजीवानामहिंसामर्हन्तः सत्यवचनमर्हन्तः ।**
**ब्रह्मव्रतमर्हन्तोऽर्हन्तो भवन्तु मे शरणम् ।।१७।।**

जीवे'ति [जीवन्ति] ●दशविधप्राणधारणेन तिष्ठन्तीति जीवाः सूक्ष्म-बादर-त्रस-स्थावराः । **सर्वे च** ते **जीवाश्च** सर्वजीवास्तेषां न हिंसनम**हिंसा** रक्षा ता**मर्हन्तः** । तथा सतां हितं **सत्यम्,** तञ्च तद् **वचनं** च । उक्तञ्च –

**"यद् भूतहितमत्यन्तं तत् सत्यमितरं मृषा ।**
**न तथा वचनं सत्यमतथ्यवचनं न च" ।। [ ].**

असत्यभाषणहेतुराग-द्वेष-मोहरहितत्वात् तेषां तदेवा**र्हन्तः ब्रह्मव्रत**मष्टादशविकल्पमासेवितुं प्ररूपयितुं वा**ऽर्हन्तस्ते** । शेषं तथैव ।।१७।।

---

१. गुणाणो-ड२, ल, २. तथैव च-ल, ड२, ३. सव्वं-ल, ड३, ४. अरहंता-ड, ● प्रत्येक प्रतिषु वृत्तिपाठोऽक्रमिकः । ततोऽत्र चारुरुपेण ग्रथितो मया । Q-परि-२ ।

**ओसरणमुवसरित्ता चउतीसं अइसए निसेवित्ता ।**
**धम्मकहं च कहित्ता अरिहंता हुंतु मे सरणं ।।१८।।**
**समवसरणमुपसृत्य चतुस्त्रिंशतोऽतिशयान् निषेव्य ।**
**धर्मकथां च कथयित्वा, अर्हन्तो भवन्तु मे शरणम् ।।१८।।**

सम् सामस्त्येनाऽवश्रियते गम्यते संसारभयोद्विग्नैर्जीवैरिति **समवसरणम्** । [१]आत्माङ्गुलेन योजनप्रमाणभूभागं प्रथमतः संवर्त्तकवा[२]ताऽपनीततृणकचवराद्यशुभमलपटलम्, तदनु सुरभिगन्धोदकपुष्पवर्षणा[३]भिषिक्तभूभागम्, मणिरत्नतपनीयसन्ततिपरिकर्मितहैम[४]कुट्टिमतलम्, वैमानिकज्योतिष्कभवनपतिविनिर्मिताभ्यन्तरमध्यबाह्यमणिरत्नस्वर्णकपिशीर्षकोपशोभितरत्नकाञ्चनरूप्यंनि[५]चयचतुर्द्वारप्राकारत्रयम्, चतुर्दिग्व्यवस्थापितसहस्रारधर्मचक्रचतुष्टम्, कुड्भीसहस्रोपशोभितयोजनसहस्रोच्छ्रितरत्नमयधर्मध्वजचतुष्टयम्, जलस्थलजपञ्चवर्णपुष्पप्रकरोपहारसारम्, कृष्णागुरुप्रभृतिधूपधूमोद्गारसारप्रकटवज्रघटीसुरभितदिगन्तम्, स्पष्टाष्टमाङ्गलिकतिलकितसच्छत्रविचित्रघण्टाप्रकटचलच्चारुचामरविसरम्, विशालशाल-भञ्जिकाविराजितकरिमकरसिंहगरुडध्वजादिकलितवज्रवैडूर्येन्द्रनील प्रमुखरत्नोत्करकर्बुरितमणिमयस्तम्भसन्निविष्टेहामृगविहगतुरगकुञ्जररुरुसरभवृषभवनलतापद्मलताविभक्तिव्यक्तीकृतचारुचमत्कारसारतोरणोपशोभितचतुर्द्वारम्, तन्मध्यभागविन्यस्तप्रशस्तरत्नमयपीठम्, तदुपरिपरिकल्पितदेवछन्दकम्, तदुपर्यशोकतरुविरचितरमणीयमध्यदेशम्, अशोकवृक्षोपरिस्थितचैत्यविटपिप्रकटितातिशयम्, चैत्यवृक्षोपरि स्फुरच्छत्रातिछत्रत्रितयम्, अशोकवृक्षसमीपोपन्यस्तस्थापितसचरणपीठसिंहासनचतुष्टकम्, आग्नेयादिदिग्व्यवस्थितमुनिवैमानिकसुन्दरी-श्रमणी-भवनपति-व्यन्तर-ज्योतिष्कामरी-वैमानिकसुर-नर-नारीविशदद्वादशपर्षदुपशोभमानम्, एवंविधं यत् समवसरणम्, **तदुपसृत्य** अलङ्कृत्य तथा **चतुस्त्रिंशतो** बुद्धाऽतिशयान् **निषेव्य**, उपलक्षणत्वाच्च पञ्चत्रिंशद्वचना**ऽतिशयांश्चो**पयुज्य ।

**ते चाऽमी बुद्धाऽतिशयाः - चउतीसं बुद्धाइसेसा पन्नत्ता, तं जहा १-अवट्ठिए केस-मंस-रोम-नहे, २-निरामया, निरुवलेवा गायलट्ठी, ३-गोक्खीरपंडुरे मंस-सोणिए, ४-पउमुप्पलगंधिए ऊसासनीसासे, ५-पच्छन्ने आहारनीहारे अदिस्से मंसचक्खुणा, ६-आगासगयं चक्कं, ७-आगासगयं छत्तं, ८-आगासगयाओ सेयवरचामराओ, ९-आगासगयं फलिहामयं सपायपीढं सीहासणं, १०-आगासगओ कुड्भीसहस्स-**

---

१. "आत्मा...भूभागं" इति पाठः स्पष्टः न भाति ल, ड, ड२ प्रतिषु । २. पवन-ल, ड२, ३. वज्र-ल, ड२; ४. तोत्तमहैम-ड२, ५. मणिमय-ड२, ल ।

परिमंडियाभिरामो इन्दज्झओ पुरओ गच्छइ, ११-जत्थ जत्थ वि य णं अरहंता भगवन्तो चिट्ठंति ठायंति तत्थ तत्थ वि य णं तक्खणादेव संच्छन्नपत्त-पुप्फपल्लव-समाउलो सज्झओ [सच्छत्तो] सघंटो सपडाओ असोगवरपायवो अभिसंजायइ, १२-ईसिं पिट्ठओ मउडठाणंमि तेयमंडलं अभिसंजायइ, अंधकारे वि य णं दस दिसा पभासेइ, १३-बहुसमरमणिज्जे भूमिभागे, १४-अहोसिरा कंटया भवंति, १५-उडूविवरीया सुहफासा भवंति, १६-सीयलेणं सुहफासेणं सुरभिणा मारुएण जोयणपरिमंडलं सव्वओ समंता संपमिज्जिज इत्ति, १७-जुत्तफुसिएण मेहेण निहयरयरेणुय किज्जइ, १८-जलथलयभासुरपभुएणं बिंटठाइणा दसद्धवण्णेणं कुसुमेणं जाणुस्सेहपमाणमित्ते पुप्फोवयारे किज्जइ, १९-अमणुन्नाणं सद्द-फरिस-रस-रूव-गंधाण अवकरिसो भवइ, पाठान्तरेण कालागुरु-कुंदरुक्क-तुरुक्क-धूवमघमघित गंधुद्धूयाभिरामे भवइ, २०-[पाठान्तरेण] उभओ पासिं च णं अरहंताणं भगवंताणं दुवे जक्खा कडय-तुडिय-थंभियभुयाओ चामरुक्खेवं करिंति, २१-मणुन्नाणं सद्द-फरिस-रस-रूव-गंधाणं पाउप्पभावो भवइ, २२-पञ्चाहरओ वि य णं हिययगमणीओ जोयणनीहारीसरो, भगवं च णं अद्धमागहीए भासाए धम्ममाइक्खइ, २३-सा वि य णं अद्धमागही भासा भासिज्जमाणी, तेसिं सव्वेसिं आरियमणारिय-दुपय-चउप्पय-मिय-पसु-पक्खि-सरीसिवाणं अप्पणो हियसिवसुहयभासत्ताए परिणमइ, २४-पुव्वबद्धवेरा वि य णं देवाऽसुर-नाग-सुवन्न-जक्ख-रक्खस-किन्नर-किंपुरिस-गरूल-गंधव्व-महोरगा अरहओ पायमूले पसंत चित्तमाणसा धम्मं निसामिंति, २५-अन्नउत्थिया पावयणीया वि य णं आगया वंदंति, २६-आगया समाणा अरहओ पायमूले निप्पडिवयणा भवंति, २७-जओ जओ वि य णं अरहंतो भगवंतो विहरंति तओ तओ वि य णं जोयण-पणवीसाएणं ईई न भवइ, २८-मारी न भवइ, २९-सचक्कं न भवइ, ३०-परचक्कं न भवइ, ३१-अइवुट्ठी न भवइ, ३२-अणावुट्ठी न भवइ, ३३-दुब्भिक्खं न भवइ, ३४-पुव्वुप्पण्णा वि य णं उप्पाइया वाही खिप्पामेव उवसमिंति । [समवा०सू० ३४]

एतेषां विषयविभाग; कथ्यते द्वितीयादिकमतिशयचतुष्टयं जन्मप्रत्ययम्, पञ्चाहरओ इत्यारभ्य ये अभिहितास्ते भामण्डलं च [यावत्] कर्मक्षयकृताः शेषा भवप्रत्ययेभ्योऽन्ये देवकृताः ।

१-तथा पणतीसं वयणाइसेसा पन्नत्ता-संस्कारवत्त्वं संस्कृतादिलक्षणयुक्तत्वम्, २-उदात्तत्वमुच्चैर्वृत्तिता, ३-उपचारोपेतत्वमग्राम्यता, ४-गम्भीरशब्दत्वं मेघस्येव,

५-अनुनादित्वं प्रतिरवोपेतता, ६-दक्षिणत्वं सरलत्वम्, ७-उपनीतरागत्वं मालवकैशिक्यादि ग्रामरागयुक्तत्वम्, एते सप्त शब्दा-पेक्षयाऽतिशयाः, एते त्वर्थापेक्षया तत्र, ८-महार्थत्वं बृहदभिधेयता, ९-अव्याहतपूर्वापरत्वं पूर्वाऽपरवाक्याऽविरोधः, १०-शिष्टत्वमभिमतसिद्धान्तोक्तार्थता वक्तुः शिष्टतासूचकत्वं वा, ११-असन्दिग्धत्वम-संशयकारिता, १२-अपहृतान्योत्तरत्वं परदूषणा-विषयता, १३-हृदयग्राहित्वं श्रोतृमनोहरता परचित्ताऽऽह्लादकत्वम्, १४-देशकालाऽव्यतीतत्वं प्रस्तावोचितता, १५-तत्त्वानुरुपत्वं विवक्षितवस्तुस्वरूपानुसारिता, १६-अप्रकीर्णप्रसृतत्वं सुसम्बद्धस्य सतः प्रसरणम्, अथवाऽसम्बद्धाधिकारित्वात्विस्तरतोऽभावः, १७-अन्योन्यप्रगृहीतत्वं परस्परेण पदानां वाक्यानां वा सापेक्षता, १८-अभिजातत्वं वक्तुः प्रतिपाद्यस्य वा भूमिकानुसारिता, १९-अतिस्निग्धमधुरत्वं घृतगुडादिवत्सुखकारित्वं, २०-अपरम-र्मवेधित्वं परमर्मानुद्घट्टनस्वरूपत्वम्, २१-अर्थधर्माऽभ्यासानपेतत्वमर्थधर्मप्रतिबद्ध-त्वम्, २२-उदारत्वम-भिधेयाऽर्थस्याऽतुच्छत्वं गुम्फगुणविशेषो वा, २३-परनिन्दास्वो-त्कर्षवियुक्तत्वं प्रतीतमेव, २४-उपगतश्लाघ्यत्वमुक्तगुणयोगात् प्राप्तश्लाघ्यता, २५-अपनीत(दोष)त्वं कारक-काल-वचन-लिङ्गादिव्यत्यय रूपवचनदोषापेतता, २६-उत्पादिताच्छिन्नकौतूहलत्वं स्वविषये श्रोतॄणां जनितमविच्छिन्नं कौतूहलत्वं येन तत्तथा तद्भावस्तत्त्वम्, २७-२८-अद्भूतत्वमविलम्बितत्वं च प्रतीतमेव, २९-विभ्रम-विक्षेप-किलकिञ्चितादिवियुक्तत्वं विभ्रमो-वक्तृमनसो भ्रान्तता विक्षेपस्तस्यै-वाभिधेयत्वं प्रत्यनासक्तता किलिकिञ्चितं रोषभयाऽभिलाषादि-भावानां युगपद्वा सकृतकरणमादिशब्दान्मनोदोषान्तरपरिग्रहः तैर्विप्रमुक्तं यत्तत्तथा तद्भावस्तत्त्वम्, ३०-अनेकजातिसंश्रयाद् विचित्रत्वं, इह जातयो वर्णनीयवस्तुस्वरूपवर्णनानि, ३१-आहितविशेषत्वं वचनान्तरापेक्षया ढौकितविशेषणत्वम्, ३२-साकारत्वं विच्छिन्नवर्णपदवाक्यत्वेनाऽऽकारप्राप्तत्वम्, ३३-सत्त्वपरिगृहीतत्वं साहसोपेतता, ३४-अपरिखेदित्वमनायाससम्भवः, ३५-अव्युच्छेवित्वं विविक्षितार्थसम्यक्सिद्धि यावदव्यवच्छिन्नवचनप्रमेयतेति। [समवा०सू० ३५]

एवमेते पञ्चत्रिंशद्वचनातिशयास्तान**प्यासेव्य** उपयुज्येत्यर्थः । तथा **धर्मकथां** च **कथयित्वा** ये मुक्तिं यान्ति यास्यन्ति याता इत्यध्याहार्यम् । पूर्वं धर्मकथनयोग्या इत्युक्तवचनतो धर्मं कथयित्वेति न पौनरुक्त्यम् । तथाऽत्राऽध्ययने यत्र कुत्राऽपि पौनरुक्त्यसम्भवस्तत् तत् स्तुत्युपदेशरूपादित्वेन तत्परिहारः कार्यः उक्तञ्च –

उपदेश-स्तुति-ध्यान-तपो दानौषधादिषु गुणस्तवे ।
श्रुताऽध्याये पौनरुक्त्यं न गण्यते अर्हन्तः ।। [ ] शेषं तथैव ।।१८।।

**एगाए गिराणेगं संदेहं देहिणं समुच्छित्ता ।**
**तिहुयणमणुसासित्ता अरिहंता हुंतु मे सरणं ।।१९।।**

**एकया गिराऽनेकान् सन्देहान् देहिनां समुच्छेद्य ।**
**त्रिभुवनमनुशासयन्तोऽर्हन्तो भवन्तु मे शरणम् ।।१९।।**

**एकया गिरा** वाचा एकेनाऽपि वचनेन अनेकेषां **देहिनां** प्राणिना**मनेकप्रकार**सन्देहं संशयं **समुच्छेद्य** संशयत्रुटिं कृत्वेत्यर्थः ।

उक्तञ्च – **"रिभियं पयऽक्खरसबला, मिच्छितरतिरिच्छसिगिरपरिणामा ।**
**मणनिव्वाणी वाणी जोयणनीहारिणी किं च" ।।**
**"एगाए अणेगेसिं संशयवोच्छेयणंमि अपडिहया ।**
**न य निव्विज्जइ सोया तिप्पइ सव्वाउएणंपि" ।।** [घ्या.श.वृ. १]

ननु कथमर्हद्गीरेकाऽपि युगपत्प्रतिप्राणिसंशयव्यवच्छेदाय भवति ? उच्यते, एकस्यामपि भगवद्भाषायां सर्वाक्षरसंयोगः कथमप्यस्ति । स च श्रोतृश्रवणपुद्गलस्पृष्टः सन् व्यक्तीभवति । तथाहि - अर्हद्भाषादलिकानि नाम सन्देहवतां श्रोतॄणां कर्णकोटरं प्रविष्टानि, ततस्तत् श्रवणपुद्गल-संयोगतः स्वकीयां सर्वाक्षरसन्निपातलक्षणां शक्तिं व्यक्तीकुर्वन्ति ततस्तदुत्तररूपतयाऽनेकशः परिणमन्ति[१] । दृश्यते च द्रव्यान्तरसंयोगेन द्रव्याऽन्यथाभावः, यथा हरिद्रायाश्चूर्ण[२]संयोगेनारूणत्वं नीलीसंयोगेन नीलत्वमित्यादि । अत्राऽर्थे श्री भद्रबाहुगुरवोऽप्याहुः -

Q-1**"वासोदगस्स व जहा वन्नाइ हुंति मायणविसेसा ।**
**सव्वेसिं पि सभासा जिणभासा परिणमइ एवं" ।।** [आव० नि० ५७७]

अत एकापि गीः संशयवतां निजनिजभाषात्वेन परिणमन्ती, सर्वेषामपि संशयव्यवच्छेदिका भवतीति सुस्थम् । तथा **त्रिभुवनमनुशाष्य** शिक्षयित्वा **अनुशासयन्तो** वा सम्यक्त्व-देशविरति-सर्वविरतिलक्षणशिक्षाप्रदानेन ते । शेषं तथैव ।।१९।।

१. परिणमन्तो-ल, ड, ड२, ड३ परिणमन्ति अवचूर्याम् । २. चूर्णक-ल, ड२, ड३ । Q-1-परि-२ ।

**वयणामएण भुवणं निव्वावित्ता गुणेसु[1] ठावित्ता ।**
**जियलोयमुद्धरित्ता अरिहंता हुंतु मे सरणं ।।२०।।**
**वचनामृतेन भुवनं निर्वाप्य गुणेषु स्थापयित्वा ।**
**जीवलोकमुद्धृत्याऽर्हन्तो भवन्तु मे शरणम् ।।२०।।**

वचनमेवाऽमृतं **वचनाऽमृतं** क्षुत्-पिपासा-पीडादिदोषनिरसनसमर्थत्वात् । उक्तं च –

**"सव्वाऊयं पि सोया खविज्ज जइवि हु सययं जिणो कहइ ।**
**सीउण्हखुप्पिवासापरिस्समभए अविगणंतो"** ।। [आव. नि. ५७९]

**किञ्च –**

**"नरगतिरियमणुयसुरगणसंसारियसव्वदुक्खरोगाणं ।**
**जिणवयणमिगमोसहं, अपवग्गसुहिक्ककयफलयं"** ।। [ध्या०श० ४५ वृ० ]

तेन **वचनामृतेन**[2] **भुवनं** लोकं **निर्वाप्य** तस्य तृप्तिमुत्पाद्य **निर्वापयन्तो** वा प्रीणयन्तः । तथा **गुणेषु** उत्तरोत्तरगुणस्थानकेषु सम्यक्त्वविरताविरतप्रमत्ताप्रमत्तादिकेषु भुवनमेव[3] **स्थापयित्वा स्थापयन्तो वा** सदुपदेशवशात् तानि प्रापयन्त इत्यर्थः, तथा **जीवलोकं** भव्यजीवलोकम्, अभव्यास्तु तीर्थङ्करोपदेशेनाऽपि नाऽवबुध्यन्ते यस्मादिति । **"तित्थयरेण वि कहिए[4] अभव्वजीवा न बुज्झंति"** इति वचनात् **तमुद्धृत्य उद्धरन्तो वा** भवान्धकूपादिति गम्यत्वात्, तस्मात् स्ववचनरज्जुनाऽऽकर्षयन्त इत्यर्थः ये तेऽ**र्हन्तः** । शेषं तथैव ।।२०।।

अथातीताऽनागतार्हत्शरणद्वारेण तन्निगमयन्नाह –

**अच्चब्भुयगुणवंते नियजससहरपसाहियदियंते[5] ।**
**निययमणाइअणंते पडिवन्नो सरणमरिहंते ।।२१।।**
**अत्यद्भुतगुणवतो निजयशःशशधरप्रसाधितदिगन्तान् ।**
**नियतमनाद्यनन्तान् प्रतिपन्नः शरणमर्हन्तः ।।२१।।**

अत्यद्भुतगुणा बुद्धातिशय-वचनातिशय-प्रातिहार्य[6]लक्षणास्ते विद्यन्ते येषां ते तथा, तान्

१. गुणेहिं-ड, २. तं लोक-ड२/ल, ३. भवस्था-ड, ४. कहिए-ड, ड२, ल, ५. ससिहर ड, ६. प्राप्तिप्रातिहार्य-ल, ड२ । R-परि-२ ।

**अत्यद्भुतगुणवत्**:, तथा [१] निजयश एव शशधरो निजयशःशशधरस्तेन प्रसाधिता मण्डिता धवलीकृताः दिगन्ता यैस्ते तान् **निजयशः शशधरप्रसाधितदिगन्तान्** । **नियतं** शाश्वतं वा, यथा भवत्येवं [२] न आदि न चान्तो येषां **तेऽनाद्यनन्तास्तानर्हतोऽहं शरणं प्रतिपन्न**स्तानाश्रित इत्यर्थः, एतेन कालत्रयभाविनोऽपि जिना गृहीतास्तथा च –

**"सत्तरिसयमुक्कोसं वीस जहन्नेण वट्टमाणजिणा ।**
**तीयाऽणागयकालेणं ता सव्वे वि गहिया उ"** ।। [ ] ।।२१।।

अथ कृताऽर्हत्शरणो विशेषेण तेषां नमस्कारमाह –

**उज्झियजर-मरणाणं समत्तदुक्खत्तसत्तसरणाणं ।**
**तिहुयणजणसुहयाणं [३] अरहंताणं नमो ताणं ।।२२।।**

**उज्झितजरामरणेभ्यः समस्तदुःखार्त्तसत्त्वशरणेभ्यः ।**
**त्रिभुवनजनसुखदेभ्योऽर्हद्भ्यो नमस्तेभ्यः ।।२२।।**

जरामरणकारणकर्मरहितत्वाद**उज्झितानि** त्यक्तानि **जरामरणानि** यैस्ते **तेभ्यः**, समाप्तानि सम्पूर्णानि समस्तानि वा यानि दुःखानि तैरार्त्ता रूता वा पीडितास्ते च ते सत्त्वाश्च **समाप्तदुःखार्त्तसत्त्वाः समस्तदुःखार्त्तसत्वाः** वा तेषां **शरण्यास्तेभ्यः** । तथा **त्रिभुवनजनानां सुखं** ददतीति ते, तथा **तेभ्यः**, **"भगवंति वद्धमाणे तिलुक्कसुहावहे जाए"** इति वचनात्, **"छट्ठी विभत्तीइ भन्नइ चउत्थी"** इति प्राकृतबलात् सर्वत्र चतुर्थ्यर्थे षष्ठी, तेन **तेभ्योऽर्हद्भ्यो नमः** नमस्कारोऽस्तु । यतोऽर्हन्नमस्कारस्य महत्पुण्यहेतुत्वात् । उक्तञ्च -

[अ]**"अरहंतनमुक्कारो, जीवं मोएइ भवसहस्साओ ।**
**भावेण कीरमाणो, होइ पुणो बोहिलाभाए"** ।। [आव. नि. ९२३] इत्यादि ।।२२।।

अथ यथाविधि द्वितीयं शरणं करोति तथा तदाह –

**[४] अरहंतसरणमलसुद्धिलद्धपरिसुद्धसिद्धबहुमाणो ।**
**पणयसिरिरइयकरकमलसेहरो सहरिसं भणइ ।।२३।।**

१. निजयश एव शशिधरो निजयशशशिधरो, निजयशशशधरस्तेन-ड२, ड, ल, ड३ । निजयश एव शशधरो निजयशः शशधरस्तेन इति पाठोऽवचूर्याम् । २. न चान्तो इति अशुद्धः पाठः ड, ड२,ड३, ल । न आदि नवांतोऽवचूर्याम् । R-परि-२ ।
३. अरिहंताणं-ड, ४. अरिहंत-ड, S-परि-२ ।

**अर्हत्छरणमलशुद्धिलब्धपरिशुद्धसिद्धबहुमानः ।**
**प्रणतशिरोरचितकरकमलशेखरः सहर्षं भणति ।।२३।।**

**अर्हच्छरणेन** या **मलस्य** कर्मरजसः **शुद्धि**स्तया **लब्धः परिशुद्धो** निर्मलः **सिद्धान्** प्रति **बहुमानो** भक्तिर्येन स तथा, किम्भूतः ? **प्रणतं** भक्तिवशान्नम्रीभूतं **यच्छिर**स्तत्र **रचितः** कृतः **करकुड्मल** एव **शेखरो** येन स तथा, **सहर्षं** सानन्दं यथा भवत्येवं **भणति** ।।२३।।

यच्चायं भणति, तद् गाथाषट्केनाऽऽह-

**कम्मट्ठक्खयसिद्धा साहावियनाण-दंसणसमिद्धा ।**
**सव्वट्ठलद्धिसिद्धा ते सिद्धा हुंतु मे सरणं ।।२४।।**

**कर्माष्टकक्षयसिद्धाः स्वाभाविकज्ञानदर्शनसमृद्धाः ।**
**सर्वार्थलब्धिसिद्धास्ते सिद्धा भवन्तु मम शरणम् ।।२४।।**

**कर्माष्टकक्षयेण सिद्धाः** ते सिद्धाः प्रसिद्धास्ते च तीर्थसिद्धादिभेदेन पञ्चदशधा । पुनः कथम्भूताः ? **स्वाभाविके** निरावरणे अनवच्छिन्नप्रवाहे ये **ज्ञान-दर्शने** ताभ्यां **समृद्धाः** स्फीतिमन्तः । तथा च –

T"**असरीरा जीवप्राणा**[१]**, उवउत्ता दंसणे य नाणे य ।**
**सागारमणागारं, लक्खणमेयं तु सिद्धाणं" ।।**
U"**केवलनाण(णु)वउत्ता, जाणंती सव्वभावगुणभावे ।**
**पासंति सव्वओ खलु, केवलदिट्ठीहिंऽणंताहिं" ।।** [आव. नि. ९७७-९७८]

तथा अर्थ्यन्तेऽभिलष्यन्ते इत्यर्थाः, तेषां लब्धयः प्राप्तयः । **सर्वाश्च** ता **अर्थलब्धयश्च**, कृतकृत्यत्वात् सर्वार्थलब्धयो दानाद्याः **सिद्धा** निष्पन्ना येषां ते तथा । उक्तञ्च –

**"सिद्धाणि सव्वकज्जाणि जाण न य से असाहियं किंचि ।**
**विज्जासुहइच्छाई तम्हा सिद्ध त्ति से सद्दो" ।। [**

**ते सिद्धा मम शरणं भवन्तु** इत्यर्थः ।।२४।।

१. जीवघणा-ड, T-U-परि-२ ।

**तियलोयमत्थयत्था परमपयत्था अचिंतसामत्था ।**
**मङ्गलसिद्धपयत्था सिद्धा सरणं सुहपसत्था ।।२५।।**

**त्रैलोक्यमस्तकस्थाः परमपदस्था अचिन्त्यसामर्थ्याः ।**
**मङ्गलसिद्धपदार्थाः सिद्धाः शरणं सुखप्रशस्ताः ।।२५।।**

**त्रैलोक्यस्या**धस्तिर्यगूर्द्ध्वलोकलक्षणस्य चतुर्दशरज्ज्वात्मकलोकस्य **यन्मस्तकं** सर्वोपरिवर्त्तिस्थानं पञ्चचत्वारिंशल्लक्षविस्तीर्णमीषत्प्राग्भाराख्यं सिद्धिक्षेत्रम्, तस्याऽप्युपरितनयोजनस्य योऽसौ क्रोशस्तस्याऽपि य षड्भागरूप आकाशदेशस्तत्र तिष्ठन्तीति । उक्तञ्च –

**"पणयाललक्खजोयण विक्खंभा सिद्धसिलफलिह विमला ।**
**तदुवरिगजोयणंते, लोगंतो तत्थ सिद्धठिई"** ।। [बृहत्संग्रहणी ५५] इति,

तथा – [v]"❖**ईसीपब्भारगए उवरि खलु, जोयणस्स जो कोसो ।**
**कोसस्स य छब्भाए, सिद्धाणोगाहणा भणिया"** ।। [आव. नि. ९६५] इति ।

तथा **परमपदं** मुक्तिपदं तदर्थत्वात् ।

निशिततरवारिधाराचङ्क्रमणकल्पचारित्रादिकष्टकलापस्तत्र **तिष्ठन्तीति**[१] ते तथा । तथा अनन्तचतुष्टयोपेतत्वात् **अचिन्त्यसामर्थ्यं** जीवशक्तिविशेषो येषां ते तथा, तथा दुष्टाष्टप्रबल-[२]कर्मारिप्रविजयेन प्रवरशिवपुरप्रवेशतो **मङ्गलरूपाः सिद्धाः** सम्पन्नाः **पदार्थाः** येषां ते तथा, अथवा सांसारिकदुःखविरहितं मङ्गलभूतं यत् सिद्धिपदं तत्र तिष्ठन्तीति ते तथा, **ते सिद्धाः शरणं** भवन्तु । पुनः कथम्भूताः ? निस्तीर्णसर्वदुःखजातिजरामरणत्वादाबाधारहितत्वाञ्च **सुखेन** मुक्तिप्रभवेन **प्रशस्ताः** अव्याकुलाः । तथा च –

[w]"**निच्छिन्नसव्वदुक्खा, जाइजरामरणबंधणविमुक्का ।**
**अव्वाबाहं सुक्खं, अणुहवंति सासयं सिद्धा"** ।। [आव. नि. ९८८]

इति प्रशस्तसुखा इत्यर्थः ।।२५।।

---

❖ ईसीपब्भाराए सीआए जोअणंमि जो कोसो । आव.हा.वृत्तौ गाथा-९६५ पूर्वार्धः । १. ति तथा - ड२, ड३, २. कर्मरिपुवजयेन-ड, v, w-परि-२ ।

**मूलक्खयपडिवक्खा अमूढलक्खा सजोगिपच्चक्खा ।**
**साहावियत्तसुक्खा सिद्धा सरणं परममुक्खा ।।२६।।**

**मूलोत्खातप्रतिपक्षा अमूढलक्षाः सयोगिप्रत्यक्षाः ।**
**स्वाभाविकात्तसुखाः सिद्धाः शरणं परममोक्षाः ।।२६।।**

**मूलस्य** संसारहेतुकर्मबन्धमूलस्य मिथ्यात्वा-ऽविरति-कषाय-योगरूपशत्रुसङ्घातस्य [उत् प्राबल्येन] **क्षये** कर्तव्ये **प्रतिपक्षा** इव वैरिण इव तज्जयं कृतवन्त इत्यर्थः, **मूलोत्खातकर्मप्रतिपक्षाः** वा, अथवा केवलज्ञानात्मकत्वाज्जीवस्य **मूलं** निर्मलता केवलज्ञानं तस्य **क्षयः** कर्मभिराच्छादनम्, तस्य पुनः प्रकटीकरणस्वरूपस्थापने **प्रतिपक्षा** वैरिण इत्यर्थः । तथा लक्ष्ये द्रष्टव्यपदार्थे न मूढा [1]**अमूढलक्ष्याः** सदोपयुक्तत्वात्तेषाम् तथा [2]शेषज्ञानिनामविषयत्वात् **सयोगिनामेव** सयोगिकेवलिनां **प्रत्यक्षा** दृश्याः । तथा सदाऽपि सुखसम्पूर्णत्वेन तृप्तत्वात् **स्वाभाविकमात्तं** गृहीतं **सुखं** यैस्ते । तथा च –

[x]"**इय सव्वकालतित्ता, अउलं निव्वाणमुवगया सिद्धा ।**
सासयमव्वाबाहं, चिट्ठंति सुही सुहं पत्ता" ।। [आव. नि., ९८६]

पुनः किं विशिष्टाः ? परमः प्रकृष्टो अत्यन्तविगमात् कर्मभिः सह मोक्षो वियोगो विकटीभावो येषां ते तथा यदि वा परममोक्षयोगात्**परममोक्षाः** ते **सिद्धाः शरणं** भवन्तु इत्यर्थः ।।२६।।

**पडिपिल्लियपडणीया समग्गझाणग्गिदड्ढभवबीया ।**
**जोईसरसरणीया सिद्धा सरणं समरणीया ।।२७।।**

**प्रतिप्रेरितप्रत्यनीकाः समग्रध्यानाग्निदग्धभवबीजाः ।**
**योगीश्वरस्मरणीयाः [शरणीयाः] सिद्धाः शरणं स्मरणीयाः ।।२७।।**

कर्मोपाधियुक्तत्वात् **प्रतिप्रेरिताः** क्षिप्ता अनादृताः **प्रत्यनीकाः** शत्रवो यैः [3]समशत्रुमित्रत्वात् । यदि वा **प्रतिप्रेरिता** निराकृताः [4]**प्रत्यनीका** अभ्यन्तरशत्रवो [5]रागादयो यैस्ते, तथा **समग्रं** सम्पूर्णं यद् **ध्यानं** परमलयः तदे**वाग्निः**, यदाह –

१. लक्षाः-ड३, २. शेषज्ञानानाम्-ड२, ३. समशत्रुसिद्धत्वात् ल, ड२, ड३, ४. प्रत्यनीका अभावशत्रवो ड, ५. रागाद्याः ड, x-परि-२ ।

Y"जह चिरसंचियमिंधणमनलो पवणसहियो दुयं दहइ ।
तह कम्मिंधणममियं, खणेण झाणानलो डहइ" ।। [आव. नि. ध्या. श. १०१]

तेन **दग्धं** भस्मसात् कृतं [1]**भवबीजं** ज्ञानावरणीयादि यैस्ते, तथा **योगीश्वरै**र्गणधरैश्छद्मस्थतीर्थकरैर्वा तत्सुखमभिलाषुभिः **स्मरणीया** ध्येयाः शरणीया वाऽनुगन्तव्याः शरणत्वेन ते [2]एव गुणगरिष्ठाः **सिद्धाः शरणत्वेन** त्रिसन्ध्यमपि **स्मरणीया** इत्यर्थः ।।२७।।

**पावियपरमाणंदा गुणनीसंदा विदिण्णभवकंदा ।**
**लहुईकयरविचंदा सिद्धा सरणं खवियदंदा ।।२८।।**

**प्रापितपरमानन्दाः गुणनिष्यन्दाः विदीर्णभवकन्दाः ।**
**लघुकीकृतरविचन्द्राः सिद्धाः शरणं क्षपितद्वन्द्वाः ।।२८।।**

सदा मुदितत्वात् **प्रापितः** आत्मजीवं प्रति ढौकितः, प्राकृतत्वाद् वा प्राप्तः, **परमानन्दः** परमोल्लासविशेषो यैस्ते, तथा **गुणानां** ज्ञान-दर्शन-चारित्ररूपाणां परिपाकप्राप्तत्वा**न्निष्यन्दः** सारो येषां ते तथा, तथा कर्मोच्छेदनात् **विदीर्णो** दारितः स्फाटितो **भवस्य** संसारस्य **कन्दो** यैस्ते तथा, तथा केवलोद्योतेन **लघुकीकृतौ** अल्पप्रभावीकृतौ **रविचन्द्रौ** यैर्यतस्तदुद्योतस्य योजनप्रमितत्वात्, तथाहि –

"रविणो उदयत्थंतर चउनवइसहस्स पणसय छव्वीसा ।
बायालसट्ठिभागा कक्कडसंकंति दियहंमि" ।। [बृहत्संग्रहणी ११६]

एतत्, जम्बूद्वीपमाश्रित्योक्तम्, तथा –

Z"लक्खेहिं इक्कवीसाइ, साइरेगेहिं पुक्खरद्धम्मि ।
उदए पिच्छंति नरा, सूरं उक्कोसए दिवसे" ।। [वि. आ. भा. ३४५] इति ।।

सिद्धास्तु केवलज्ञानज्योतिषा लोकमपि प्रकाशयन्तीत्यर्थः । तथा निष्कषायत्वात् **क्षपितं** क्षयं नीतं **द्वन्द्वं** सङ्ग्रामो यैस्ते तथा, ते एवंविधाः **सिद्धाः शरणं** भवन्तु ।।२८।।

**उवलद्धपरमबंभा दुल्लहलंभा विमुक्कसंरंभा ।**
**भुवणघरधरणखंभा सिद्धा सरणं निरारंभा ।।२९।।**

१. स च बीजम् ड२, ड३, २. एवं-ड२, ड३ । Y-Z-परि-२ ।

**उपलब्धपरमब्रह्माण:, दुर्लभलाभा विमुक्तसंरम्भाः ।**
**भुवनगृहधरणस्तम्भाः सिद्धाः शरणं निरारम्भाः ।।२९।।**

उपलब्धं प्राप्तं परमब्रह्मज्ञानं यैस्ते **उपलब्धपरमब्रह्माण:** अवगतकेवला इत्यर्थ: । तथा सर्वलाभाग्रेसरत्वात् तल्लाभस्य **दुर्लभो लाभो** मुक्तिप्राप्तिलक्षणो येषां ते तथा, दुर्लभलाभत्वमेवाऽऽविर्भाव्यते[१] । तथाहि –

**"जस्सट्ठाए कीरइ नग्गभावे, मुंडभावे, [२]अन्हाणयं अदंतवणयं,**
**केसलोओ, बंभचेरवासो, अच्छत्तगं, [३]अणोवाहणगं, भूमिसिज्जा, फलहसिज्जा,**
**कट्ठसिज्जा, परघरपवेसो, लद्धावलद्धं, परेहिं हीलणाओ निंदणाओ,**
**खिंसणाओ, गरिहणाओ, तालणाओ, तज्जणाओ, परिहवणाओ, पव्वहणाओ,**
**उच्चावया [४]गामकंटगा, बावीसं परीसहोवसग्गा अहियासिज्जंति, तमट्ठं आराहियन्ते"** । [ ]

तथा **वियुक्तः** परित्यक्त इतिकर्त्तव्यता पदार्थेषु **संरम्भ** आटोपो यैस्ते, निष्पन्नसर्वप्रयोजनत्वात् तेषाम्, तथा **भुवनं** त्रिभुवनम्, तदेव **गृहं** तस्य **धरणमवष्टम्भनम्**, तत्र **स्तम्भा इव** स्तम्भा, भुवनस्य सिद्धशरणप्रतिपन्नलोकस्य[५] दुर्गतौ पततः स्थिराऽऽधारभूतत्वात् तेषामित्यर्थः, तथा **निर्गता** बहिर्भूता **आरम्भेभ्यः** [६]कृत्यप्रयोजनेभ्यो ये ते तथा, ते एवंस्वरूपाः **सिद्धा** मम **शरणमालम्बनं** भवन्तु इत्यर्थः । एतेन सिद्धाख्यं द्वितीयं शरणमभिहितम् ।।२९।।

इदानीं साधुशरणं प्रतिपित्सुर्यद् विधत्ते तदाह -

**सिद्धसरणेण नयबंभहेउसाहुगुणजणियअणुराओ ।**
**मेइणिमिलंतसुपसत्थमत्थओ तत्थिमं भणइ ।।३०।।**

**सिद्धशरणेन नयब्रह्महेतुसाधुगुणजनितानुरागः ।**
**मेदिनीमिलत्सुप्रशस्तमस्तकः तत्रेदं भणति ।।३०।।**

नया नैगमादयस्तैरुपलक्षितं यद् ब्रह्म श्रुतज्ञानं द्वादशाङ्गम्, **'नयभंगपमाणगमगहण'**मिति वचनात् तस्य नयब्रह्मणो ये हेतवः कारणभूताः साधुगुणा [इति **नयब्रह्महेतुसाधुगुणाः**] विनयादयः । विनयगुणसम्पन्नस्यैव येनाऽन्योन्यगुणाऽवाप्तिस्तथाहि –

१. आविभाव्यते-ल, २. अहन्हाणयं-ड२, ड३, ३. वाहणगा-ड, ४. कंटका-ल, ५. प्रतिपन्नलोकस्य-ड, ६. कृतप्रयो०-ल, ड२।

[1,2,3] "विनयफलं शुश्रूषा गुरूशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिर्विरतिफलं चाऽऽश्रवनिरोधः ।।
संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् ।
तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ।।
योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।
तस्मात् कल्याणानां सर्वेषां भाजनं विनयः" ।। [प्रशमरति ७२-७३-७४]

किञ्च –

"विणयज्जुयस्स गुणिणो दिंति सुयं सूरिणो किमच्छरियं ।
को वा न देइ भिक्खं अहवा सोवन्निए थाले" ।। [ ] इत्यादि

तेषु नय-ब्रह्म-हेतुषु साधुगुणेषु जनित उत्पादितो अनुरागो बहुमानो यस्य सः – **नयब्रह्महेतु-साधुगुणजनितानुरागः** शरणप्रतिपत्ता, केनाऽस्याऽनुरागः कृतः ? इत्याह – **सिद्धशरणेन** । तथा मेदिन्यां मिलत् लुठत्सुप्रशस्तं भक्तिभरभासुरं मस्तकमुत्तमाङ्गं यस्य स **मेदिनीमिलत्सुप्रशस्तमस्तकः** गुरुपादाऽर्पितमस्तक इत्यर्थः,' स एवंविधः साधुगुणानुरागी भूतलन्यस्तमस्तकः इत्तत् प्रस्तावेट **इदं** वक्ष्यमाणं **भणति** ।।३०।।

यदयमाचष्टे तन्नवभिर्गाथाभिराह –

**जियलोयबंधुणो कुगइसिंधुणो पारगा महाभागा ।**
**नाणाइएहिं सिवसुक्खसाहगा साहुणो सरणं ।।३१।।**

**जीवलोकबन्धवः कुगतिसिन्धोः पारगा महाभागाः ।**
**ज्ञानादिकैः शिवसुखसाधकाः साधवः शरणम् ।।३१।।**

**जीवलोकस्य** प्राणीवर्गस्य षड्निकायात्मकस्य **बान्धवा**[1] इव बान्धवा ये वर्त्तन्ते तेषां त्रिविधं त्रिविधेन रक्षाकरणात्, तथा कुगतिरेव सिन्धुः **कुगतिसिन्धुर्**नदी समुद्रो वा, तस्यास्तस्य वा, पारं तीरं गच्छन्तीति **पारगास्तीर**वर्त्तिनः, कटाक्षीकृतसुगतित्वात्, यदाह –

[4] "आराहणोवउत्तो कालं काऊण सुविहिओ सम्मं ।
उक्कोसं तिन्नि भवे गंतूणं लहइ निव्वाणं" ।। [आतुरप्रत्या. ६१] इति,

1,2,3-4-परि-२ । १. बान्धवा वर्त्तन्ते येषां-ल, ड-२, ड ।

तथा भागो अत्यन्तशक्ति **महान्भागः**, अतिशयविशेषो येषां ते तथा, तथा **ज्ञानादिभिरेव** ज्ञान-दर्शन-चारित्रैः शिवसुखं मोक्षसुखं साधयन्तीति निर्वर्त्तयन्ति ये ते **शिवसुखसाधकाः**, एतेन –

[शालिनीवृत्तम्]

**"मृद्वी शय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे ।**
**द्राक्षाखण्डं शर्करा [१]चार्धरात्रे, [२]मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः"** ।।

[षड्दर्शन० ४ बृह.वृ.] इति, तथा ।

**"हत्वा जीवसहस्राणि, कृत्वा पापशतानि च ।**
**स्नात्वा गङ्गाजले पूते, यान्ति जीवाः शिवालयम्"** ।। [गरुडपुराण-२५]

इत्यादिना यदुच्यते तीर्थान्तरीयैस्तन्निरासः कृतः । ते एवंविधाः **साधवो** मम **शरणं** भवन्तु ।।३१।।

अथ साधवो ये प्रत्यक्षज्ञानादिसम्पदुपेतास्तान् सार्धगाथया आह –

**केवलिणो परमोही वि[३]उलमई सुयहरा जिणमयम्मि ।**
**आयरिय-उवज्झाया ते सव्वे साहुणो सरणं ।।३२।।**

**केवलिनः परमावधयो विपुलमतयः श्रुतधरा जिनमते ।**
**आचार्योपाध्यायास्ते सर्वे साधवः शरणम् ।।३२।।**

केवलमसहायं मत्यादिज्ञानाऽनपेक्षं सर्वद्रव्यसर्वपर्यायादिविषयं ज्ञानं विद्यते येषां ते **केवलिनः**, तथा च –

[5]**"कसिणं [४]केवलकप्पं, लोगं जाणंति तह य पासंति ।**
**केवलचरित्तनाणी, तम्हा ते केवली होंति"** ।। [आव० नि. १०९१]

ते च सामान्येन यद्यप्यवध्यादयोऽपि भण्यन्ते, तथापीह सयोगिकेवलिनो ग्राह्याः, अन्येषामग्रतो भणिष्यमाणत्वात्, ते च उत्कृष्टकाले नवकोटीप्रमाणाः प्राप्यन्ते, जघन्यतस्तु कोटीद्वयम् ।

**'परमोहि'**त्ति, अवधिर्मर्यादा रुपिद्रव्येषु परिच्छेदकतया प्रवृत्तिरुपादुपलक्षितं ज्ञानमप्यवधिः, परमश्चासावधिश्च परमावधिः, स च क्षेत्रतो लोकप्रमाणाऽसङ्ख्येयालोकखण्डप्रमाणः, कालतोऽस-

---

१. रात्रौ-ड२, ड३, २. मोक्षश्चान्त्ये-ड, ल, ड२, ड३, ३. विमलमई-ल । ४. केवलिकप्पं-ड२, ड३, 5-परि-२ ।

ङ्ख्येयोत्सर्पिण्यवसर्पिणीविषयः, द्रव्यतो रूपिद्रव्यप्रभृतियावत्परमाणुदर्शी, भावतः [1]सामान्यतोऽनन्तपर्यायपरिच्छेदको विशेषतः परमाणोरपि चतुष्पर्यायनिर्णयकारी, परमावधिश्चाऽवश्यमन्तर्मुहूर्तेन केवली भवति ।

**"परमोहिन्नाणविओ केवलमंतोमुहुत्तेणं"** (वि. आ. भा. ६८९) ति वचनात्, तद् योगात् साधवोऽपि परमावधयः, [2]उत्कृष्टावधिसाधुभणनेन जघन्यमध्यमावधयोऽप्यन्तर्भाविता ज्ञेयाः ।

**'विउलमई'** त्ति मननं मतिः, विपुला मति येषां ते विपुलमतयः, अत्राऽपि विपुलमतिभणनेन ऋजुमतयोऽप्यन्तर्भाविताः, एतौ च मनुष्यक्षेत्रान्तर्वर्तिसंज्ञिपञ्चेन्द्रियमनोद्रव्यविषयौ, तथाहि –

**"तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमओ ।**
**समयक्खित्तब्भंतरसन्निमणोगयपरिन्नाणं"** ।। [वि. आ. भा. ८१२]

तथा अतीते भविष्यति च पल्योपमाऽसङ्ख्येयभागरूपे काले येषां मनोद्रव्याणामतीताऽनागताश्च चिन्तितानुगुणाः पर्यायास्तांश्चेति । विपुलमतिः सम्पूर्णसमयक्षेत्रम्, ऋजुमतिस्तु सार्द्धाङ्गुलद्वयहीनं पश्यति। ऋजुमतिः सामान्येन विपुलमतिरशेषविशेषैश्च, तथाहि -

**"रिजु सामन्नं तम्मत्तगाहिणी रिउमई मणोनाणं ।**
**पायं विसेसविमुहं, घडमित्तं चिंतियं मुणइ"** ।।
**"विउलं वत्थुविसेसेणमाणं, तग्गाहिणी मई विउला ।**
**चिंतियमणुसरइ घडं, पसंगओ पज्जवसएहिं"** ।। [वि. आ. भा. ७८४-७८५] इति,

तथा श्रुतं कालिकोत्कालिकाङ्गप्रविष्टाऽनङ्गप्रविष्टादिलक्षणं धरन्ति, योग्यशिष्यप्रदानेन तस्याऽवस्थितिं कुर्वन्ति इति **श्रुतधराः** प्रवचनव्याख्याननिपुणाः, तथा च –

**"सुत्तत्थहेउकारणवागरणसमिद्धचित्तसुयधारी ।**
**पोराणदुद्धरधरो सुयरयणनिहाणमिव पुन्नो"** ।। [व्यव. भा. १४९५]
**"धारय-गुणिय-समीहिय-निज्जवणा-विउलवायण समिद्धो ।**
**पवयणकुसलगुणनिही पवयणाऽहियनिग्गहसमत्थो"** ।। [व्यव. भा. १४९६]

ते एवम्भूताः श्रुतधराः ।

१. सामान्येन-ड२, ड३, २. अवधिज्ञानभणनेन-ल, ड२, ड३, 6-परि-२ ।

तथा आचर्यते आसेव्यते ज्ञानार्थिभिरित्याचार्यः, उपेत्याधीयते यस्मादित्युपाध्याय इत्यनया व्युत्पत्या लौकिकाऽऽचार्योपाध्यायाः कलाचार्यादयोऽपि लभ्यन्त इति, तद् व्यवच्छेदाय आह - **'जिणमयम्मि' त्ति** जिनमते जिनशासने ये **आचार्योपाध्यायाः,** एतेन मुख्यानां ग्रहणात् प्रवर्तक-स्थविर-गणावच्छेदिनोऽपि ज्ञातव्याः । तत्र –

**"पञ्चविधाचारकर्त्ता, प्रणेता च सूत्रार्थोभयवेदी ।**
**[1]गच्छालम्बनभूतः, गाम्भीर्यादिलक्षणसारः"** ।। [ ]

उपाध्यायादिनिक्षिप्त[2]गच्छादिभारः, अर्थ[3]व्याख्याननिरतः प्रशस्तदेशादिगुणवानाचार्यः ।

तथा ज्ञान-दर्शन-चारित्रसम्पन्नः, सूत्रार्थोभय[4]निष्पन्नः, आचार्योच्छासनिकः, द्वादशाङ्गसूत्राऽध्यापकः उपाध्यायः ।

तथा तपःसंयमव्यापारेषु [5]योग्येषु शिष्येषु [6]प्रवर्त्तनासहनिवर्त्तनादक्षः, गणतप्तिकरणप्रवणः प्रवर्त्तकः । [7]प्रवर्त्तकव्यापारितार्थेषु सीदमानान् साधून् स्थिरीकुर्वन्तः स्थविराः ।

[8]आचार्योपदिष्टशिष्यादिप्रयोजनोद्धावेन [xxxनोद्धावनेन] क्षेत्रोपधिसम्पादनेन गणमोदी सूत्रार्थवेदी गणावच्छेदी । तथाऽत्र –

**"इक्कारसंग सुत्तधारगा नवमपुव्वकडजोगी ।**
**बहुस्सुय बहुआगमिया, सुत्तत्थविसारया धीरा"** ।। [ ]
**"एयगुणोववेया, सुयनिहसा नायगा महाणस्स ।**
**आयरिय उवज्झाया, पवत्ति थेरा अणुन्नाया"** ।। [ ]

**ते** च **सर्वे** केवलिप्रभृति**साधवो** मम **शरणं** भवन्त्वित्यर्थः ।।३२।।

**चउदस-दस-नवपुव्वी दुवालसिक्कारसंगिणो जे य ।**
**जिणकप्पाऽहालंदिय परिहारविसुद्धिसाहू य ।।३३।।**
**चतुर्दशदशनवपूर्विणः द्वादशैकादशाङ्गिनो ये च ।**
**जिनकल्पिका यथालन्दिकाः परिहारविशुद्धिकसाधवश्च ।।३३।।**

---

१. गच्छालङ्कारभूतः-ल, ड२, ड३, २. गच्छापभारः ड२, ड३, ३. व्याख्याने निरतः-ल, ४. निपुणः-ल, ड२, ड३, ५. योग्येऽपि-शिष्ये-प्र, ड, ६. प्रवचनमासहनि-ड२, ड३, ७. प्रवर्त्तकव्यापारितार्थसार्थप्रवर्त्तकः, सीदमानः साधुःस्थिरकरणरुचिरः स्थविरः-। ड, ल । प्रवर्त्तकव्यापारितार्थप्रवर्त्तकः...ड२, ड३, ८. शिक्षादिप्रयोजनोद्यावनप्रधावनक्षेत्रो-ड, ड२, ड३ ।

**खीरासव महुआसव संभिन्नस्सोय कुट्ठबुद्धी य ।**
**चारण-वेउव्वि-पयाणुसारिणो साहुणो सरणं ।।३४।।**
**क्षीराश्रवमध्वाश्रवसम्भिन्नश्रोतसः कोष्ठबुद्धयश्च [बुद्धिश्च] ।**
**चारणवैक्रियपदानुसारिणः साधवः शरणम् ।।३४।।**

पूर्वशब्दस्य तृतीयपदस्थस्याऽपि पृथग् योजनात् चतुर्दशसङ्ख्यानि पूर्वाण्युत्पादपूर्वाऽऽग्रायणीय-वीर्यप्रवादा-ऽस्तिप्रवाद-ज्ञानप्रवादा-(सत्यप्रवादा)ऽऽत्मप्रवाद-कर्मप्रवाद-प्रत्याख्याननामधेय-विद्यानुप्रवादाद्यवन्ध्य-प्राणावाय-क्रियाविशाल-लोकबिन्दुसाराभिधेयानि विद्यन्ते येषां ते **चतुर्दश-पूर्विणः** श्रीभद्रबाहुस्वामिन इव, तथा तान्येवाद्यानि दश येषां ते दशपूर्विणः श्यामार्यसूरय इव । ननु चतुर्दशपूर्विणामनन्तरं किमिति त्रयोदश-द्वादशैकादशपूर्विणो विमुच्य दशपूर्विणः प्रतिपादिताः ? उच्यते एते त्रयोऽपि चतुर्दशपूर्विषु विद्यमानेष्वेव विद्यन्ते, न पश्चात् यतोऽन्यानि चत्वार्यपि पूर्वाणि [१]समुदितान्येव व्यवच्छिद्यन्त इति दशपूर्विणोऽभिहिताः, किञ्च एते एव प्रमाणपुरुषा इति, तथा **नवपूर्विणः** श्रीआर्यरक्षितगुरव इव । तथा **दुवालस** त्ति अङ्गशब्दस्य प्रत्येकमभिसम्बन्धाद् **द्वादशाङ्गिनः** । इह चतुर्दशपूर्विणो द्वादशाङ्गिनश्चैकार्था इति न वाच्यम्, यतो द्वादशतमाङ्गस्य दृष्टिवादलक्षणस्य [२]पञ्चप्रस्थानात्मकत्वात्, तथाहि –

**"परिकम्मं सुत्ताई [३]पुव्वगयाणुगओ चूलियाओ य ।**
**एसो पंच विगप्पो, दिट्ठीवाओ मुणेयव्वो" ।। [ ] इति,**

पूर्वाणि च चतुर्दशाऽपि पूर्वगतमध्ये सन्ति, तानि द्वादशतमाङ्गस्यैकदेशभूतानीति तयोः पृथगर्थसिद्धेः, तथा **एकादशाङ्गिनश्च** ये चाऽस्य भिन्नक्रमार्थत्वात् । ननु अङ्गगाथाप्रस्तावनायां प्रत्यक्षज्ञानिनो दर्श्यन्त इत्युक्तम् । तत्र केवलि-परमावधि-विपुलमतयः प्रत्यक्षज्ञानिन एव । उक्तञ्च –

**"आगमववहारीवज्जणाओ पञ्चक्खनाणिणो एए ।**
**केवलि-मणोहिदंसी चउदस-दसपुव्वी नवपुव्वी" ।। [ ]**

इदानीं ये विशेषानुष्ठानिनो विशेषलब्धिसम्पन्नाश्च तान् सार्धगाथया दर्शयति । जिनकप्पा गाथार्ध-खीरासवमाहु- **'जिणकप्प'** त्ति एकाकित्वनिष्प्रतिकर्मशरीरतया [४]जिनस्येव कल्पो येषां ते जिनकल्पिकाः । तथा च –

१. समुचितानि एव ल, ड२, ड३, २. पञ्चस्थाना-ड२, ड३, ३. पुव्वगयाणुओग-ड२, ड३, ४. जिनस्यैव-ड२,

**"धीबलिया तवसूरा निंती गच्छाउ ते पुरिससीहा ।**
**बलवीरियसंघयणा उवसग्गसहा अभीरू य"** ।। [ ]

तेषामयं विधिः - प्रतिपन्नजिनकल्पो यत्र ग्रामे मासकल्पं चातुर्मासकं वा करिष्यति, तत्र षड्भागान् कल्पयति, ततश्च यत्र भागे एकस्मिन् दिने गोचरचर्यायां हिण्डति, तत्र सप्तमदिवसे पर्यटति, एषणादिविषयं मुक्त्वा न केनाऽपि सार्धं जल्पति, एकस्यां वसतौ यद्यपि उत्कृष्टतः सप्त जिनकल्पिका वसन्ति, तथापि परस्परं न भाषन्ते ।

**"[1]अममत्त अपरिकम्मा नियमा जिणकप्पियाण वसहिओ ।**
**एमेव या वराणं मूत्तूण पमज्जणं इक्कं"** ।। [वि.आ.भा. ७ वृ.]

यद्युपविशति तदा नियमादुत्कट एव, न तु निषद्यायाम्, औपरिग्रहिकोपकरणस्यैवाभावात्, प्रतिपद्यमानकः सामायिकच्छेदोपस्थापनयोः, पूर्वप्रतिपन्नः सूक्ष्मसम्परायथाख्यातचारित्रयोरुपशम-श्रेण्यामवाप्यते । प्रतिपद्यमानानामुत्कृष्टतः शतपृथक्त्वम्, पूर्वप्रतिपन्नानां सहस्रपृथक्त्वं [2]जिनानाम् । जिनकल्पिकाः [3]प्रायोऽपवादं नासेवते, जङ्घाबलक्षीणस्त्वविहरमाणोऽप्याराधक एव, आवश्यकी-नैषेधिकी-मिथ्यादुष्कृत-गृहिविषय-पृच्छोपसम्पल्लक्षणाः पञ्च एव - [सामाचार्यः] [अन्ये त्वाहुः तिस्र एव] आरामादिनिवासिन ओघतः [4]पृच्छादीनामप्यभावात्, लोचं चाऽसौ नित्यमेव करोति, विहारो भिक्षा च तृतीयपौरुष्यामेव ।

**अहालंदिय त्ति** यथालन्दिकाः, तेषां स्वरुपमिदम्-उदकार्द्रः करो यावता कालेन शुष्यति, तत आरभ्योत्कृष्टतः [5]पञ्चरात्रिन्दिवलक्षणस्य उत्कृष्टलन्दस्याऽनतिक्रमेण चरन्तीति यथालन्दिकाः, पञ्चको गणोऽमुं कल्पं प्रतिपद्यते, ग्रामं च गृहपङ्क्तिरूपाभिः षड्भिर्वीथीभिर्जिनकल्पिकवत् परिकल्पयन्ति, किन्त्वेकैकस्यां वीथ्यां पञ्च पञ्च दिनानि पर्यटन्ति [6]इत्युत्कृष्टलन्दचारिणो यथालन्दिका उच्यन्ते, एते च प्रतिपद्यमानका जघन्यतः पञ्चदश भवन्त्युत्कृष्टतः सहस्रपृथक्त्वम्, पूर्वप्रतिपन्नास्तु जघन्यत उत्कृष्टतश्च कोटिपृथक्त्वं भवति ।

तथा **[7]परिहारविसुद्धिसाहु य** त्ति, परिहारविशुद्धिकाश्च ते साधवश्च [8]परिहारविशुद्धिकसाधवः, ते च द्विधा निर्विशमानका निर्विष्टकायिकाश्च, तत्र यथोक्ततपस आसेवकत्वात् निर्विशमानका उच्यन्ते, अनुपरिहारिका विहितवक्ष्यमाणतपसो निर्विष्टकायिका इति, तत्र नवानामयं कल्पो भवति, ग्रीष्म-शिशिरवर्षासु पृथक् पृथक् जघन्य-मध्यमोत्कृष्टभेदं तपः कुर्वन्ति, तत्र ग्रीष्मे चतुर्थषष्ठाष्टमानि शिशिरे

१. अपमत्त-डर, २. जिनकल्पिकानामिति-टि०, ३. अपवादमासेवते-ड, ४. नामप्यन्तर्भावात्-ड, ड३, ५. दिवस-ड३, ६. लन्दभारिणो, ७. विसुद्ध-डर, ड३, ८. विशुद्धसाधवः-डर ।

षष्ठाष्टमदशमानि, वर्षासु अष्टमदशमद्वादशमानि, पारणके चाऽऽचाम्लम्, पञ्चानां भिक्षाणां यथा द्वयोरभिग्रहः, तत्र प्रथमं चत्वारो यथोक्तं तपः कुर्वन्ति, चत्वारोऽनुपहारिकत्वमेकश्च कल्पस्थिततत्वम् । एते च पञ्चाऽपि प्रतिदिनं षण्मासान् यावत् आचाम्लभोजिनः, षण्मासानन्तरं व्यूढतपसो [ऽनुपारिहारिकत्वम्,] अनुपारिहारिकाश्च पारिहारिकत्वम्, कल्पस्थस्तथैवास्ते, यावद् द्वितीयषण्मासस्ततो द्वितीयषण्मासानन्तरं कल्पस्थः तपः करोति, तेषां व्यूढतपसामष्टानां मध्यादेकः कल्पस्थो भवति, सप्ताऽनुपारिहारिका भवन्ति, अष्टावपि षण्मासं यावत् प्रतिदिनमाचाम्लभोजिनः, अष्टादशभिर्मासैः पूर्णकल्पो भवति, कल्पसमाप्तौ पुनस्तमेव वा जिनकल्पं वा प्रतिपद्यन्ते, गच्छं वा समायान्ति, प्रतिपत्तिश्च जिनसमीपे सेवकपार्श्वे वा - किञ्च -

[7]**"सेसा उ निययभत्ता पायं भत्तं च ताणं आयामं ।**
**होइ नवण्हं वि नियमा न कप्पए सेसयं सव्वं"** ।। [वि. आ. भा. १२७४]

एते च [१]सहस्रारान्तमेव यान्ति ।।३३।।

तथा **खीरासव** त्ति [२]चीर्णग्रन्थिपर्णकादिविशेषस्य चक्रवर्तिसम्बन्धिनो गोलक्षस्या-र्धार्धक्रमेण पीतगोक्षीरस्य पर्यन्ते, यावदेकस्याः गोः सम्बन्धि यत् क्षीरं तदिह गृह्यते, तदिव यस्य [३]वचनं नवरसमाधुर्यमाश्रवति मुञ्चतीति, स क्षीराश्रवः, तथा च आवश्यकचूर्णिः

**"खीरासवो नाम जहा चक्कवट्टिस्स लक्खो गावीणं,**
**ताणं तं खीरं अद्धद्धस्स दिज्जइ तथा धाउरक्कं एवं खीरासवो भवइ ।**

**महुयासव** त्ति मधुशर्करादि मधुरद्रव्यम्, तद् रसतुल्यं यस्य वचनं स मध्वाश्रवः, उपलक्षणत्वात् सर्पिराश्रवश्च, उक्तञ्च –

[8]**"खीर-महु-सप्पिसाओवमाण वयणा तयासवा हुंति"** । [वि. आ. भा. ७९९ पूर्वार्धः]

**संभिन्नसोय त्ति** ये सर्वैः शरीरावयवैः श्रृण्वन्ति जानन्ति च, [४]भिन्नान् वा चक्रवर्तिस्कन्धावार-बहलकोलाहलजशब्दसन्दोहान् अयमेतस्याऽयमेतस्य [५]इत्यादिव्यक्त्या पृथक् पृथक् व्यवस्थापयन्ति इति सम्भिन्नश्रोतसः । उक्तञ्च–

**"जो सुणइ सव्वओ, मुणइ सव्वविसए य सव्वसोएहिं ।**
**सुणइ बहुए व सद्दे, भिन्ने संभिन्नसोए सो"** ।। [वि. आ. भा. ७८३]

१. सहक्षारान्त मेव पर्यन्ते -ल, ड३, २. पर्णकादिविशेषस्य-ड२, ड३, ३. वचनरसमाधुर्य-ड२, ड३, वचनं रसमाधुर्यम्-ड, ल, ४. भिन्ना-ड, ल, ड२, ड३, ५. व्यक्ता-ड, ल, ड२, 7-8-परि-२ ।

**कुट्ठगबुद्धी य** त्ति नीरन्ध्रधान्यकोष्ठकक्षिप्तधान्यवद् ये सुनिश्चितस्थिरसंस्कारसूत्रार्थास्ते कोष्ठकबुद्धयः । उक्तञ्च –

[४]**"कुट्ठयधन्नसुनिग्गलसुत्तत्था कुट्ठबुद्धिया"** । [वि. आ. भा. ७९९ उत्तरार्धः]

**चारण** त्ति अतिशयचरणाच्चारणास्ते च द्विधा जङ्घाचारणा विद्याचारणाश्च –

**"अइसयचरणसमत्था, जंघाविज्जाहिं चारणा मुणओ ।**
**जंघाहिं जाइ पढमो, नीसं काउं रविकरे वि ।।**
**एगुप्पाएण गओ, रुयगवरमी तओ पडिनियत्तो ।**
**बीएणं नंदिस्सरं, इहं तओ एइ तइएणं ।।**
**पढमेण पंडगवणं, बीयोप्पाएण नंदणं एइ ।**
**एइ इहं तईएणं, जो वि जंघाचारणो होइ ।।**
**पढमेण माणुसुत्तरनगं, स नंदिसरं तु बीएणं ।**
**एइ इहं तईएणं, कयचेइयवंदणो** [❖]**साहू ।।**
**पढमेण नन्दणवणं, बीयुप्पाएण पंडगवणंम्मि ।।**
**एइ इहं तइएणं, जो विज्जाचारणो होइ"** ।। [वि. आ. भा. ७८६-७९०]

तथाऽन्येऽपि बहुप्रकाराश्चारणाः साधवो भवन्ति, तद्यथा - आकाशगामिनः, [१]पर्यङ्काव-स्थानिषण्णाः कायोत्सर्गस्थशरीरा वा पादोत्क्षेपनिक्षेपक्रमाद् विना व्योमचारिणः । केचित् तु जल-फल-पुष्प-पत्र-श्रेण्य-ग्निशिखा-नीहाराऽवश्याय-[२]मेघवारिधारामर्कटतन्तुज्योतिरश्मिपतनायाऽऽ-लम्बनगतिपरिणामकुशला वापी-निम्नगादिजले तज्जीवानविराधयन्तो भूमाविव [३]पादोत्क्षेपनिक्षेप-कुशला भुव उपरि चतुरङ्गुलप्रमिते आकाशे विक्षेपोत्क्षेपनिपुणा जङ्घाचारणा इति ।

**वेउव्वि** त्ति वैक्रियलब्धिमन्तः साधवस्तेषां नानारुपैरसङ्ख्येयद्वीपसमुद्राभरणविषया वैक्रियशक्तिर्भवति । जम्बूद्वीपं तु स्त्र्यादिरूपैर्बिभ्रत्यपि ।

**पयाणुसारिणो** त्ति ये पूर्वापरपदानुसारतस्त्रुटितपदमनुसरन्ति, पूरयन्ति इति सूत्रार्थः । ते पदानुसारिणो वज्रस्वामिन इव, उक्तञ्च –

१. निखिन्ना-ड, ल, ड२, ड३, २. सद्यवा-ड, ३. पादोत्क्षेपकुशला-ड२, ❖ इहई पाठो वि.आ.भा. मुद्रिते । ४-परि-२ ।

[81]"जो सुत्तपएण बहुं सुयमणुधावइ पयाणुसारी सो" । [वि.आ.भा. ८०० पूर्वार्धः]

इह च येऽतिशयर्द्धिसम्पन्नाः साधवो नोक्तास्तेऽप्युपलक्षणत्वाज्ज्ञेयाः । एते च ये जिनकल्पिकादयः पदानुसारिपर्यन्तास्ते **साधवः** शरणं [1]भवन्तु इति सार्धगाथार्थः ।।३४।।

अथ [2]सर्वसाधारणगुणा ये साधवस्तान्गाथापञ्चकेनाऽऽह –

**उज्झियवइरविरोहा निच्चमदोहा पसंतमुहसोहा ।**
**अभिमयगुणसंदोहा हयमोहा [गयमोहा] साहुणो सरणं ।।३५।।**

**उज्झितवैरविरोधा नित्यमद्रोहाः प्रशान्तमुखशोभाः ।**
**अभिमतगुणसन्दोहा हतमोहाः साधवः शरणम् ।।३५।।**

चिरकालं प्रभूतकालजं वैरम्, श्रीवीरजिनं प्रति [3]त्रिपृष्ठभवनिहतसिंहजीवब्राह्मणबटुकपिलस्येव, विरोधः कुतश्चित् कारणात् तत्कालसम्भवोऽप्रीतिविशेषः । प्रतिमानिमित्तं उदायनचण्डप्रद्योतयोरिव । तत्र वैराणि च विरोधाश्च, उज्झितास्त्यक्ता वैराणि विरोधाश्च यैस्ते । तथा वैरहेतवो वा विरोधाः, वैरविरोधास्ततो बहुव्रीहिः । **नित्यं** सर्वदैव, यत **एवोज्झितवैरविरोधाः,** अत एवा**द्रोहाः** परद्रोहवर्जिताः, [4]वैरवत एव परद्रोहाभिप्रायः स्यात्, यत एवाद्रोहाः, अत एव **प्रशान्ताः** प्रसन्ना **मुखशोभा** वदनच्छाया येषां ते तथा । परद्रोहिणो हि विकरालमुखशोभा भवन्तीति, यतश्चैवंरूपा अत [5]**एवाभिमतो**ऽनुगतः सहचारी **गुणसन्दोहो,** गुणनिकरो येषां ते तथा, एवंविधानां च ज्ञानिनां च ज्ञानातिशयो भवतीति । **हतो मोहो** अज्ञानं यैस्ते, तथा ज्ञानिन इत्यर्थः, ते **शरणं साधवो** भवन्तु ।।३५।।

**खंडियसिणेहदामा अकामधामा निकामसुहकामा ।**
**सपुरिसमणाभिरामा आयारामा मुणी सरणं ।।३६।।**

**खण्डितस्नेहदामानोऽकामधामानो निकामसुखकामाः ।**
**सुपुरुषमनोऽभिरामा आत्मारामा मुनयः शरणम् ।।३६।।**

खण्डितानि त्रोटितानि स्नेहरूपाणि दामानि रज्जवः, [6]आर्द्रकुमारेणेवात्मनो ध्यातॄणां च हस्तिन इव यैस्ते **खण्डितस्नेहदामानः** छिन्नस्नेहनिगडा इत्यर्थः, तथा न विद्यते कामो विषयाभिलाषो धामानि गृहाणि येषां ते तथा, अथवा न विद्यन्ते कामधामानि स्मरमन्दिराणि विषयासक्तिहेतूनि येषां ते तथा ।

१. भवन्ति-ड२, २. सर्वसाधुसा-ड२, ड३, ३. त्रिपृष्ठभवे हतसिंह-ड२, ड३, ४. वैरत एव-ल, ड२, ड३, ५. अभिगमतोऽनुरागतो-ड२, ड३, ६. रेण वा-ड, 8,-परि-२ ।

भवा**न्निष्कामो** निर्विषयो, मोक्षसुखे कामो अभिलाषो येषां ते तथा मोक्षाभिलाषिण इत्यर्थः । तथा इङ्गिताकारसम्पन्नत्वात् सत्पुरुषाणामाचार्योपाध्यायादीनां वन्दारुणां दमदन्तेनेव युधिष्ठिरादीनामिव मनांसि आनन्दयन्ति अभिरामयन्ति इति **सत्पुरुषमनोभिरामाः**, कथं तन्मनप्रीतिरित्युक्तैर्दर्शयति -

**"काले सिक्खइ नाणं जिणभणियं परमभत्तिराएणं ।**
**दंसणपभावगाणि य सिक्खइ सत्थाइं कालम्मि" ।।**
**"काले य भत्तपाणं गवेसए सयं[1] च दोसपरिसुद्धं ।**
**आयरिया ईणट्ठा पवयणमायासु उवउत्तो" ।।**
**"एवं समायरंतो काले कालं विसुद्धपरिणामो ।**
**असवत्तजोगकारी सलाहणिज्जो य भुवणम्मि" ।।**
**"सयलसुरासुरपणमियजिणगणहरभणियकिरियविहिकुसलो ।**
**आराहिऊण सम्मत्त[2]नाणचरणाइं परमाइं" ।। [ ]**
**"सत्तऽट्ठभवग्गहणंऽब्भंतर कालम्मि केवलं नाणं ।**
**[3]उप्पाडिऊण गच्छइ विहूयमलो सासयं सुक्खं" ।।**
**"तत्थ य जर-जम्मण-मरण-रोग-तन्हा-छुहा-भयविमुक्को ।**
**साइ-अपज्जवसाणं कालमणंतं सुहं लहइ" ।। [ ]**

तथा त्यक्ताऽन्यकृत्यत्वादात्मानं तासु प्रवचनोक्तक्रियासु, आ सामस्त्येन रामयन्ति क्रीडयन्ति आत्मानमित्याऽऽत्माऽऽरामा, यदि वा विशिष्टसंयमस्थाने नियोजनेनाऽऽत्मानं क्रीडास्थानं पुरनिवासिलोकस्योद्यानयात्रास्थानमिव येषां ते, तथा आचारं वा पञ्चप्रकारममन्ति गच्छन्ति आश्रयन्तीति **आचारामाः**, मन्यन्ते बुध्यन्ते लोकस्य कालत्रयावस्थामिति **मुनयः** साधवः ते **शरणं** भवन्तु ।।३६।।

**मिल्हियविसय-कसाया उज्झियघर-घरणिसंगसुहसाया ।**
**अकलियहरिस-विसाया साहू सरणं [4]विहुयसोया।।३७।।**

**मिल्हितविषयकषाया उज्झितगृहगृहिणीसङ्गसुखस्वादाः ।**
**अकलितहर्षविषादाः साधवः शरणं विधृतशोकाः।।३७।।**

१. सयलदोस-डर, ड३, २. नाणं चरणाइमाइ-डर, ड३, ल, ३. तप्पाडिऊण-डर, ड३, ४. गयपमाया-ल, डर, ड३ ।

[१]**मिलिता** अपास्ता **विषया** शब्दाद्याः, **कषायाः** क्रोधाद्याः यैस्ते तथा, विषयकषायरहिता इत्यर्थः, तथा **गृहगृहिण्योः**[२] **सङ्गः** सम्बन्धः, तस्माद् यः **सुखास्वादः** सुखलेश्याविशेषः, **उज्झितः** परिहृतो यैस्ते तथा निष्परिग्रहा निर्जीगीषवश्चेत्यर्थः । तथा न कलितौ न गणितौ न आश्रितौ हर्षविषादौ प्रमोद-वैमनस्ये यैस्ते, तथा [३]समध्यानव्यवस्थिततत्वाद् । यदाह –

"वंदिज्जमाणा न समुक्कसंति हीलिज्जमाणा न समुज्जलंति ।
दंतेण चित्तेण चरन्ति धीरा मुणी समुग्घाइयरागदोसा" ।। [ ]

तथा [४]विधृतानि श्रोतांसि आश्रवद्वारलक्षणानि यैर्यदिवा [५]**विधृतः** क्षिप्तः **शोकः** चित्तखेदो यैस्ते तथा [६]विधृता असंयमस्थाना [७]गतशोका इत्यर्थः । ते **साधवो** मम **शरणं** स्युरित्यर्थः ।।३७।।

**हिंसाइदोससुन्ना कयकारुन्ना सयंभुरूप्पन्ना ।**
**अजराऽमरपह[बहु]खुन्ना साहू सरणं सुकयपुन्ना ।।३८।।**

**हिंसादिदोषशून्याः कृतकारुण्याः स्वयम्भूरुक्प्रज्ञाः ।**
**अजरामरपथ[बहु]क्षुण्णाः साधवः शरणं सुकृतपूर्णाः ।।३८।।**

हिंसादि - हिंसा आदिशब्दात् अलीकभाषण-परस्वापहार-स्त्रीसेवा-परिग्रहसङ्ग्रहः । **हिंसादिदोषैः शून्यास्तै**र्विरहिता इत्यर्थः । तथा **कृतं** विहितं **कारुण्यं** [८]दुःखप्रहाणेच्छादिरुप आर्द्रभावः [९]सर्वसत्वे यैस्ते कृतकारुण्याः कृपाकवचितचेतस इत्यर्थः । तथा जीवाजीवादिपदार्थानां शासने यथा प्रणीतत्वेन रोचनं मननं श्रद्धा रुक् सम्यक्त्वं प्रज्ञानं प्रज्ञा बुद्धिः स्वयं भवतीति स्वयम्भूः रुक् प्रज्ञा बुद्धि येषां ते **स्वयम्भूरुक्प्रज्ञा,** यदि तत् स्वयम्भूरुचा सम्यक्त्वेन पूर्णा स्वयंभूरुक्पूर्णा दूरीकृतमिथ्यात्वा इत्यर्थः । स्वयम्भूसमुद्रतुल्ये वा विस्तीर्णे रुक्प्रज्ञे येषां ते तथा, अथवा कस्याऽप्यनिश्रित[१०]त्वात् **"वामे हस्ते दो दुझ्रिया"** इत्यादिना येन स्वयम्भरा आत्मनिर्वाहका उपपन्ना व्यवस्थिता स्वयम्भरोत्पन्नाः । तथा न विद्येते जरामरौ वृद्धत्व-निधने यत्र **तदजरामरं** निर्वाणम्, तत्रोपदेष्टव्ये वर्णयितव्ये च बहु प्रभूतं यथाभवत्येवं **क्षुण्णाः** निपुणा मोक्षस्वरूपज्ञातार इत्यर्थः, यदा तु 'पह' इति पाठस्तदा अजरामर-पथदेशकत्वात् प्रवचनशास्त्राण्यपि **अजरामरपथ**स्तत्र **निपुणाः** सम्यक् तस्य वेदिन इत्यर्थः, ते **साधव शरणं** भवन्तु । पुनः किंविशिष्टाः ? सुष्ठ्वतिशयेन कृतं पुण्यं चारित्रप्रातिलक्षणमेष्यद्भवयोग्यम्, स्वर्गादिलाभलक्षणं वा यैस्ते **सुकृताः,** तैर्तपःप्रभृतिभिर्वा **पूर्णा**भृताः, सञ्चितप्रभूततपस इत्यर्थः, इति गाथार्थः ।।३८।।

१. मिल्हिता-डर, ड३, २. गृहिण्याः-डर, ड३, ३. समभावव्य-डर, ड३, ४-५-६. विधूतानि, विधूतः, विधूता-डर, ड३, ७. शोका वा डर, ड३, ८. दुःखप्रहाणेच्छादयया आर्द्र-डर, ड३, ९. सत्वेषु-डर, ड३, १०. प्रज्ञा सम्यक्त्व-डर

**कामविडंबणचुक्का कलिमलमुक्का विविक्कचोरिक्का ।**
**पावरयसुरयरिक्का साहूगुणरयणचश्चिक्का ।।३९।।**

**कामविडम्बणच्युताः कलिमलमुक्ता विविक्तचोर्याः ।**
**पापरजःसुरतरिक्ताः साधुगुणरत्नदीप्तिमन्तः ।।३९।।**

काम्यतेऽभिलष्यते विषयार्थिभिरिति कामः, स च सम्प्राप्ताऽसम्प्राप्तभेदेन द्विधा, तत्र सम्प्राप्तश्चतुर्दशधा, असम्प्राप्तो दशधा, यदाह –

[9]**"कामो चउवीसविहो संपत्तो चेव तह य असंपत्तो ।**
**संपत्तो चउदसहा दसहा पुण होअसंपत्तो" ।।**

[10]**"तत्थ असंपत्तेच्छा १ चिंता २ तह सद्ध ३ संमरणमेव ४ ।**
**विक्कवय ५ लज्जनासो ६ पमाय ७ उम्माय ८ तब्भावो ९" ।।**

[11]**"मरणं १० च होइ दसमं संपत्तं पि य समासओ वुच्छं ।**
**दिट्ठीए संपाओ १ दिट्ठीसेवा य संभासो २" ।।**

[12]**"हसिय ३ ललिय ४ उवगूहिय ५ दंत ६ नहनिवाय ७ चुंबणं ८ चेव ।**
**आलिंगण ९ मादाणं १० कर ११ सेवा १२ संग १३ कीडा १४ य" ।।**

[दश. नि. हारि. वृत्ति २५९-२६२]

तस्य कामस्य स्मरजनितविकारस्य चतुर्विंशतिविधस्य या विडम्बना कदर्थना मदोन्मत्तस्येव नानाविक्रियाभिः परिवेष्टनम्, तस्याः **कामविडम्बनायाः चुक्क** त्ति प्राकृतत्वात् **च्युताः,** तया विरहिताः, विज्ञातपरमार्थत्वात् तां त्यक्तवन्त इत्यर्थः । तथा **कलिमलं** पापं तेन **मुक्तास्तद्** विवर्जिताः, पवित्रचारित्रनीरपूरेण तं प्रक्षालितवन्त इत्यर्थः । तथा **विविक्क** त्ति विविक्तमदत्तादानपरिहारेण आत्मनः पृथक् कृतं **चौरिक्यं** चौर्यं यैस्ते, तथा स्वामि-जीव-जिन-गुर्वाज्ञाऽनुज्ञात[1]-भक्तपानादिग्रहणेन सर्वथाऽपि[2] तत्परिहृतवन्त इत्यर्थः, तथा **पावरय** त्ति, पातयति दुर्गतौ जीवानिति पापम्[3], **तस्य** रजः कश्मलम्[4], पापरजश्च तत् **सुरतं** मैथुनम्, तेन **रिक्तास्तत्** त्यागिनो नवगुप्तिसनाथ-ब्रह्मव्रतचरणात्, यत एवम्भूता अत एव साधूनां गुणाः **साधुगुणा** व्रतषट्कादयस्त एव **रत्नानि,** तैः **चश्चिक्क** त्ति दीप्तिमन्तस्तैर्मण्डिता इत्यर्थः, ते साधवः शरणमिति ।।३९।।

१. गुर्वाद्यनुज्ञात-ड२,ड३, २. सर्वत्राऽपि-ल,ड३, ३. पापः-ल,ड३, ४. कश्मलः-ड२,ड३, 9-10-11-12-परि-२ ।

पूर्वं 'आयरिय-उवज्झाया' इत्यनेन यद्यप्याचार्यादयः शरणत्वेनऽऽश्रितास्तथाऽपि साधुभ्यो ज्येष्ठपदवर्त्तिनस्ते कथं तद् ग्रहणेन गृह्यन्ते ? इत्यत्र यो वितर्कस्तस्यापनोदाय आह –

**साहुत्तसुट्ठिया जं आयरियाई तओ य ते साहू ।**
**साहुभणिएण गहिया ते तम्हा साहुणो सरणं ।।४०।।**

**साधुत्वसुस्थिता यदाचार्यादयः ततश्च ते साधवः ।**
**साधुभणितेन गृहीताः तस्मात् ते साधवः शरणम् ।।४०।।**

**साधुत्वे** साधुस्वरुपे [१]समभावे परसाहाय्य-परोपकारलक्षणे **सुष्ठु** अतिशयेन **स्थिता** अध्यवसिता व्यवस्थिता तद्हेतो**राचार्यादय** आचार्योपाध्याय-प्रवर्त्तक-स्थविर-गणावच्छेदिन**स्ते** पञ्चाऽपि **साध**वस्तत्कार्यकरणात् **साधुभणितेन** साधुसत्कोच्चारेण **गृहीता** ग्रहणमागता**स्तस्मात् ते** सर्वेऽत्राधिकारोक्तगुणगरिष्ठाः, अतीताऽनागतवर्तमानकालभाविनो, अतीतऽनागतयोरनन्ता वर्तमानोत्कृष्टकाले नवकोटीसहस्रमाना, जघन्ये तु कोटीसहस्रद्वितयप्रमाणाः, उक्तञ्च –

**"नवकोडिसहस्साइं मुणीण उक्कोसयम्मि कालम्मि ।**
**दुन्नि य कोडिसहस्से जहन्नकालम्मि वंदामि"** ।। [ ]

ते **साधवो** मम **शरणं** [२]भवेयुरिति तात्पर्यार्थः ।।४०।।

उक्तं तृतीयं शरणम्, अथ [३]चतुर्थशरणप्रतिपादनाय आह –

**पडिवन्नसाहुसरणो सरणं काउं पुणो वि जिणधम्मं ।**
**पहरिसरोमंचपवंचकंचुयंचियतणु भणइ ।।४१।।**

**प्रतिपन्नसाधुशरणः शरणं कर्त्तुं पुनरपि जिनधर्मम् ।**
**प्रहर्षरोमाञ्चप्रपञ्चकञ्चुकाञ्चिततनुर्भणति ।।४१।।**

स साधु-साध्वी-श्रावक-श्राविकाऽन्यतमो जीवः **प्रतिपन्नसाधुशरणो**ऽङ्गीकृतमुनिशरणः, **पुन**रथशब्दार्थो भिन्नक्रमश्च, ततश्च पुनरथानन्तरं **जिनधर्मं शरणं कर्तुं** प्रतिपत्तुमाश्रयितुमिच्छन्नित्यध्याहारार्थम् । किं विशिष्टोऽसावित्याह –

**पहरिस** त्ति तत्र वदनविकारादिचिह्नगम्यमानसः प्रीतिविशेषो हर्षः, प्रकृष्टो हर्षः प्रहर्षः,

१. समभाव-परसाहाय्य-ड३, २. भवन्तु इति-ल, ड२, ३. चतुर्थं शरणं-ड२ ।

तद्वशेन **रोमाञ्चप्रपञ्चो** रोमोद्धर्ष उत्कर्षः स एव **कञ्चुक**श्चोलकस्तेनाञ्चिता विभूषिता **तनुः** शरीरं यस्य स **प्रहर्षरोमाञ्चप्रपञ्चकञ्चुकाञ्चिततनुः** प्रमोदपूरिताङ्गः सन्निदं वक्ष्यमाणं **भणत्य**भिदधति ।।४१।।

यच्च ब्रूते तदाह –

**पवरसुकएहिं पत्तं पत्तेहि वि नवरि केहि वि न पत्तं ।**
**तं केवलिपन्नत्तं धम्मं सरणं पवन्नो हं ।।४२।।**

**प्रवरसुकृतैः प्राप्तं पात्रैरपि पुनः कैश्चिन्न प्राप्तम् ।**
**तं केवलिप्रज्ञप्तं धर्मं शरणं प्रपन्नोऽहम् ।।४२।।**

**प्रवरसुकृतै**र्विशिष्टपुण्यैः **प्राप्तं** लब्धं सम्यक्त्व-देशविरति-सर्वविरतिरूपं जिनप्रणीतं धर्ममिति सम्बन्धः, यतो जीवस्याऽनादिभवाऽलभ्यस्तैर्मिथ्यात्वादिभिर्हेतुभिः सदैवाऽऽवृत्तत्वेन तत्प्राप्तेरतिशयेन दुर्लभत्वात् । यदाह –

[13] **"अंतिमकोडाकोडीए सव्वकम्माणमाउवज्जाणं ।**
**पलियासंखिज्जइमे भागे खीणे हवइ गंठी"** ।। [वि. आ. भा. ११९४]

[14] **"अपुव्वेण तिपुंजं मिच्छत्तं कुणइ कुद्दवोवमया ।**
**अनियट्टीकरणेण उ सो सम्मद्दंसणं लहइ"** ।। [वि. आ. भा. १२१८]

[15] **"सम्मत्तम्मि य लद्धे, पलियपुहत्तेण सावओ हुज्जा**
**चरणोवसमखयाणं, सागरसंखंतरा हुंति"** ।। [वि. आ. भा. १२२२]

यावत्यां कर्मस्थितौ सम्यक्त्वं लब्धम्, तन्मध्यात् पल्योपमपृथक्त्वलक्षणे स्थितिखण्डे क्षपिते देशविरतो[1] भवेत्, ततोऽपि सङ्ख्यातेषु सागरेषु क्षपितेषु चारित्रमित्यादि कियत्सु भवेष्वेवं लाभ इत्याह –

[16] **"एवं अपरिवडिए सम्मत्ते देव-मणुय-जम्मेसु"** ।
संसरणं कुर्वतोऽन्योन्यमनुजभवे देशविरत्यादिलाभः ।
**"अन्नयरसेढिवज्जं एगभवेणेव सव्वाइं"** ।। [वि.आ.भा. १२२३]

तीव्रशुभपरिणामवशात्, अतोऽनल्पपुण्यैरवाप्यत इत्यर्थः ।

किञ्च, [मालिनीवृत्तम्]

१. देशविरतिर्भवेत्-ड२, ड३, 13, 14, 15, 16-परि-२ ।

"प्रबलबलदशार्हश्रीरदीनत्ववृत्तिः, खचर-वर-विभूतिश्चक्रवर्त्तित्वलक्ष्मीः ।
सकलसुरपतित्वं लभ्यते सर्वमेको; निरवधिभवबाधो दुर्लभो जैनधर्मः" ।। [ ]
विततमतिसमृद्धः सिद्धसारस्वतो वा, निखिलसुभगगात्रः पात्रमौदार्यतायाः ।
भवति भवसमुद्रे यानपात्राऽभिरामो; निरुपमसुखहेतुर्दुर्लभो जैनधर्मः" ।। [ ]

पुण्यवद्भिः प्राप्यत इत्युक्तम्[1], तत्र किं सर्वैरपि तैर्लभ्यत ? इत्याह - **पत्तेहि** त्ति पात्रैरपि भाग्यवद्भिरपि **कैश्चिद्** ब्रह्मदत्तचक्र्यादिभिरिव नवरि पुनर्न **प्राप्तं** नाऽऽसादितम्, पात्रत्वं च ब्रह्मदत्तस्य चक्रित्वलाभात्, देवेन्द्रचक्रवर्त्यादिकर्मणां बन्धो भव्यानामेवोक्त इति । **तमेवम्**भूतं केवलिभिः केवलोपलब्धसमस्ततत्त्वैः **प्रज्ञप्तं** देशितं श्रुतधर्मचारित्रधर्मरूपं **शरणं प्रपन्नोऽहमि**ति ।।४२।।

[2]धर्मस्यैव माहात्म्यमुपदर्शयन् तमेव शरणं प्रतिपित्सुराह -

**पत्तेण अपत्तेण य पत्ताणि य जेण नर-सुरसुहाइं ।**
**मोक्खसुहं पि य पत्तेण नवरि धम्मो स मे सरणं ।।४३।।**
**पात्रेणापात्रेण च प्राप्तानि येन नर-सुरसुखानि ।**
**मोक्षसुखं पुनः पात्रेणैव केवलो धर्मः स मे शरणम् ।।४३।।**

**पात्रेण** [3]ज्ञाति-कुल-रुप-सौभाग्यादिगुणयुक्तेन, न केवलं पात्रेण, **अपात्रेणा**ऽपि गुणवियुक्तेन दारिद्र्याद्युपहतेन **प्राप्तानि** लब्धानि येन कारणेन **नर-सुरसुखानि** मनुजदेवसमृद्धयः, तत्र पात्रेण ऋजुत्वादिगुणवता वरुणसारथिमित्रेणेव नरसुखं विदेहेषु सुकुलोत्पत्त्यादिकं यथा प्राप्तम् । अपात्रेण दौस्थ्याक्रान्तेन कौशाम्ब्यां आर्यसुहस्तिप्रव्राजितसम्प्रतिराजजीवद्रमकेणेव, पात्रेण सुरसुखं सर्वार्थ-सिद्धिसम्भवं शालिभद्रेणेव, अपात्रेण सुरसुखं वसुदेवपूर्वभवे नन्दिषेणेनेव, अपेः पुनरर्थत्वात् **मोक्षसुखम्**, पुनश्चस्य भिन्नक्रमावधारणार्थत्वात्, पात्रेणैव चारित्रधर्माधारभूतभव्यत्वगुणलक्षणेन प्राप्यते, अथवा प्राप्तेनाप्राप्तेनाऽपि लब्धेनाऽलब्धेन, यथा **येन** जैनधर्मेण **नरसुरसुखानि प्राप्तानि**, तत्र **प्राप्तेन** यथा लब्धसम्यक्त्वलाभेन धनसार्थवाहेन नरसुखं मिथुनिकसुखम्, **अप्राप्तेनाऽपि** तेनैव तस्मिन्नेव भवे सम्यक्त्वलाभात् पूर्वम्, **प्राप्तेन** नरसुरसुखं वीरजीवबलाधिपेनेव, **अप्राप्तेन** सुरसुखं **"चरगपरिव्वायग बंभलोगो जा"** इत्युक्तेन बहूभिः कपिलादिभिरिव, **मोक्षसुखं पुनः** प्राप्तेनैव प्राप्यते येन धर्मेण, यच्च मरूदेवीप्रभृतयोऽलब्धेनाऽपि तेन तदवाप्नुवन् तत् तेऽपि भावतः प्राप्तचारित्र-परिणामा इति, **नवरि** पुनः, **स धर्मो मे** मम **शरणं** भवतु ।।४३।।

१. उक्तस्तत्र-ड२, ड३, २. अथ धर्म-ड२, ड३, ३. जाति-ल, ड२ ।

**निद्दलियकलुसकम्मो कयसुहजम्मो खलीकयकुहम्मो ।**
**पमुहपरिणामरम्मो सरणं मह होउ जिणधम्मो ।।४४।।**
**निर्दलितकलुषकर्मा कृतशुभजन्मा खलीकृतकुधर्मः ।**
**प्रमुखपरिणामरम्यः शरणं मे भवतु जिनधर्मः ।।४४।।**

**निर्दलितानि** विदारितानि तत्कर्तृजनेभ्यः [1]**कलुषाणि** मलिनानि **कर्माणि** येन धर्मेण स, तथा निर्धौतसर्वपाप इत्यर्थः, यत एव निर्दलिताऽशुभकर्मा, अत एव **कृतं शुभं** कर्म **जन्म** वा, सेवकजनेभ्यो गणधरतीर्थकरत्वादिपदवीप्राप्तिलक्षणं येन स कृतशुभकर्मा ऽकृतशुभट जन्मा वा, यत एव कृतशुभजन्मा अत एव **खलीकृतः** शत्रुवन्निर्द्धाटितो निःसारितः कुधर्मो मिथ्याधर्मः, सम्यक्त्व-तत्त्ववासितेभ्यो येन स तथा, मिथ्यादृष्टिधर्मस्यारम्भेऽप्यादावपि पञ्चाग्नितपःप्रभृत्यादेर्महाकष्टहेतुत्वे-नाऽसुन्दरत्वात्, **परिणामे** च मिथ्यात्वरुपत्वेन दुर्गतिमूलत्वात् । अयं तु जिनधर्मः, **प्रमुखे** आदाविह-लोकेऽपि धम्मिलादीनामिव, परिपाकप्राप्तैर्भवान्तरे दामन्नकादीनामिव **रम्यो** मनोज्ञः, किञ्च –

**"धणओ धणत्थियाणं कामत्थिणं च सव्वकामकरो ।**
**सग्गापवग्गसंगमहेऊ जिणदेसियो धम्मो"** ।। [ ]

स एवंविधो **धर्मो मम शरणं भवतु** ।।४४।।

**कालत्तए वि न मयं जम्मण-जर-मरण-वाहिसयसमयं।**
**अमयं व बहुमयं जिणमयं च सरणं पवन्नो हं ।।४५।।**
**कालत्रयेऽपि न मृतं जन्मजरामरणव्याधिशतशमकम् [सुमृतम्]।**
**अमृतमिव बहुमतं जिनमतं च शरणं प्रपन्नोऽहम् ।।४५।।**

**कालत्रये**ऽतीता-ऽनागत-वर्त्तमानरुपे **न मृतो** न विनष्टस्तं न मृतम्, विदेहेषु नैरन्तर्येण [2]तत् सद्भावात्, **कालत्रयेऽपि** धर्मो विद्यत एवेत्यर्थः, तथा जन्म च जरा च मरणं च व्याधयश्च **जन्म-जरा-मरण-व्याधय**स्तेषां **शतानि,** सुष्ठु अतिशयेन मृतानि निष्ठितानि विनष्टानि यस्मात् स तथा तम्, अथवा **जन्म-जरा-मरण-व्याधिशतानां शमकः,** [3]सिद्धिप्रदानेन तन्निवारकस्तं तथा **अमयं व** त्ति चारुवर्ण-गन्धरसोपेतं वर्ण-बल-सौभाग्य-पुष्टिजननम्, सर्वरोगनाशनमनेकगुणसम्पन्नममृतम्, तदिव सकललोक-स्याऽऽनन्द-तुष्टि-पुष्टिजनकत्वाद् **बहुमतः,** सर्वस्याऽपि अतिशयेनाऽभीष्ट

१. कलुषितानि-ड२ २. तत्र-ड२, ३. सिद्धपदप्र-ड२, ड३ ।

इत्यर्थः । तं किं बहुमतमिति चेत् ? [१]प्रक्रमाऽऽयातं जिनधर्ममेव, न केवलं जिनधर्मम्, **जिनमतं च** प्रवचनं द्वादशाङ्गमित्यर्थः, तदप्येवंगुणमेव, तत्र कालत्रयेऽपि विदेहेषु, तथा –

[17]"**सम्मत्तस्स सुयस्स य, पडिवत्ती छव्विहंमि कालम्मि**" । [वि.आ.भा.गा. २७०८]

इत्युक्तेश्च, सदैव तस्याऽपि प्राप्तेस्तदपि न मृतमिति शाश्वतमित्यर्थः, एवं शेषाण्यपि विशेषणानि सहेतुकानि योज्यानि, एतद्गुणसुन्दरं जिनधर्मं जिनमतं च **शरणत्वेनाहमाश्रित** इति तात्पर्यार्थः ।।४५।।

जिनधर्मभावितमतेश्च कामविरक्तता भवतीत्यतः प्राह –

**पसमियकामपमोहं दिट्ठाऽदिट्ठेसु न कलियविरोहं ।**
**सिवसुहफलयममोहं धम्मं सरणं पवन्नो हं ।।४६।।**

**प्रशमितकामप्रमोहं दृष्टादृष्टेषु न कलितविरोधम् ।**
**शिवसुखफलदममोघं धर्मं शरणं प्रपन्नोऽहम् ।।४६।।**

**प्रशमितः**, [18]"**सल्लं कामा, विसं कामा कामा आसीविसोवमा ।**
**कामे पत्थेमाणा अकामा जंति दुग्गइं**" ।। [श्री उत्त०सूत्र अध्य. ९, ५३]

इत्यादि तद्विपाकवर्णनेनोपशमं नीतः **कामस्य प्रकृष्टो मोह** उन्मादो येन स तथा, निवारितकामोद्रेक इत्यर्थस्तम्, तथा दृष्टाश्चादृष्टाश्च द्वन्द्वः दृष्टादृष्टा जीवाः, तत्र दृष्टा बादरैकेन्द्रिय-द्वीन्द्रियादयः दृष्टिविषयत्वात् तेषाम्, अदृष्टाः सूक्ष्मपनकसूक्ष्मैकेन्द्रियाः सर्वलोकवर्त्तिनोऽतिशयज्ञानिगोचराः; तेषु **दृष्टादृष्टेषु** जीवेषु **न कलितो** न कृतो **विरोधो** विपरीतप्ररूपणारूपो येन स तथा, तं केवलिप्रज्ञप्तत्वात् यथावस्थितस्वरूपाऽऽवेदकमित्यर्थः, तथा शिवसुखमेव फलं तद्ददातीति **शिवसुखफलदः तं शिवसुखफलदम्,** अत एव न मोघोऽ**मोघो**ऽवन्ध्यः सार्थक इत्यर्थः, तमेवम्प्रकारं **धर्मं शरणमहं प्रपन्न** इति ।।४६।।

पूर्वं सिद्धिसुखफलदमित्युक्तम्, तदवाप्तौ च नरकादिगतिरोधो भवति, अत आह –

**नरयगइगमणरोहं गुणसंदोहं पवाइनिक्खोहं ।**
**निहणियवम्महजोहं धम्मं सरणं पवन्नो हं ।।४७।।**

---

१. प्रक्रमादायातम्-ड२, ड३, 17-18-परि-२ ।

**नरकगतिगमनरोधं गुणसन्दोहं प्रवादिनिःक्षोभम् ।**
**निहतमन्मथयोधं धर्मं शरणं प्रपन्नोऽहम् ।।४७।।**

पापकारिनरान् कायन्त्याह्वयन्तीति नरकाः, रत्नप्रभादिषु सीमन्तकाद्यास्तत्र गमनं तद् रुणद्धि निवारयति [1]**नरकगतिगमनरोधस्तम्**, तथा **गुणानां** क्षान्त्यादीनां च **सन्दोहः** समुदायो यत्र स तथा तं तथा प्रकर्षवन्तो वादिनस्त्रिषष्ट्याधिकत्रिशतीसङ्ख्योपेताः । उक्तञ्च –

**"असियसयं किरियाणं अकिरियावाईण होइ चुलसीई ।**
**अन्नाणी सत्तट्ठी वेणइयाणं च बत्तीसं"** ।। [श्रीआचा०श्रु०१ अध्य०१ वृं०]

'निर्' शब्दस्य निषेधार्थत्वात्, तैः प्रवादिभिर्निर्न क्षोभ्यत इति **प्रवादिनिःक्षोभ्यस्तम्**, अथवा क्षोभणं क्षोभः, प्रवादिभ्यो निर्गतो रहितः क्षोभश्चालनं यस्य स, तथा सर्वज्ञदेशितत्वात् अत्यद्भूत-महापुण्यबन्धुबन्धुरत्वाच्च । यदाह –

**"समत्तदेसविरयाण समणाण सावगाण सुविहियाणं ।**
**तेसिं परपासंडा सयसं पि कलं न अग्घंति"** ।। [ ]

अतस्तं धर्मं पाखण्डिभिरखण्ड्यशासनमित्यर्थः । तथा नवगुप्तिरचनारुचिरकवचकवचितत्वेन निर्जितः, प्रतिहतो नाशं नीतो मन्मथयोधः कामसुभटो येन स तथा, तं **धर्मं शरणं** प्रपद्येऽ**हमिति** ।।४७।।

इति कृतधर्मशरणः, पुनस्तस्यैव चारित्रश्रुतरुपस्य निध्युपमया नमस्कारमाह ।

**भासुरसुवन्न[2]सुंदररयणालंकारगारवमहग्घं ।**
**निहिमिव दोगच्चहरं धम्मं जिणदेसियं वंदे ।।४८।।**

**भास्वरसुवर्णसुन्दररचनालङ्कारगौरवमहार्घम् ।**
**निधिमिव दौर्गत्यहरं धर्मं जिनदेशितं वन्दे ।।४८।।**

भास्वरगतिहेतुत्वात् चारित्रधर्मस्य, '[3]**भास्वरः**' शोभनो वर्णः श्लाघा –

[19][4]**"देवा वि तं नमंसंति जस्स धम्मे सया मणो"** ।। [दश वै० अ०१ - १]

इत्यादि गुणोत्कीर्त्तनरूपो यस्मात् स **सुवर्णः**, तथा **सुन्दरा** मनोज्ञा इतिकर्त्तव्यक्रियाकलापैश्चित्रा 'इच्छामिच्छा' इत्यादिरूपा या **रचना** परिकल्पना, तस्या यथाऽवसरमलङ्करणादलङ्कारः,

१. नरकगमन-ड३ २. वयणा-ल, ३. भास्करः ल, ड२, ड३, ४. धम्मो मंगलमु...दशवै-१-१, 19-परि-२ ।

[1]सुन्दररचनाऽ**लङ्कारः**, गौरवहेतुत्वाद् **गौरवम्, महानर्घो** माहात्म्यविशेषो यस्य स महार्घस्ततो द्वन्द्वः, श्रुतधर्मपक्षेषु - **'सुयधम्मो सज्झाओ'** इति वचनात् - श्रुतं द्वादशाङ्गम्, तत्र भास्वरज्ञानिभिः केवलिभिरुक्तत्वात् [2]**भास्वरम्,** शोभना वर्णा अक्षराणि यत्र तत् **सुवर्णम्,** ततः सुवर्णानामक्षराणां या सुन्दरा **रचना** पदपङ्क्त्या विरचनम्, तस्या द्वात्रिंशत्सूत्रदोषपरिहारेणाऽष्टगुणालङ्करणेन **वाऽलङ्कारो** विभूषणं सुवर्णसुन्दररचनाऽलङ्कारस्तस्माच्च **गौरवो** गुरुत्वम्, तथा एकैकस्याऽपि सूत्रस्यानन्तार्थत्वात्, यदाह –

**"सव्वनइणं जा हुज्ज वालुया सव्वोदहीणं जं उदयं ।**
**इत्तो वि अणंतगुणो अत्थो एगस्स सुत्तस्स"** ।। [कल्पसूत्र. वृ.]

ततो **महानर्घः** आधिक्यपूजाऽतिशयो वा यस्य, तथाहि –

**"सव्वे वि य सिद्धंता सदव्वरयणासया स तिउल्लुका ।**
**जिणवयणस्स भगवओ न तुल्ल तं अणग्घेयं"** ।। [आव.हारि.वृ.]

किञ्च –

**"जीवाइवत्थुचिंतण कोसल्लगुणेणऽणन्नसरिसेण ।**
**सेयवयणेहिं अजियं जिणिंदवयणं महायसयं"** ।। [आव.हारि.वृ.]

यं (जं) यं (यद्)

**"सव्वसुरासुरकिंनरवंतरजोइससुथुइयं नाणं ।**
**तेणेह गणहराणं छुहिंति चुन्ने सुरिंदा वि"** ।। [ध्यान.श.वृ. ४५]

ततो भास्वरसुवर्णा सुन्दररचना गौरवं च महार्घ च भास्वरसुवर्णसुन्दररचनालङ्कारगौरव-महार्घम् । अतश्चोपमीयते **निधिमिव** महानिधानमिवेत्यर्थः ।

किंविशिष्टम् ? दुष्टा गतिः दुर्गतिः, कुदेवत्व-कुमानुषत्व-तिर्यग्-नरकलक्षणा, तस्याः दुर्गतेर्भावो **दौर्गत्यम्,** श्रुतधर्मपक्षे [3]त्वज्ञानत्वं तद्धरतीति, तत्र निधीयन्ते पोष्यन्तेऽर्था येष्विति निधयस्ते च नवधा पञ्चधा च, नवधा –

[20]**"नेसप्पे पंडुयए पिंगले सव्वरयण महापउमे ।**
**काले अ महाकाले माणवग महानिही संखे"** ।। [स्था. सू. ६७३-१]

१. वचना-ल, ड२, ड३, २. भास्वरं-ड२, ३. त्वज्ञानं-ड२, ड३, 20-परि-२ ।

इत्यादिका प्रसिद्धा एव, पञ्चधा एव

[21]"**पंच निहीओ पन्नत्ताओ तं (जहा) पुत्तनिही, मित्तनिही, सिप्पनिही, धणनिही, धन्ननिही**" ति । [स्था. सू. ४४८]

तदत्र निधिरप्युक्तविशेषेण एव । तथाहि –

'भास्वरं' दीप्तिमत् 'सुवर्णं' कनकम्, 'सुंदराणि' रुचिराणि 'रत्नानि' पद्मरागादीनि 'अलङ्कारा-हाराद्याभरणविशेषास्तैः, गौरवः [१]सम्पूर्णता, तेन च 'महार्घो' बहुमूल्यः, अत एव दुर्गतस्य दरिद्रस्य भावो दौर्गत्यं दारिद्र्यं तद् हरतीति **दौर्गत्यहरः** दारिद्र्यापहारकृदित्यर्थः, एवंविधो यो निधिः, तत्कल्पं **जिनोपदिष्टं धर्मं वन्दे** नमस्कुर्वे इति गाथार्थः ।।४८।।

उक्तं चतुर्थं शरणम्, [२]तद्भणितेन चाऽभिहितोऽस्याऽध्ययनस्य स प्रथमोऽर्थाधिकारः अथ द्वितीयाऽर्थाधिकारं बिभणिषुराह -

**चउसरणगमणसंचियसुचरियरोमंचअंचियसरीरो ।**
**कयदुक्कडगरिहाऽसुहकम्मक्खयकंखिरो भणइ ।।४९।।**

**चतु:शरणगमनसञ्चितसुचरितरोमाञ्चाञ्चितशरीरः ।**
**कृतदुष्कृतगर्हयाऽशुभकर्मक्षयकाङ्क्षी भणति ।।४९।।**

**चतु:शरणगमनेन** चतु:शरणाङ्गीकरणेन **सञ्चितं** राशीकृतं यत् **सुचरितं** पुण्यं, तेन योऽसौ **रोमाञ्चः** सोल्लासस्तेना**ञ्चितं** भूषितं **शरीरं** यस्य **स** तथा धर्मशरणगमनाऽर्जितसुकृतवशात् कण्टकितगात्र इत्यर्थः, तथा कृतानि विहितानि यानि दुष्कृतानि अशुभाचारास्तेषां गर्हा गुरुसमक्षं 'हा दुट्ठु कयं' इत्यादि निन्दा, तया **कृतदुष्कृतगर्हया,** योऽसाव**शुभकर्मक्षयः** पापकर्मापगमस्तत्र काङ्क्षिर आकाङ्क्षावान् **भणति,** दुष्कृतगर्हातो यः पापापगमो भवति, तमात्मानं [३]समभिलषन्नेवं वक्ष्यमाणं वदतीत्यर्थः ।।४९।।

यच्च भणति तदाह –

**इहभवियमन्नभवियं मिच्छत्तपवत्तणं जमहिगरणं ।**
**जिणपवयणपडिकुट्ठं दुट्ठं गरिहामि तं पावं ।।५०।।**

---

१. सम्पूर्णभावेन च-डर, ड३, २. तद्भणनेन-डर, ड३, ३. समालिखन्नेवं-डर, ड३, 21-परि-२ ।

**इहभविकमन्यभविकं मिथ्यात्वप्रवर्त्तनं यदधिकरणम् ।**
**जिनप्रवचनप्रतिक्रुष्टं दुष्टं गर्हामि तत्पापम् ।।५०।।**

इहाऽस्मिन् भवे यत् कृतं **तदिहभविकम्,** अन्यस्मिन् भवे भव**मन्यभविकम**तीतभविष्यद्भवसम्भवमित्यर्थः, **मिथ्यात्वप्रवर्त्तनं** कुतीर्थिकदानसन्मानम्, तद्देवाऽर्चनम्, तच्चैत्यकारापणाद्यधिकरणमन्यदपि **चाधिकरणं** भवन-वना-ऽऽराम-तरु-पुर-प्राकारादि-खड्ग-धनुरादिशस्त्रा-ऽग्नि-यन्त्र-गन्त्री-हलोदूखल-मुसलादि तथाऽन्यच्च यत् किमपि **जिनप्रवचने प्रतिक्रुष्टं** निराकृतं भवतीति हेतुत्वात् **दुष्टं तत् पापं गर्हामि** जुगुप्सामीत्यर्थः ।।५०।।

उक्तमेवाऽर्थं विशेषेणाऽऽह –

**मिच्छत्ततमंधेणं अरिहंताइसु अवन्नवयणं जं ।**
**अन्नाणेण विरइयं इण्हिं गरिहामि तं पावं ।।५१।।**

**मिथ्यात्वतमोऽन्धेनार्हदादिष्ववर्णवचनं यत् ।**
**अज्ञानेन विरचितमिदानीं गर्हामि तत्पापम् ।।५१।।**

तत्राऽभिग्रहिका-ऽनाभिग्रहिका-ऽभिनिवेशिक-सांशयिका-ऽनाभोगिकभेदात् पञ्चधा मिथ्यात्वम्, दशधा च तथाहि –

[22]**दसविहे मिच्छत्ते पन्नत्ते तं - १-अहम्मे धम्मसन्ना, २-धम्मे अहम्मसन्ना, ३-उम्मग्गे[1] मग्गसन्ना, ४-मग्गे विमग्गसन्ना, ५-अजीवेसु जीवसन्ना, ६-जीवेसु अजीवसन्ना, ७-असाहूसु साहुसन्ना, ८-साहूसु असाहुसन्ना, ९-अमुत्तेसु[2] मुत्तसन्ना, १०-मुत्तेसु अमुत्तसन्ना [श्री स्थानाङ्गसूत्र-७३४]** इति,

मिथ्यात्वमेव तमोऽन्धकारं, तद्रूपं पातकं वा, तेन **मिथ्यात्वतमोऽन्धेन** मिथ्यात्वशास्त्रोऽपहतभावचक्षुषा सता जीवेना**ऽर्हदादिषु** अर्हत्-सिद्धा-ऽऽचार्योपाध्यायादिषु भक्ति-पूजा-बहुमानाद्यर्हेषु, उक्तञ्च -

**तित्थयर धम्म आयरिय वायगो थेर कुल गण संघे**
**संभोइय किरियाए मइनाणाईण तहा चेव ।।** [दश. निर्यु.]
**कायव्वा पुण भत्ती बहुमाणो तह वन्नवाओ य ।**
**अरहंतमाइयाणं केवलनाणाऽवसाणाणं ।।**

---

१. उमग्गसन्ना-ल, डर, ड३, २. अपुन्नेसु पुन्नसन्ना, पुन्नेसु अपुन्नसन्ना-ल, डर, ड३, असुत्तेसु सुत्तसन्ना, सुत्तेसु असुत्तसन्ना-ड,
22-परि-२ ।

**'अवन्नवयणं जं'** ति अवर्णवादवचनमसद्दोषकथनं **यदज्ञानेन** जिनशासनबाह्येन तदर्थाऽवबोध-विवेकशून्येन वा उक्तमिति शेषः । तत्रार्हतामवर्णवादो यथा न सन्त्यर्हन्तः, सन्तो वा ज्ञानत्रयेण भोगविपाकं जानन्तोऽपि कथं गृहवासे भोगान् भुञ्जन्ति ? केवलोत्पत्तौ च कथं समवसरणादिविभूतिं व्रतस्था अप्युपजीवन्ति ? किं चेष्टाऽनिष्टविषयेन तज्ज्ञानेन ? उक्तं च –

**"सर्वं पश्यतु वा मा वा इष्टमर्थं तु पश्यतु ।**
**कीटसङ्ख्यापरिज्ञानं तस्य न क्वोपयुज्यते"** ।। [स्याद्वादमञ्जरी-१ वृत्तौ]इत्यादि ।

सिद्धाऽवर्णवादो यथा - न सन्ति सिद्धा निश्चेष्टाश्च, उपयोगे सति रागद्वेषसद्भावात्, कथं वा केवल-ज्ञानदर्शनयोस्तेषां युगपदुपयोगो नास्ति ? अशरीरिणां कथं निरुपमं सुखम् ? इत्यादि ।

आचार्याऽवर्णवादो यथा-

**"डहरो अकुलीण त्ति बहुमोहो दमगमंदबुद्धि त्ति ।**
**अवि अप्पलाभलद्धी सीसो परिभवइ आयरियं"** ।। [ ]

कथं वा ते स्वयं भिक्षायां न हिण्डन्ति ? तथा कथं परेषां वैयावृत्याद्युपदिशति ? शक्तिमन्तोप्यात्मना न कुर्वन्तीत्यादि ।

उपाध्यायानां यथाप्रमाणानाममहता अध्यापने त्वरितगतयो विरूपने पश्चात्ताप इत्यादि ।

साधूनां यथा - परस्परसारणशिक्षादिभिः क्रोधादिकर्मबन्धवर्धका इत्यादि । साध्वीनां यथा कलहकारिण्योर्वाबहूपकरणाः श्रमणोपद्रवकारिण्य इत्यादि ।

श्रावक-श्राविकाणां यथा - आरम्भकटमर्द्दवतां कुतस्तेषां सुगतिरित्यादि ?

देव-देवीनां विकुर्वणां विना ते न किमपि कर्तुं समर्थाः कामगृहाश्च अनुत्तरवासिनोऽपि निश्चेष्टाः सामर्थ्ययोगेऽपि किमिति प्रवचनप्रभावनां न कुर्वन्तीत्यादि । एवमिहलोकपरलोकयोरपि विपरीत-प्ररूपणाऽसद्दोषापादनेन ज्ञेया ।

केवलिप्रज्ञप्तधर्मस्य श्रुतचारित्ररूपस्य यथा –

**"पाययभासनिबद्धं को वा जाणइ पणीय केणेदं ।**
**किं वा चरणेणं तद् वाणेण विणेह भवइ त्ति"** ।। [ ] इत्यादि ।

सदेवमनुजाऽसुरलोकस्याऽन्यथा प्ररूपणम् (यथा) सप्त द्वीपाः, सप्त समुद्राः, प्रजापतिकृतं सर्वमित्यादि ।

सर्वप्राण-भूत-जीव-सत्त्वानां यथा तैः सूक्ष्मैस्त्रसस्थावरैर्व्यक्तवेदनत्वेन हतैरप्यल्प एव कर्मबन्धो भवतीत्यादि ।

कालस्य यथा - किं कालग्रहणेन यथाऽवसरं प्रत्युत्पेक्षणादिक्रियया वेत्यादि ।

श्रुतस्य यथा -

**"को आउरस्स कालो मइलंबर धोवणे य को कालो ।**
**जइ मुक्खहेउ नाणं कोऽकालो तस्स कालो वा"** ।। [ ] इत्यादि ।

श्रुतदेवताया यथा - नास्ति सा, अकिञ्चित्करी वा कामगर्दभीत्यादि । वाचनाऽऽचार्यस्य यथा - स निर्दुःखसुखो बहून् वारान् वन्दनं दापयति इत्यादि ।

एवं 'जं वाइद्धं' इत्यादिष्वपि ज्ञेयम् -

**"एकं वा चउहिं ठाणेहिं जीवा किब्बिसियत्ताए कम्मं पकरिंति**
**तं अरहंताणं अवन्नं वयमाणेहिं अरहंतपन्नत्तस्स धम्मस्स**
**अवन्नं वयमाणे आयरिय-उवज्झायाणं अवन्नं वयमाणे**
**चाउवन्नस्स संघस्स अवन्नं वयमाणे इति"** । [ ]

तथा अन्यदपि मिथ्यात्वमोहितमतिनां परदेव-परतीर्थ-परधर्म-कुशास्त्र-देवकुल-वापी-कूपाऽऽराम-सरःप्रभृति**विरचितं** कृतं कारितमनुमतं वाऽतीता[1]ऽनागतवर्त्तमानकाले **इदानीम**वगतपरमार्थः सन् **तत्पापं गर्हामि** निन्दामि गुरुसमक्षमालोचयामि, गुरुभिर्दत्तं तपःकर्म सम्यक् प्रतिपद्येऽहमिति गाथार्थः ।।५१।।

अभिहितार्थमपि पुनः प्रपञ्चयन्नाऽऽह –

**सुय-धम्म-संघ-साहुसु पावं पडिणीययाए जं रइयं ।**
**अन्नेसु य पावेसुं इण्हिं गरिहामि तं पावं ।।५२।।**

**श्रुत-धर्म-सङ्घसाधुषु पापं प्रत्यनीकतया यद्रचितम् ।**
**अन्येषु च पापेष्विदानीं गर्हामि तत् पापम् ।।५२।।**

श्रुतं च धर्मश्च संघश्च साधवश्च **श्रुत-धर्म-सङ्घ-साधवस्तेषु पापं प्रत्यनीकतया** विद्विष्टभावेन

१. चातीता-ऽ३ ।

**यद् रचितम्** । तत्र श्रुतस्य द्वादशाङ्गरूपस्य तदध्यापकाध्येतॄणां च, यत् प्रत्यनीकतया पापं रचितम् 'अज्ञानमेव शोभन'मिति भणता अशकटापित्रेव पूर्वभवे ज्ञानिनां चेव इत्युक्तेरिति ।

धर्मप्रत्यनीकता कविला ! इत्थं पि इहयंपी ति भणता मरीचेरिव ।

तथा गुणरत्नपात्रभूत: सत्त्वसमूह: सङ्घ । उक्तञ्च -

**"सव्वो वि नाण-दंसण-चरणगुणविभूसियाण समणाणं ।**
**समुदायो पुण संघो गुणसमुदाऊ त्ति काऊण" ।। [ ]**

किञ्च –

**"तव नियम-नाणवेलो जयइ सयनाण-विमलपुन्नजलो ।**
**हेउसयलविउलवेगो संघ समुद्दो गुणविसालो" ।। [ ]**

एवंविधस्य सङ्घस्य प्रत्यनीकता सगरसुत जिष्णुकुमारादिजीवपूर्वभवचौराणामिव सम्मैतशैलशिखरं प्रति तीर्थयात्रायां गच्छत: सङ्घस्य विलोडकानाम्, [विलोपकानाम्,]

साधुप्रत्यनीकता गजसुकुमारं प्रति सोमिलस्येव ।

तथा सर्वेषां श्रुतधर्माऽर्हदाऽऽचार्योपाध्यायसाधूनां नमुचि-दत्त-गोशालकादय: प्रत्यनीकतायां ज्ञेया: ।

किञ्च –

**"आणाए अवट्टंतं जो अववूहिज्ज जिणवरिंदाणं ।**
**तित्थयरस्स सुयस्स य संघस्स य पच्चणीओ सो" ।।** [दर्शनशुद्धि-१९५]

तथा किञ्च –

**"गुणीण अणत्थं जो मोहविमोहिओ नरो कुणइ ।**
**सोऽणत्थजलसमुद्दे अप्पाणं खिवइ धुवमेयं" ।।**

तथा विशेषेण सङ्घप्रत्यनीकतायां दोषो दर्श्यते तथाहि –

**"पत्तो ताडण-बंधण-अवमाण जणिय विविहदुक्खाइं ।**
**संघावमाणणा तरुवइस्स कुसुमुग्गमो एसो" ।। [ ]**
**"नरय तिरिय कुमाणुस-कुदेव-गइ गमण-संकडापडिओ ।**
**जमणंतभवे भमिहिसि तं पुण विरसं फलं होही" ।। [ ]**

"जो अवमण्णइ संघं पावो थेवं पमायमचलित्ते ।
सो अप्पाणं बोलेइ दुक्खमहासागरे भीमे" ।। [ ]
"सिरि समणसंघ आसायणाए पाविंति जं दुहं जीवा ।
तं साहिओ समत्थो जइ परि भगवं जिणो होइ" ।। [ ]

तथा **अन्येष्वपि पापेषु** अष्टादशसु प्राणातिपातादिषु विषयभूतेषु यत् किमपि **पापं** जीवव्यपरोपणादि कृतं **तदप्यधुना गर्हामीति** गाथार्थः ।।५२।।

यच्चोक्तम् – 'अन्नेसु य पावेसुं' तदेव व्यक्तीकुर्वन्नाऽऽह –

**अन्नेसु य जीवेसु य मित्ती-करुणाइ गोयरेसु कयं ।**
**परियावणाइदुक्खं इण्हिं गरिहामि तं पावं ।।५३।।**

**अन्येष्वपि जीवेषु च मैत्रीकरुणादिगोचरेषु कृतम् ।**
**परितापनादिदुःखमिदानीं गर्हामि तत्पापम् ।।५३।।**

**अन्येष्वपि जीवेषु** तीर्थकरादिव्यतिरिक्तेषु-तद्यथा पृथिव्यप्तेजोवायुसाधारणवनस्पतिषु सूक्ष्म-बादरपर्याप्त झअपर्याप्तट भेदेन चतुर्विधेषु सर्वमीलने विंशतिषु तथा प्रत्येकवनस्पति-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियेषु पर्याप्ताऽपर्याप्तभेदेनाष्टसु । तिर्यग्पञ्चेन्द्रियेषु जलचर-स्थलचर-खचर-उरपरिसर्प-भुजपरिसर्पेषु पञ्चसु संज्ञ्यसंज्ञिभेदेन दशसु । पर्याप्तादिना[१] विंशतिसङ्ख्येषु । तथा नारकेषु पृथ्वीभेदेन सप्तसु पर्याप्तादिना चतुर्दशसु तथा कर्माकर्मभूमिजाऽन्तरद्वीपजमनुजेषु[२] पञ्चदशत्रिंशत्-षट्पञ्चाशत्सङ्ख्येषु पर्याप्ताऽपर्याप्तभेदेन द्विरुत्तरशतद्वयमानेषु संज्ञिमनुष्येषु एतद्वान्तादि-भवाऽपर्याप्तेषु असंज्ञिमनुष्येषु एकोत्तरशतमानेषु, दशविधभवनपतिषु, पञ्चदशविधेषु परमाधार्मिकयुक्तेषु पर्याप्ताऽपर्याप्ताऽऽदिना षट्सङ्ख्येषु नवलोकान्तिकेषु पर्याप्तादिना-ऽष्टादशमानेषु । एतेषु जीवेषु पृथिव्यादिषु लोकान्तिकपर्यन्तेषु सर्वेषु सर्वसङ्ख्यया त्रिषष्ट्यधिक-पञ्चशतसङ्ख्येषु । कथम्भूतेषु ? **मैत्रीकारुण्यादिगोचरेषु** मैत्री-कारुण्य-माध्यस्थ्य(स्य) विधेयतया गोचरो विषयो येषां ते तथा तेषु कृतं निष्पादितं 'परियावणा' इति **परितापनादिदुःखम्,** परितापनादिमध्यपदग्रहणात् तुलादण्डन्यायेनाऽभिहतादिभिर्दशभिस्तेषु जीवेषु यत् किमपि दुःखं कष्टं कृत**मिदानीं तदपि पापं गर्हामि** आलोचयामि इति यावत् इति गाथार्थः ।।५३।।

१. पर्याप्तिना-डर, ड३, २. द्वीपमनुजेषु-डर, ड३ ।

अथोपसंहारमाह –

**जं मण-वय-काएहिं कय-कारिय-अणुमईहिं आयरियं ।**
**धम्मविरुद्धमसुद्धं सव्वं गरिहामि तं पावं ।।५४।।**

**यत् मनोवचनकायैः कृतकारितानुमतिभिराचरितम् ।**
**धर्मविरुद्धमशुद्धं सर्वं गर्हामि तत्पापम् ।।५४।।**

**यत्** [१] पापमकृत्यं **मनोवाक्कायैः** रागद्वेषमोहाज्ञानहेतुभूतैः[२] **कृतकारिताऽनुमतिभिराचरितं** विहितं **धर्मस्य** जिनधर्मस्य **विरुद्धं** प्रतिकूलं सूत्रनिषिद्धमत एव **सदोषं सर्वं** समस्तमपि **तत् पापं गर्हामि** अपुनःकरणेनाऽङ्गीकरोमि गुरुसन्निधावालोचयामी इति तात्पर्यार्थः ।।५४।।

उक्तो द्वितीयोऽर्थाधिकारः, अधुना तृतीयोऽर्थाऽधिकारः [तं] प्रतिपादयन्नाऽऽह –

**अह सो दुक्कडगरिहादलिउक्कडदुक्कडो फुडं भणइ ।**
**सुकडाणुरायसमुइन्नपुन्नपुलयंकुरकरालो ।।५५।।**

**अथ स दुष्कृतगर्हादलितोत्कटदुष्कृतः स्फुटं भणति ।**
**सुकृतानुरागसमुदीर्णपुण्यपुलकाङ्कुरकरालः ।।५५।।**

अथाऽनन्तरं **स** साधुप्रभृतिको जीवः । कथम्भूतो ? **दुष्कृतगर्हया** दुश्चरितनिन्दनेन दलितानि चूर्णीकृतानि उत्कटानि दुष्कृतानि येन स **दलितोत्कटदुष्कृतः** प्रतिहतमहापातकनिकर इत्यर्थः स्फुटं प्रकटं **भणति** । पुनः कैः गुणैः ? इत्याह **सुकृताऽनुरागेण** सुचरितबहुमानेन समुत्पन्नाः **समुदीर्णाः** सञ्जाता वा पुण्यबन्धहेतुत्वात् **पुण्याः** पवित्राः ये **पुलकाङ्कुराः** रोमोद्गमविशेषास्तैः **करालो** भीषणः कर्मवैरिणं प्रतीतिशेष इति गाथार्थः ।।५५।।

यद्भणति तद् गाथाद्वयेनाऽऽह –

**अरिहत्तं अरिहंतेसु, जं च सिद्धत्तणं च सिद्धेसु ।**
**आयारं आयरिएसु, उज्झायत्तं उवज्झाएसु ।।५६।।**

**अर्हत्त्वमर्हत्सु, यच्च सिद्धत्वं च सिद्धेषु ।**
**आचारमाचार्येषु, उपाध्यायत्वमुपाध्यायेषु ।।५६।।**

---

१. पापं कृतं-डर, ड३, २. मोहाज्ञानैः हेतुभूतैः डर ।

**साहूणं साहुचरियं, देसविरइं च सावगजणाणं ।**
**अणुमन्ने सव्वेसिं, सम्मत्तं सम्मदिट्ठीणं ।।५७।।**

**साधूनां साधुचरितं च, देशविरतिं च श्रावकजनानाम् ।**
**अनुमन्ये सर्वेषाम्, सम्यक्त्वं सम्यग्दृष्टीनाम् ।।५७।।**

**अर्हत्त्वं** तीर्थकरत्वं योजनप्रमाणवाण्या भविकनिकरप्रतिबोधकत्वं समवसरणादिमहिमोपभोक्तृत्वमित्यादि । उक्तञ्च -

**"तित्थयरनामकम्मखयट्ठा तहय चेव सा भव्वा ।**
**धम्मं कहेइ अरिहा पूयं वा सोवए तं च" ।।**
[23] **"अणुलोमहेउ तस्सीलया य जे भावतित्थमेयंतु ।**
**कुव्वंति पगासंति य ते तित्थयरा हियत्थकरा** ।। [बि.आ.भा. १०४७] इति ।

तेषु तीर्थकरेष्व**र्हत्सु** तदनुमन्येऽहमिति सम्बन्धः । यञ्च [१]सिद्धत्तं सदा केवलज्ञानोपयुक्तत्वम्, सर्वकर्म-विमुक्तत्वं निरुपमसुखभोक्तृत्वमित्यादि **सिद्धेष्वनु**मन्ये इति । तथा **आचारं** ज्ञान-दर्शन-चारित्र-तपोवीर्यरूपं पञ्चविध**माचार्येष्व**नुमन्ये इति । तथा **उपाध्यायकत्वं** सिद्धान्ताऽध्यापकत्व**मुपाध्यायेष्व**नुमन्ये इति । उक्तञ्च –

[24] **"तेसि नमो तेसि नमो भावेण पुणो पुणोऽवि तेसि नमो ।**
**अणुवकयपरहियपरा जे [२]नाणं बिंति भव्वाणं"** ।। [पञ्चवस्तु-१६००]

**साहूणंत्ति** साधूनां सामायिकादिविशिष्ट-प्रमत्तादि-पुलाकादि-जिनकल्पिक-प्रतिमाकल्पिक-यथालन्द-कल्पिक-परिहारविशुद्धिकस्थितकल्पिकाऽस्थितकल्पिक-कल्पातीत-प्रत्येकबुद्धस्वयंबुद्ध-बुद्धबोधितभेदानां सुषमादिकालविशेषितानां **साधुचरितं** चरण-करणादिक्रियाकलापं ज्ञान-दर्शन-चारित्रधारित्वं समभावित्वमसहायसहायत्वमित्याद्यनुमन्ये । तथा सम्यक्त्वाणुव्रतैकादशोपासकप्रतिमादिरूपां **देशविरतिं** च श्रान्ति पचन्ति तत्त्वार्थश्रद्धानं निष्ठां नयन्तीति श्राः, वपन्ति गुणवत् सप्तक्षेत्रेषु धनबीजानि क्षिपन्तीति वाः, किरन्ति क्लिष्टकर्मरजो विक्षिपन्तीति, काः श्राश्च वाश्च काश्च श्रावकास्ते च ते जनाश्च **श्रावकजनास्तेषां** जनानां श्रावकत्व**मनुमन्ये** इत्यर्थः ।

उक्तञ्च – **"सम्ममणुव्वय-गुणव्वय-सिक्खावयत्तं उवासगपडिमा ।**
**एयाइ देसविरयत्तपालगा सावगा धन्ना"** ।। [ ]

१. शिवत्वं सदा-ड२, ड३, २. जे एयं दिंति जीवाणं मुद्रितपञ्चवस्तुके । 23-24-परि-२ ।

तथा सर्वेषां सम्यक् तत्त्वं सम्यक्त्वं जिनोक्ततत्त्वश्रद्धानरूपम्, उक्तञ्च –

**"जियराग-दोस-मोहेहिं भासियं जमिह जिणवरिंदेहिं ।**
**तं चेव होइ तत्तं इय बुद्धी होइ सम्मत्तं" ।। [ ]**

तदेतत् सम्यक्त्वमनुमन्ये अनुमोदयामि, केषामिति ? सम्यगविपर्यस्ता दृष्टिर्दर्शनं येषां ते सम्यग्दृष्टयस्तेषां सम्यग्दृष्टीनामविरतानामपि देवैरप्यचाल्यसम्यक्त्वानां श्रेणिकादीनामिवेत्यर्थः ।।५७।।

अथ कियन्त्यनुमोदनास्थानान्युच्यन्ते इति सर्वसङ्ग्रहमाह –

**अहवा सव्वं चिय वीयरायवयणाणुसारि जं सुकडं ।**
**कालत्तए वि तिविहं अणुमोएमो तयं सव्वं ।।५८।।**

**अथवा सर्वमेव वीतरागवचनानुसारि यत् सुकृतम् ।**
**कालत्रयेऽपि त्रिविधमनुमन्यामहे तत्सर्वम् ।।५८।।**

**अथवा सव्वं चिय त्ति** चिय एवाऽर्थे, ततः सर्वमेव **वीतरागवचनाऽनुसारि** जिनमताऽनुयायि **यत् सुकृतं** किञ्चिद् दृश्यते तत् – तथा

**"जिणभवण-बिंबकारण पइट्ठसिद्धंत पुत्थयलिहणं ।**
**रह- तित्थजत्त-मुणिदाण-संघवच्छल्लगाइयं" ।। [ ]**

अन्नं च - **"नाण-दंसण-उवहाणपहाणविणयचरणगुणो ।**
**जिणसासणप्पभावण उवसमसंवेगमाइयं" ।। [ ]** इति

एवमाद्यन्यदपि जिनशासनोक्तं पुण्यबन्धप्रबन्धजनकं **कालत्रयेऽपि त्रिविधं** मनो-वाक्-कायैः कृतं कारितमनुमोदितमनुमोदयामो **अनुमन्यामहे तत्कं सर्वमिति** गाथार्थः ।।५८।।

तदयमभिहितः सुकृतानुमोदनालक्षणस्तृतीयोऽर्थाऽधिकारः । अथ चतुःशरणादिकुर्वतो यद् भवति तद् गाथाद्वयेन दर्शयन्नाऽऽह –

**सुहपरिणामो निच्चं, चउसरणगमाइ आयरं जीवो ।**
**कुसलपयडीओ बंधइ, बद्धाउ सुहाणुबंधाओ ।।५९।।**

**शुभपरिणामो नित्यं चतुःशरणगमनादिराचरन् जीवः ।**
**कुशलप्रकृतीर्बध्नाति, बद्धाः शुभानुबन्धाः ।।५९।।**

**मंदणुभावा बद्धा, तिव्वणुभावाओ कुणइ ता चेव ।**
**असुहाओ निरणुबंधाओ, कुणइ तिव्वाओ मंदाओ ।।६०।।**

**मन्दानुभावा बद्धाः, तीव्रानुभावाः करोति ता एव ।**
**अशुभा निरनुबन्धाः करोति तीव्राश्च मन्दाः ।।६०।।**

**शुभपरिणामः** प्रशस्तपरिणामो **नित्यं** सदैव **चतुःशरणगमनादि** चतुःशरणगमनदुष्कृतगर्हा-सुकृताऽनुमोदनान्या**चरन्** कुर्वन् साधुप्रभृतिको **जीवः कुशलप्रकृतीः** पुण्यप्रकृतीर्द्वाचत्वा-रिंशत्सङ्ख्या **बध्नाति,** ताश्चेमाः-

**"सा उच्चगोयमणुदुग-सुरदुगपंचिंदिजाइ पणदेहा ।**
**आइतितणुणुवंगा, आइमसंघयणसंठाणा" ।।**

**"वन्नचउक्कागुरुलहुपरघाउस्सासआयवुज्जोयं ।**
**सुभखगइनिमिणतसदससुरनरतिरियाउ तित्थयरं"** ।। [श्रीनवतत्त्वप्रकरण १५-१६]

[इति] मूलप्रकृतीश्च बध्नन् सप्तविधबन्धको वा षड्विधबन्धको वा एकविधबन्धको वा भवतीति । तदाह –

[25]**"सत्तविहबंधगा हुंति, पाणिणो आउवज्जिआणं तु ।**
**तह सुहुमसंपराया, छव्विहबंधा विणिद्दिट्ठा" ।।**

[26]**"मोहाउयवज्जाणं, पयडीणं ते उ बंधगा भणिया ।**
**उवसंतखीणमोहा, केवलिणो एगविहबंधा" ।।**

[27]**"ते पुण दुसमयट्ठिइगस्स बंधगा न उण संपरायस्स ।**
**सेलेसीपडिवन्ना अबन्धगा हुंति विन्नेया"** ।। [श्रीपञ्चाशक ४०-४१-४२]

तथा ताश्च प्रकृती**र्बद्धाः** सती विशिष्टाऽध्यवसायवशात् **शुभानुबन्धा** शुभोत्तरकालफलविपाकाः करोतीतिगम्यमित्यर्थः ।।५९।।

**मंदऽणुभावा बद्धा** इति ता एव [1]शुभप्रकृतीर्मन्दानुभावा बद्धा अल्पशुभपरिणामा बद्धा-विशिष्टतरशुभाध्यवसायविशेषा**त्तीव्रानुभावा** [2]अत्युत्कटरसाः करोति ।

१. मन्दानुभावबद्धा ड२, ड३, २. टतमाः ड२, ड३ । 25-26-27-परि-२ ।

किञ्चाऽल्पस्थितिका दीर्घकालस्थितिः करोत्यल्पप्रदेशिका बहुप्रदेशिकाश्च करोति । तथा **असुहाउ'त्ति** याश्चाऽशुभा द्व्यशीतिसङ्ख्याः **नाणंऽतराय दसगं** [नवतत्त्व प्र. गा. १८] इत्यादिकाः पापप्रकृतीः पूर्वं बद्धा अथवा बद्ध्यमानास्ता **निरनुबन्धा**स्तद्विपाकजननदुःखरहिताः **करोति** । तथा **तीव्राश्च** ताः सतीः शुभपरिणामेनैव **मन्दानुभावा** अल्पविपाकाः करोति, किञ्च दीर्घकालस्थिति-रल्पकालस्थितिः करोति । बहुप्रदेशिका अल्पप्रदेशिकाः करोति । उक्तञ्च –

[28] **"सव्वपगईणमेवं परिणामवसा दुवक्कमो भणिओ ।।**
**पायमनिकाइयाणं तवसा उ निकाइयाणं पि"** ।। [वि.आ.भा.२०४६] इति गाथाभावार्थः ।।६०।।

यस्मादेतच्चतुःशरणाद्युक्तहेतुभिर्महाफलमतश्चावश्यमेव कर्तव्यमिति दर्शयन्नाऽऽह –

**ता एयं कायव्वं बुहेहिं निच्चं पि संकिलेसम्मि ।**
**होइ तिकालं सम्मं असंकिलेसम्मि सुगईफलं ।।६१।।**
**तस्मादेतत्कर्त्तव्यं बुधैः नित्यमपि सङ्क्लेशे ।**
**भवति त्रिकालं सम्यकसङ्क्लेशे सुगतिफलम्' ।।६१।।**

**ता इति** तस्मात् कारणा**देतद**नन्तरोदितं चतुःशरणादि **कर्त्तव्यं** विधेयं **बुधै**रवगततत्त्वै**र्नित्यमपि** सततमपि यथा कर्षकैः शाल्यादिशस्यनिमित्तं बीजमुप्तं सत् पलालाद्यानुषङ्गिकं जनयन् शस्यसम्पत्तये भवत्येवं चतुःशरणाद्यपि कर्मनिर्जरायै क्रियमाणमिहलोकेऽपि रोगाद्युपसर्गोपशान्तयेऽपि स्यादिति दर्शयति **संकिलेसम्मि** त्ति संक्लेशे रोगाद्यापदि निरन्तरं कर्त्तव्यम्, क्रियमाणं तदुपशमाय स्यादिति तथा **भवति त्रिकालं** त्रिसन्ध्यं विधीयमानं सम्यक् मनोवाक्कायोपयुक्ततया **'असंकिलेसम्मि'** त्ति असंक्लेशे रोगाद्यभावे **सुगतिफलं** स्वर्गापवर्गगतिफलमित्यर्थः । उक्तं च –

**"उक्कोसं दव्वत्थय-माराहियं जाइ अच्चुयं जाव ।**
**भावत्थएण पावइ, अंतमुहुत्तेण निव्वाणं"** ।। [दर्शनशुद्धि० ८२] इति भावार्थः ।।६१।।

अथ योऽतीवदुर्लभां मानुषत्वादिसामग्रीमवाप्याऽपि प्रमादादिना न चतुःशरणादिकृतवान् तस्यान्त्यसमये मनसि पश्चात्तापः स्यादिति दर्शयन्नाऽऽह –

**चउरंगो जिणधम्मो न कओ, चउरंगसरणमवि न कयं ।**
**चउरंगभवच्छेओ न कओ, हा ! हारिओ जम्मो ।।६२।।**

28-परि-२ ।

**चतुरङ्गो जिनधर्मो न कृतः, चतुरङ्गशरणमपि न कृतम् ।**
**चतुरङ्गभवस्य छेदो न कृतो हा ! हारितं जन्म ।।६२।।**

चत्वारि दान-शील-तपो-भावनारूपाण्यङ्गानि यस्य सः **चतुरङ्गः** दानादिचतुःप्रकार इत्यर्थः, **जिनधर्मो**ऽर्हद्धर्मो **न कृतो** न विहित आलस्यमोहादिभिः कारणैर्विगतविवेकत्वात् । तथा न केवलं चतुरङ्गधर्मो न कृतः, किन्तु **चतुरङ्गशरण**मप्यर्हत्-सिद्ध-साधु-धर्मशरणमपि न कृतम् । तथा **चतुरङ्गभवस्य** नरक-तिर्यक्-नरा-ऽमरलक्षणस्य **छेदो** विनाशो विशिष्टचारित्रतपश्चरणादिना **न कृत** इति । **हा इति** खेदे, **हारितं** वृथा नीतं **जन्म** मानुषभवः, तस्य हारणं चाऽकृतधर्मत्वेनाऽतिशयेन [१]मानुषभवस्य पुनः दुष्प्रापत्वात्।

किञ्च –

**"न कयं दीणुद्धरणं, न कयं धम्मिअजणम्मि वच्छल्लं ।**
**हिययम्मि वीयराओ, न धारिओ हा हारिओ जम्मो"** ।। [आराधनापताका-७७४]

तथा देवा अप्यनेनैव प्रकारेणाऽकृतजिनजन्मादिमहोत्सवाश्च्यवनसमये खेदं कुर्वन्तीति –

**"न कयाइ मए महिमा, जिणकल्लाणेसु सुकयकल्लाण ।**
**मंदरगिरिनंदीसरमाईसु निसढकुडेसु"** ।। [आराधनापताका-७७५] इत्यादि ।।६२।।

अथ समस्ताऽध्ययनोपसंहारमाह –

**इय जीय ! पमायमहारिवीरभद्दंतमेयमज्झयणं ।**
**झाएसु तिसंझमवंझकारणं निव्वुइसुहाणं ।।६३।।**

**इति जीव ! प्रमादमहारिवीरं भद्रान्तमेतदध्ययनम् ।**
**ध्याये त्रिसन्ध्यमवन्ध्यकारणं निर्वृतिसुखानाम् ।।६३।।**

**इत्युक्त**प्रकारेण **जीय त्ति** हे जीव ! आत्मन् ! **पमायमहारि** त्ति प्रमादा एव महान्तोऽरयः शत्रवः प्रमादमहारयः, महारित्वं चैषां तद्वशवर्त्तिनोऽतिशयर्द्धिश्रुतसम्पदुपेता अपि च [२]दुर्गतिभाजो भवन्तीति यदाह –

**"आहारगा वि मणनाणिणो वि सव्वोवसंतमोहा वि ।**
**हुंति पमायपरवसा तयणंतरमेव चउगइया"** ।। [हितोपदेश-४८९]

---

१. मानुषत्वस्य ड३ । २. चतुर्गतिभाजो-ड३ ।

तथा –

**"पमाएणं महासूरी संपुन्नसुयकेवली ।**
**अणंताणंतकालं तु ऽणंतकायंमि संवसे"** ।। [ ]

किञ्च –

**"जेसिं तु पमाएणं, गच्छइ कालो निरत्थओ धम्मो ।**
**ते संसारमणंतं, हिंडंति पमायदोसेण"** ।।

**"तम्हा खलुप्पमायं, चईऊणं पंडिएण पुरिसेण ।**
**दंसण-नाण-चरित्ते, कायव्वो अप्पमाओ य"** ।। [उत्तरा० सू- ५२६-५२७]

ततः प्रमादमहारीणां वीरवद्**वीरं** प्राकृतत्वादनुस्वारलोपः सुभटकल्पमित्यर्थः **भद्रं** कल्याणमन्ते यस्मात् तद्**भद्रान्तं** मोक्षप्रापकमित्यर्थः अथवा वीरभद्रान्तं अन्त्याराधनान्तं यावदै**वेतदध्ययनं ध्यायन्** स्मरन् **त्रिसन्ध्यं** सन्ध्यात्रये कथम्भूत**मवन्ध्यकारणं** सफलकारणम्, केषाम् ? **णिव्वुइ सुहाणं** निर्वाणं निर्वृतिर्मोक्ष इत्यर्थः । तत्स्वरुपमेवम् –

**"जत्थ न जरा न मच्चू न वाहिणो नेय सव्वदुक्खाइं ।**
**तिहुयणसुक्खाओ परं नवरं पुण अणुवमं सुक्खं"** ।। इति –

तस्या निर्वृतेः सुखानि तत्सुखानि तेषामित्यर्थः । अथ च शास्त्रकर्त्तुः समासगर्भमस्यां गाथायामभिधानं ज्ञातव्यम् । तथाहि - इतिरुल्लेखो जितप्रमादमहारिश्चासौ वीरभद्रश्च जितप्रमादमहारिवीरभद्रस्तस्येदं तदेवोक्तलक्षणमध्ययनं ध्यायेत्यादि शेषं पूर्ववत् । अथ गुरुसम्प्रदायः - श्रीवीरजिनवरसत्कचतुर्दशसहस्रसाधुमध्यवर्त्तिश्रीवीरभद्रसाधुकृतं चतु:शरणाख्यं प्रकीर्णकमित्यर्थः ।। उक्तञ्च –

**"चउदससहस्साइं पयन्नाणं तु वद्धमाणस्स ।।**
**सेसाण जत्तिया खलु सीसा पत्तेयबुद्धा वा"** ।। [व्यव. भा० ४६७१]

।। समाप्तं चतु:शरणप्रकीर्णकविवरणम्[१] ।।

।। ग्रन्थाग्रश्लोक-१०८०।।

।। शुभं भवतु कल्याणमस्तु ।।

**।। वैक्रमीये २०६४ तमे वर्षे विजयकीर्तियशसूरिणा संशोधितं सम्पादितञ्चेदं श्रीचिरन्तनाचार्यरचितबृहद्विवरणान्वितं श्रीवीरभद्रगणिप्रणीतं श्रीचतु:शरणप्रकीर्णकं समाप्तम् ।।**

१. समाप्तचतु:शरणाध्ययनविवरणं । ग्रन्थाग्रं-१०८० । विनयराजगणि-डर ।

# आगम-

# श्रीचतुःशरणप्रकीर्णकम्

## खण्ड - २

- पू.आचार्यश्रीसोमसुन्दरसूरिकृतावचूरियुतं,
- पू.आचार्यश्रीगुणरत्नसूरिकृतवृत्तिसहितं च
- श्रीचतुःशरणप्रकीर्णकम् ।

स्वकृतं दुष्कृतं गर्हन्, सुकृतं चाऽनुमोदयन् ।
नाथ ! त्वच्चरणौ यामि, शरणं शरणोज्झितः ।।१।।

मनोवाक्कायजे पापे, कृतानुमतिकारितैः ।
मिथ्या मे दुष्कृतं भूया-दपुनःक्रिययान्वितम् ।।२।।

यत्कृतं सुकृतं किञ्चिद्, रत्नत्रितयगोचरम् ।
तत्सर्वमनुमन्येऽहं, मार्गमात्रानुसार्यपि ।।३।।

सर्वेषामर्हदादीनां, यो योऽर्हत्त्वादिको गुणः ।
अनुमोदयामि तं तं, सर्वं तेषां महात्मनाम् ।।४।।

त्वां त्वत्फलभूतान्, सिद्धां-स्त्वच्छासनरतान् मुनीन् ।
त्वच्छासनं च शरणं, प्रतिपन्नोऽस्मि भावतः ।।५।।

श्रीवीतरागस्तोत्रे कलिकालसर्वज्ञपूज्यपादाचार्यदेवश्रीमद्विजयहेमचन्द्रसूरीश्वराः

श्रीमत्तपागच्छपुरन्दरश्रीसोमसुन्दरसूरिविरचितावचूरियुतं तार्किकरत्नपूज्यपादाचार्यदेव-
श्रीमद्गुणरत्नसूरिकृतवृत्तिसहितं

श्रीकुशलानुबन्ध्यध्ययनरूपं

# श्रीचतुःशरणप्रकीर्णकम्

**सोम०** इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात् श्रेयोभूतम् । अतस्तदारम्भे ग्रन्थकृन्मङ्गल-रूपसामायिकाद्यावश्यकार्थकथन-भावमङ्गलकारणद्रव्यमङ्गलभूतगजादि१४स्वप्नोच्चार-व्याजसर्वतीर्थकृद्गुणस्मरण-वर्तमानतीर्थाधिपतिश्रीवीरनमस्करणरूपं मङ्गलत्रयमाह- 'सावज्जे'ति, अथवा षडावश्यकयुतस्यैव प्रायश्चतुःशरणप्रतिपत्त्यादियोग्यता स्यादतः प्रथमं षडावश्यकमाह-

**गुण०** नमः श्रीसर्वज्ञाय ।

**सावज्जजोगविरई उक्कित्तण गुणवओ य पडिवत्ती ।**
**खलियस्स निंदणा वणतिगिच्छ गुणधारणा चेव ।।१।।**

**सोम०** '**सावज्जे**'त्यादि, सहावद्येन पापेन वर्तन्ते इति सावद्याः योगा मनोवाक्कायव्यापारास्तेषां विरतिर्निवृत्तिः **सावद्ययोगविरतिः** सा सामायिकेनैव क्रियते इत्यध्याहार्यम् १, **उत्कीर्त्तनं** जिनगुणानामुत्कीर्त्तना, सा चतुर्विंशतिस्तवेन क्रियते २, गुणा ज्ञानदर्शनचारित्राद्यास्ते विद्यन्ते येषां ते गुणवन्तो गुरवस्तेषां प्रतिपत्तिर्भक्तिर्**गुणवत्प्रतिपत्तिः** सा वन्दनकेन क्रियते ३, स्खलनं **स्खलितं** आत्मनोऽतिचारापादनं तस्य **निन्दनं** निन्दना न पुनः करिष्यामीत्यभ्युपगमनं सा प्रतिक्रमणेन क्रियते ४, चिकित्सनं चिकित्सा **व्रणस्या**तिचाररूपभावव्रणस्य **चिकित्सा** प्रतीकाररूपा सा कायोत्सर्गेण क्रियते ५, **गुणा** विरत्यादयो मूलगुणोत्तरगुणरूपास्तेषां धारणं **धारणा** सा प्रत्याख्यानेन क्रियते ६, **चेवे** ति षण्णामपि समुच्चये ।।१।।

**गुण०** सहावद्येन पापेन वर्तन्त इति सावद्याः, युज्यन्त इति योगा मनोवाक्कायव्यापाराः, सावद्याश्च ते योगाश्च **सावद्ययोगाः,** विरमणं विरतिस्तेषां विरतिस्त**द्विरतिः,** सामायिकेन क्रियते इत्यध्याहार्यम् । उत्कीर्तन**मुत्कीर्तना** सा चतुर्विंशतिस्तवेन क्रियते । गुणा ज्ञानदर्शन-चारित्राद्यास्ते विद्यन्ते येषां ते गुणवन्तस्तेषां प्रतिपत्तिर्भक्ति**र्गुणवत्प्रतिपत्तिः,** सा वन्दनकेन

क्रियते । तथा स्खलनं **स्खलितमा**त्मनः सातिचारकरणं तस्य निन्दनं **निन्दा** न पुनः करिष्यामीत्यभ्युपगमनं सा प्रतिक्रमणेन क्रियते । चिकित्सनं चिकित्सा व्रणस्यातिचाररूपभावव्रणस्य चिकित्सा **व्रणचिकित्सा,** सा कायोत्सर्गेण क्रियते । तथा गुणा विरत्यादयः, धरणं धारणा तेषां धारणा **गुणधारणा,** सा प्रत्याख्यानेन क्रियते । **चेवेति** समुच्चये ।।१।।

**सोम०** अथ किञ्चिद्विशेषत एतेषां सामायिकादीनां षण्णामपि स्वरूपं चारित्रविशुद्ध्यादिरूपं फलं चाह-

**गुण०** उक्तः सङ्क्षेपतः सामायिकाद्यर्थः, एतेषां षण्णामपि सामायिकादीनामाचारपञ्चकविशुद्धिलक्षणफलप्रदर्शनार्थं किञ्चिद्विशेषस्वरूपभणनार्थं गाथाषट्कमाह-

**चारित्तस्स विसोही कीरइ सामाइएण किल इहयं ।**
**सावज्जेयरजोगाण वज्जणाऽऽसेवणत्तणओ ।।२।।**

**सोम०** '**चारित्ते**'त्यादि, **चारित्रस्य** चारित्राचारस्य पञ्चसमितित्रिगुप्तिरूपस्य विशोधनं **विशोधि**र्निर्मलता **क्रियते,** केन ? **सामायिकेन** समभावलक्षणेन '**किले**'ति सत्ये '**इहयं**'ति इहैव जिनशासने नान्यत्र शाक्यादिदर्शने, तेषु सामायिकपरिभाषाया अप्यभावात् । कथं सामायिकेन विशोधिः क्रियते ? इत्याह-'**सावज्जे**'ति **सावद्याः** सपापा **इतरे** च निरवद्या ये **योगाः** कायादिव्यापारास्तेषां यथासङ्ख्येन ये वर्जनासेवने ताभ्यां **वर्जनासेवनतः** सावद्यानां वर्जनत इतराणां [इतरेषां] त्वासेवनतश्च तेन विशोधिः क्रियते इति तात्पर्यार्थः ।।२।।

**गुण०** चयस्य रिक्तीकरणाच्चारित्रम्, सूत्रस्य सूचकत्वात् **चारित्रस्य** चारित्राचारस्य, "**पणिहाणे**"त्यादि अष्टविधस्य विशोधनं **विशोधिः,** चारित्रस्य विशोधिश्चारित्रविशोधिः **क्रियते,** केन ? **सामायिकेन** समभावलक्षणेन **किले**ति सम्भावनायाम् । किं सम्भावयति ? '**इहयं**'त्ति इहैव जिनशासने, न शाक्यादिदर्शने, तद्दर्शनेषु सामायिक इति भाषाया अप्यभावात् । कथं च सामायिकेन विशोधिः क्रियते ? इत्याह-सावद्याः सपापा इतरे च निरवद्याश्च इतरे च [सावद्याश्च] सावद्येतरास्ते च ते योगाश्च **सावद्येतरयोगास्ते**षां वर्जना च आसेवना च वर्जनासेवने, ताभ्यां **वर्जनासेवनतः** यथासङ्ख्येन सावद्यानां वर्जनतः, इतराणां [इतरेषां] त्वासेवनतो विशोधिस्तेन क्रियते इति तात्पर्यार्थः ।।२।।

**सोम०** उक्ता च्चारित्राचारविशुद्धिः, अथ दर्शनाचारविशुद्धिमाह-

**गुण०**-उक्ता सामायिकेन चारित्राचारशुद्धिः, अथ दर्शनाचारशुद्धिमाह-

**दंसणायारविसोही चउवीसायत्थएण कज्जई य ।**
**अच्चब्भुयगुणकित्तणरूवेणं जिणवरिंदाणं ।।३।।**

**सोम०'दंसणे'**त्यादि, **दर्शनं**-सम्यक्त्वं **तस्याचारो**-निश्शङ्कितेत्याद्यष्टविधस्तस्य **विशोधि**र्निर्मलता चतुर्विंशतेरात्मनां-जीवानां तीर्थङ्करसम्बन्धिनां स्तवः क्रियते यत्र स **चतुर्विंशत्यात्मस्तवो** "लोगस्से"त्यादिरूपस्तेन **क्रियते, 'चउवीसाइत्थएणे'**ति पाठे जिनानां चतुर्विंशत्याः स्तवेनेत्यर्थः । चकारो द्वितीयावश्यकसमुच्चयार्थः । चतुर्विंशतिस्तवेन किम्भूतेनेत्याह-**'अच्चब्भुअ'** इत्यादि, **अत्यद्भुताः**-सर्वातिशायिनो लोकोद्योतकरादयो ये **गुणास्तेषां** यदु**त्कीर्त्तनं**-वर्णनं त**द्रूपेण** । केषां तदित्याह-**'जिनवरिंदाणं'** ति जिना रागादिजयादुपशान्तमोहादयस्तेषां मध्ये वराः-केवलिनस्तेषामिन्द्रा इव इन्द्रास्तीर्थङ्करा जिनवरेन्द्रास्तेषामित्यर्थः ।।३।।

**गुण०** दृश्यन्तेऽवबुध्यन्ते यथावस्थिततत्त्वरूपेण पदार्था अनेनेति दर्शनं सम्यक्त्वम्, तस्याचारो **दर्शनाचारः**, **"निस्संकिये"**त्याद्यष्टविधस्तस्य **विशोधि**श्चतुर्विंशतेरात्मनां जीवानां तीर्थङ्करसम्बन्धिनां स्तवनं स्तवः **क्रियते** यत्र स चतुर्विंशत्यात्मस्तवस्तेन **चतुर्विंशत्यात्मस्तवेन,** किम्भूतेन ? **अत्यद्भुता** अतिशायिनो लोकोद्योतकरादयो ये **गुणास्तेषां यदुत्कीर्त्तनं** वर्णनं **तद्रूपेण,** केषाम् ? रागादिजयाज्जिनाः उपशान्तमोहादयः तेषां मध्ये वराः घातिकर्मचतुष्टयक्षयेण सामान्यकेवलिनस्तेषामिन्द्रा इव इन्द्रास्तीर्थङ्करा **जिनवरेन्द्रास्ते**षामित्यर्थः ।।३।।

**सोम०** उक्ता चतुर्विंशतिस्तवेन दर्शनाचारशुद्धिरिदानीं ज्ञानाचारस्य चारित्राचारदर्शनाचारयोश्च विशेषेण शुद्धिमाह-

**गुण०** उक्ता चतुर्विंशतिस्तवेन दर्शनाचारविशुद्धिरिदानीं ज्ञानाचारशुद्धिमाह -

**नाणाईया उ गुणा, तस्संपन्नपडिवत्तिकरणाओ ।**
**वंदणएणं विहिणा कीरइ सोही उ तेसिं तु ।।४।।**

**सोम० 'नाणाईआ'** इति 'नाण'त्ति ज्ञानाचारः कालविनयाद्यष्टविधः, आदिशब्दाद्दर्शन-

चारित्राचारग्रहो, ज्ञानदर्शनचारित्रयुक्त एव वन्दनकार्हो नान्यः । ज्ञानवानपि पार्श्वस्थादिर्व्यवहारतश्चारित्रवानपि निह्नवादिरिति ज्ञापनार्थः । ज्ञानमादौ येषां ते ज्ञानादिकाः, **तुः** अवधारणे, एते ज्ञानादिका एव **गुणा** इत्यर्थः, तैर्ज्ञानादिगुणैस्सम्पन्ना युक्तास्तत्सम्पन्ना गुरवस्तेषां प्रतिपत्तिर्भक्तिस्तस्याः करणं तस्मात् **तत्सम्पन्नप्रतिपत्तिकरणाद्वि**नयकरणादित्यर्थः । केन ? **वन्दनकेन,** कथम् ? **विधिना** द्वात्रिंशद्दोषरहिततया पञ्चविंशत्यावश्यकविशुद्धतया च । **तेसिं तु** त्ति **तेषां** ज्ञानाचारादीनां **तुः** पुनरर्थे चारित्राचारदर्शनाचारयोः प्राक्शोधितयोरपि पुनर्विशेषेण **शोधिः क्रियते** इत्यर्थः ।।४।।

**गुण०** **"काले विणए"** इत्यादिकोऽष्टविधो **ज्ञानाचारो** गृहीतः, आदिशब्दाद् दर्शनाचारचारित्राचारग्रहः, यतो ज्ञानवानपि दर्शनचारित्रगुणयुक्त एव वन्दनकप्रतिपत्तियोग्यः । येन ज्ञानवन्तोऽपि पार्श्वस्थादयोऽवन्द्याश्चारित्ररहितत्वात् । तथा व्यवहारतश्चारित्रिणोऽपि निह्नवा न वन्दनकयोग्या जिनवचनाश्रद्दधानेन दर्शनाभावादित्यर्थः । **तु**रवधारणे। ज्ञानमादौ येषां ते **ज्ञानादिका** एते एव **गुणा** इत्यर्थः, **'तस्संपन्न'**त्ति तैर्ज्ञानादिगुणैः सम्पन्ना युक्तास्तत्सम्पन्नास्तेषां प्रतिपत्तिर्भक्तिस्तस्याः करणं तस्मा**त्तत्सम्पन्नप्रतिपत्तिकरणाद्वि**नयकरणादित्यर्थः । केन ? **वन्दनकेन,** कथम् ? **विधिना** विधिवद् द्वात्रिंशद्दोषरहिततया पञ्चविंशत्यावश्यकपरिशुद्धतया च **क्रियते शोधि**रिति । **तेषां** ज्ञानाचारादीनाम्, **तुः** पुनरर्थे चारित्राचारदर्शनाचारयोः शोधितयोरपि विशेषेण शोधनार्थः ।।४।।

**सोम०** उक्ता वन्दनकेन ज्ञानाद्याचारत्रयशुद्धिः, सम्प्रति प्रतिक्रमणकायोत्सर्गाभ्यां गाथाद्वयेन तामाह-

**गुण०** प्रतिपादिता वन्दनकेन ज्ञानादीनां शुद्धिः । पुनस्तेषामेव विशेषतो शुद्धिर्गाथाद्वयेन प्रतिक्रमणकायोत्सर्गाभ्यामेवाह-

**खलियस्स य तेसि पुणो विहिणा जं निंदणाइ पडिकमणं ।**
**तेण पडिक्कमणेणं तेसिं पि य कीरए सोही ।।५।।**

**सोम०** **स्खलितस्य** व्रतविषयस्यातिक्रमव्यतिक्रमादिप्रकारसञ्जातापराधस्य तथा **'तेसिं'**ति तेषां ज्ञानाचारादीनां **पुनः** प्रतिषिद्धकरणकृत्याकरणाश्रद्धानविपरीतप्ररूपणादिप्रकार-

सञ्जातातिचारस्य च **विधिना** सूत्रोक्तप्रकारेण **'जं निंदणाइ'** इति यन्निन्दनं निन्दनादुष्टं मयैतत्कृतमिति, आदिशब्दाद् गर्हादिग्रहः, गुरुसाक्षिकमात्मदोषाविष्करणं गर्हा, एवंप्रकारेण स्खलितस्य यन्निन्दनादिकरणं तस्माद्दोषजातान्निवर्त्तनं तत्प्रतिक्रमणमुच्यते इति शेषः, प्रतीपं क्रमणं **प्रतिक्रमणमि**ति व्युत्पत्तेः, अतः कारणा**त्तेन प्रतिक्रमणेन 'तेसिं पि य'**त्ति न केवलं सामान्यतो व्रतादिविषयापराधानाम्, किन्तु तेषामपि ज्ञानाचारादीनां **क्रियते** वि**शोधि**र्निर्मलतेति ।।५।।

गुण० **स्खलितस्य** व्रतविषयेऽतिक्रमादिना सञ्जातस्यापराधस्य **तेषां** ज्ञानाचारादीनाम्, कथम् ? **पुनरपि** प्रतिषिद्धकरणकृत्याकरणाश्रद्दधानविपरीतप्ररूपणादिषु **विधिना** सूत्रानतिक्रमेण **यन्निन्दनं**-दुष्टं मयैतत्कृतमिति परसाक्षिकमात्मदोषाविष्करणम्, न पुनः करिष्यामीति यदुररीकरणम्, तस्माद्दोषजातान्निवर्त्तनं तत्**प्रतिक्रमणमु**च्यते, अतः कारणा**त्तेन प्रतिक्रमणेन तेषामपि च** ज्ञानाचारादीनां **क्रियते शोधिः** यदाह -

**भगवान् सुधर्मा - पडिक्कमणेणं भंते जीवे किं जणइ ?**
**पडिक्कमणेण वयछिद्दाइ पिहेइ** ।।५।। [उत्तराध्ययने २९ अ०]

**चरणाइयाइयाणं जहक्कमं वणतिगिच्छरूवेणं ।**
**पडिकमणासुद्धाणं सोही तह काउसग्गेणं ।।६।।**

सोम० **'चरणाइय'**त्ति चरणं चारित्रमतिगच्छन्त्यतिक्रामन्तीति चरणातिगा अतिचारा इति दृश्यम्, ते आदौ येषां ते चरणातिगादिकाः-सर्वेऽप्यतिचारास्तेषां चरणातिगादिकानाम् । कथम्भूतानाम् ? **प्रतिक्रमणेन**-प्रागुक्तेना**शुद्धानाम**र्द्धशुद्धानां वा **शुद्धिस्तथैव** प्रागुक्तप्रकारेण क्रियते । केन ? **कायोत्सर्गेण,** किम्भूतेन ? **जहक्कमं वणतिगिच्छ** त्ति यथाक्रमं क्रमप्राप्तेन **"आलोअण पडिकमणे"** इतिगाथोक्तदशविधप्रायश्चित्तमध्ये पञ्चमप्रायश्चित्तेन **वण** त्ति द्रव्यभावभेदेन द्विधा व्रणम्, तत्र द्रव्यव्रणः कण्टकभङ्गादिजनितो भावव्रणस्त्वतिचारशल्यरूपस्तस्य भावव्रणस्य चिकित्सा प्रतीकारः । सैव रूपं यस्य कायोत्सर्गस्य, स **व्रणचिकित्सारूपस्**तेन कायोत्सर्गेणातिचाराः शोध्यन्ते इति भावः, महन्निर्जराकारणत्वात् [महानिर्जरा...] तस्य । प्राक् "नाणाईआ" इत्यत्र ज्ञाननयप्राधान्याश्रयणात् ज्ञानादय इत्युक्तम्, "चरणाइआ" इत्यत्र तु क्रियानयप्राधान्याश्रयणाच्च विवक्षया चरणादय इति ।।६।।

**गुण०** चरणमतिगच्छन्त्यतिक्रामन्तीति चरणातिगास्ते आदौ येषां ते **चरणातिगादिका** अतिचारा इति दृश्यम् तेषां **यथाक्रमं** क्रमप्राप्तेन पञ्चमप्रायश्चित्तेन द्रव्यभावभेदेन द्विधा व्रणस्तत्र द्रव्यव्रणः कण्टकादिः भावव्रणस्त्वतिचारशल्यरूपस्तस्य या चिकित्सा प्रतीकारः सैव रूपं यस्य सः, तेन **व्रणचिकित्सारूपेण** तत्प्रतीकारकारणत्वात्, चरणातिगादिकानां कथम्भूतानाम् ? **प्रतिक्रमणेन अशुद्धानाम**र्धशुद्धानां वा तथैव **शुद्धिः** क्रियते, **कायोत्सर्गेण** ते शोध्यन्त इत्यर्थः, कायोत्सर्गस्य महन्निर्जराकारणत्वात् [महानिर्जरा...]

तथाहि - **जह करगओ निकिंतइ, दारुं इंतो पुणो वि वच्चंतो ।**
**इय कंत्तंति सुविहिया, काउस्सग्गेण कम्माइं** ।। [आव.नि. २३७]
**काउस्सग्गे जह, सुट्ठियस्स भज्जंति अंगुवंगाइं ।**
**इय भिंदति मुणिवरा, अट्ठविहं कम्मसंघायं** ।। [आव.नि. १५५१]
**तम्हा उ निम्ममेणं, मुणिणा उवलद्धसुत्तसारेण ।**
**काउस्सग्गो उग्गो, कम्मक्खयट्ठाय कायव्वो** ।। [आव.नि.१५५४]

ननु "नाणाईआ उ गुणा" इत्यत्र ज्ञानादय इत्युक्तम् । "चरणाइआणमि"त्यत्र चरणादय इति तत्कोऽत्र विशेषः ? उच्यते- एकत्र ज्ञाननयप्राधान्याश्रयणेन ज्ञानादय इत्युक्तम् । अपरत्र क्रियानयप्राधान्यविवक्षणेन चरणादय इति ।।६।।

**सोम०** एवं गाथापञ्चकेनाचारत्रयस्य शुद्धिरुक्ता, अथ तपोवीर्याचारयोस्तामाह-

**गुण०** वर्णिता आचारत्रयशुद्धिर्गाथापञ्चकेन, अथ तुर्यपञ्चमाचारावेकगाथयैवाह-

**गुणधारणरूवेणं पच्चक्खाणेण तवइयारस्स ।**
**विरियायारस्स पुणो सव्वेहि वि कीरए सोही ।।७।।**

**सोम० 'गुणधारणे'**त्यादि, गुणा विरत्यादय उत्तरोत्तरा यथा विरतेराश्रवद्वारस्थगनं तत्स्थगनात्तृष्णाव्यवच्छेदस्तद्व्यवच्छेदादतुलोपशमस्तस्मात्प्रत्याख्यानशुद्धिस्तच्छुद्धेश्चारित्र-नैर्मल्यं तस्मात्कर्मविवेकस्तस्मादपूर्वकरणमपूर्वकरणात्केवलज्ञानं ततश्च मोक्षो भवतीति, तेषां गुणानां धारणं गुणधारणं तदेव रूपं यस्य तेन **प्रत्याख्यानेन- "अणागयमइक्कंतं"** इत्यादिदशविधेन । अथवा पञ्चमहाव्रतद्वादशश्राद्ध-व्रतनमस्कारसहितादिदशप्रत्याख्यानरूपसप्तविंशतिविधेन वा **तपआचारातिचारस्य-**

**"बारसविहंमिवि तवे"** इति गाथोक्तस्य शुद्धिः क्रियते इति संटङ्कः । **'विरिया-यारस्स'त्ति** विशेषेणेरयति प्रवर्त्तयत्यामानं तासु तासु क्रियास्विति वीर्यं तपोवीर्य-गुणवीर्य-चारित्रवीर्य-समाधिवीर्य-आत्मवीर्यभेदभिन्नं पञ्चविधं तस्याचारो वीर्याचारः **"अणिगूहिअबलविरिए"** इत्यादिकस्तस्य **सर्वैरपि** पूर्वोक्तैः षड्भिरप्यावश्यकैः **शुद्धिः क्रियते,** अन्यूनाधिकावश्यककरणप्रयत्नेन वीर्याचारशुद्धिर्भवत्येव, महाकर्मनिर्जरा-हेतुत्वात् ।।७।।

**गुण०** गुणा विरत्यादय उत्तरोत्तरगुणाः । आश्रवद्वारस्थगनम्, तत्स्थगनाच्च तृष्णाव्यवच्छेद-स्तृष्णाव्यवच्छेदाच्चानुपमोपशमस्तस्माच्च प्रत्याख्यानशुद्धिस्तच्छुद्धेश्च चारित्रनैर्मल्यं तस्माच्च कर्मविवेकस्तस्माच्चापूर्वकरणमपूर्वकरणाच्च केवलज्ञानम्, ततश्च मोक्षो भवतीत्युत्तरोत्तर-गुणास्तेषां गुणानां धारणं **गुणधारणं** तदेव **रूपं** यस्य **तेन** अनागता-दिदशविधेन सप्त-विंशतिविधेन वा **प्रत्याख्यानेन तपआचारातिचारस्य, "बारसविहंमिवि तवे"**इत्यादिकस्य शुद्धिः क्रियते इति हृदयम् । विशेषेणेरयति प्रवर्तयत्यात्मानं तासु तासु क्रियास्विति वीर्यमुत्साहविशेषस्तच्च पञ्चधा, यदाह-

**तवविरियं गुणविरियं, चरित्तविरियं समाहिविरियं च ।**
**आयविरियंपि य तहा, पंचविहं वीरियं होइ ।।१।।**

तस्याचारो **वीर्याचारः, "अणिगूहिये"** त्यादिकस्तस्य **सर्वैरपि** षड्भिरपि **शुद्धिः क्रियते** इत्यर्थः यदाह - **आवस्सएसु०** ।।७।।

**सोम०** उक्ता आचारपञ्चकशुद्धिः, अथ सर्वजिनगुणोत्कीर्त्तनगर्भं मङ्गलभूतं गजादि-स्वप्नसन्दर्भमाह-

**गुण०** अथ व्यावर्णिताचारपञ्चकशुद्धिरथ सर्वजिनगुणोत्कीर्तनगर्भं मङ्गलभूतं गजादि-स्वप्नसन्दर्भमाह

**गय वसह सीह अभिसेय दाम ससि दिणयरं झयं कुंभं ।**
**पउमसर सागर विमाण-भवण, रयणुच्चय सिहिं च ।।८।।**

**सोम०** गाथा सुगमा, नवरं **'अभिसेअ'**त्ति चतुर्थस्वप्ने पार्श्वद्वयवर्तिकरिकलभशुण्डा-दण्डविधृतकलशयुगलाभिषिच्यमानां लक्ष्मीं जिनमाता पश्यति, **'विमाणभवण'**त्ति

द्वादशस्वप्ने देवलोकागततीर्थकृज्जननी विमानं पश्यति, नरकागतजिननजननी तु भवनम्, विमानभवनयोराकारमात्रकृत एव विशेषः, गजदर्शनात्स्वाम्यपि तद्वदतुलपराक्रमनिधिर्भावी, वृषभदर्शनात् महामोहपङ्कमग्नधर्मरथधुरोद्धरणक्षमो भरते धर्मबीजवापनिमित्तं च भावीति १४स्वप्नैरपि जिनगुणाः सूच्यन्ते, चतुर्दशस्वप्नसंख्यया तु चतुर्दशरज्ज्वात्मकस्यापि लोकस्योपरिवर्त्ती पुत्रो भावीति निवेद्यते इति सर्वतीर्थकृद्गुणव्यावर्णनरूपं १४स्वप्नमङ्गलमुक्तम् ।।८।।

**गुण०** तत्र जिनजननी चतुर्दन्तं प्रक्षरन्मदनदीसुन्दरं गोक्षीरधारासोदरमुच्चैस्तरं जङ्गमं रजताचलमिव गजकलभं यदपश्यत्तदतुलबलपराक्रमनिधिं गरीयसामपि गुरुं पवित्रं पुत्रं सूचयति ।।१।। यच्च वर्णतः शङ्खसुहृदं प्रौढककुदमेवमादि । तदेतैश्चतुर्दशभिर्महास्वप्नैः सूच्यते चतुर्दशरज्ज्वात्मकस्यापि लोकस्योपरिवर्त्ती पुत्रो भविष्यतीति ।।८।।

**सोम०** अथ श्रीवीरनमस्काररूपं तृतीयं मङ्गलं प्रस्तुताध्ययनप्रस्तावनां चाह-

**गुण०** इति निवेदितं सर्वतीर्थकृद्गुणव्यावर्णनगर्भं मङ्गलम् । अथासन्नोपकारित्वात् श्रीमन्महावीरस्य नमस्करणद्वारेण पुनस्तदाह-

**अमरिंद-नरिंद-मुणिंदवंदियं वंदिउं महावीरं ।**
**कुसलाणुबंधि बंधुरमज्झयणं कित्तइस्सामि ।।९।।**

**सोम०** **'अमरिंदनरिंद'**त्ति उपक्रमकृतेनापमृत्युना न म्रियन्ते इत्यमरास्तेषामिन्द्रा अमरेन्द्राः नराणामिन्द्रा नरेन्द्राः, मुनीनामिन्द्राः मुनीन्द्राः, द्वन्द्वः, तैर्वन्दितं **'वंदिउं'**ति वन्दित्वा, कं ? **'महावीरं'** महद्वीर्यं यस्यानन्तबलत्वाद्देवकृतपरीक्षायामपि मनागप्यक्षुभितत्वाच्च महावीरस्तं **'कुसलानुबंधि'**त्ति कुशलो मोक्षस्तमनुबध्नाति परम्परया ददातीत्येवंशीलं कुशलानुबन्धि, तथा **बन्धुरं** मनोज्ञम्, जीवानामैहिकामुष्मिकसमाधिहेतुत्वात्, किम् ? अधीयते ज्ञायते परिच्छिद्यतेऽर्थसमुदायोऽस्मादित्**यध्ययनं** शास्त्रम्, अहं **कीर्त्तयिष्यामि** कथयिष्यामीति सम्बन्धः ।।९।।

**गुण०** उपक्रमकृतेनापमृत्युना न म्रियन्त इत्यमरास्तेषामिन्द्राः अमरेन्द्राः, नराणामिन्द्राः नरेन्द्राः, मुनीनामिन्द्राः मुनीन्द्राः । **अमरेन्द्रनरेन्द्रमुनीन्द्रैर्वन्दितं वन्दित्वा** महद्वीर्यं यस्य स **महावीरस्तम्,** कुशलो मोक्षस्तमनुबध्नातीत्येवंशीलं **कुशलानुबन्धि बन्धुरं** मनोज्ञम् । अधीयते ज्ञायते परिछिद्यतेऽर्थसमुदायोऽस्मादिति **अध्ययनं** शास्त्रं **कीर्तयिष्यामि** ।।९।।

**सोम०** अथ प्रस्तुताध्ययनार्थाधिकारानाह-

**गुण०** अथ वर्णनीयाध्ययनाधिकारमाह-

**चउसरणगमण दुक्कडगरिहा सुकडाणुमोयणा चेव ।**
**एस गणो अणवरयं कायव्वो कुसलहेउ त्ति ।।१०।।**

**सोम० 'चउसरण'त्ति** चतुर्णामर्हत्सिद्धसाधुधर्माणां शरणं गमनं प्रथमोऽधिकारः, दुष्टं कृतं **दुष्कृतं** तस्य **गर्हा** गुरुसाक्षिकमात्मदोषकथनं द्वितीयोऽधिकारः, शोभनं कृतं **सुकृतं** तस्या**नुमोदना,** भव्यं मयैतत्कृतमिति तृतीयोऽधिकारः, **चेवे ति** समुच्चये, **एषो**ऽयं **गणः** त्रयाणां समुदायो**ऽनवरतं** सततं **कर्त्तव्यो**ऽनुसरणीयः **कुशलो** मोक्षस्तस्य **कारण-**मयमितिकृत्वा ।।१०।।

**गुण०** चतुर्णां अर्हत्सिद्धसाधुधर्माणां शरणं गमनं **चतुःशरणगमनं** तदिह प्रथमाधिकारः । दुष्टं कृतं **दुष्कृतं,** तस्य **गर्हा** गुरुसाक्षिकमात्मदोषोद्घट्टनम्, स द्वितीयोऽर्थाधिकारः । शोभनं कृतं **सुकृतम्,** तस्या**नुमोदना,** भव्यं मयैतत्कृतमिति स तृतीयोऽर्थाधिकारः । **चः** समुच्चये, **एष** अयं यो भणितुमारब्धो **गणस्त्र**याणां समुदायः, **अनवरतं** सततं **कर्तव्यो**ऽनुसरणीयः **कुशलो** मोक्षस्तस्य **हेतुः** कारणमितिकृत्वा ।।१०।।

**सोम०** अथ चतुःशरणरूपं प्रथमाधिकारमाह-

**गुण०** अथ चतुःशरणरूपं प्रथमाधिकारमाह-

**अरिहंत सिद्ध साहू केवलिकहिओ सुहावहो धम्मो ।**
**एए चउरो चउगइहरणा सरणं लहइ धन्नो ।।११।।**

**सोम० 'अरिहंते'**त्यादि, १-देवेन्द्रादिकृतां पूजामर्हन्तीत्यर्हन्तः । २-तथा सिध्यन्ति निष्ठितार्था भवन्तीति **सिद्धाः** । ३-तथा निर्वाणसाधकान् योगान् धर्मव्यापारान् साधयन्ति कुर्वन्तीति **साधवः** । ४-तथा दुर्गतौ प्रपतन्तं प्राणिनं धरतीति **धर्मः।** किम्भूतः ? केवलिभिः ज्ञानिभिः कथितः प्रतिपादितः **केवलिकथित** इति, अनेन स्वमतिकल्पितान्यतीर्थिकधर्मनिरासमाह । पुनः कथम्भूतो धर्मः ? सुखमावहति परम्परया चटत्प्रकर्षं प्रापयतीति **सुखावहः,** अनेन इहलोकेऽपि मिथ्यादृष्टिधर्मस्य भैरवपतनशिरःक्रकचदापनादिदुःखाकीर्णत्वात् परलोके भवभ्रमणकारणत्वात्तन्निषेधमाह । **एते**ऽर्हत्सिद्धसाधुधर्मा**श्चत्वारश्च**तसृणां गतीनां

समाहारश्चतुर्गति-नरकतिर्यग्नरामरलक्षणं हरन्ति सिद्धिलक्षणपञ्चमगतिप्रापणेनेति **चतुर्गति-हरणाः**, यस्मादिति गम्यम् । अत एतान् भवाटव्यामटन् शरणरहितः कश्चि**द्धन्यः** सुकृतकर्मा एव **शरणं लभते,** शरणत्वेन प्रतिपद्यते इत्यर्थः ।।११।।

**गुण०** देवेन्द्रादिकृतां पूजामर्हन्ती**त्यर्हन्तः** । तेऽर्हन्तः प्रथमं शरणम् । तथा सिद्ध्यन्ति निष्ठितार्था भवन्तीति **सिद्धाः** । सितं ध्मातं वाऽष्टप्रकारं कर्म यैस्ते सिद्धा द्वितीयम् । निर्वाणसाधकान् योगान् साधयन्ति कुर्वन्तीति **साधवः** तृतीयम् । धरति दुर्गतौ प्रपतन्तं प्राणिनमिति **धर्मः** । किम्भूतः ? **केवलिभि**र्ज्ञानिभिः **कथितः** प्रतिपादितः । अनेन स्वमतिप्रकल्पितान्यतीर्थिक-धर्मनिरासमाह । कथम्भूतः ? सुखमावहत्यनुबध्नातीति **सुखावहः** । अनेनेहलोकेऽपि मिथ्यादृष्टिधर्मस्य भैरवपतन-नदीप्लवन-शिरःक्रकचदापनादिदुःखाकीर्णत्वात् परत्र च भवभ्रमणकारणत्वात् तन्निषेधमाह, **एते चत्वारश्च** चतुर्गतिं हरन्तीति सिद्धिलक्षण-पञ्चमगतिप्रापणेन **चतुर्गतिहरणाः । शरणत्वेन लभते धन्यः** सुकृतकर्मा एतान्निति गाथार्थः ।।११।।

**सोम०** अथ यथाविधिना एतान् शरणं प्रपद्यते तथाऽऽह-

**गुण०** अथ यथाविधिना एतान् शरणं प्रतिपत्स्यति तथाऽऽह-

**अह सो जिणभत्तिभरुच्छरंतरोमंचकंचुयकरालो ।**
**पहरिसपणउम्मीसं सीसम्मि कयंजली भणइ ।।१२।।**

**सोम०** '**अह सो**'त्ति, अथ स शरणप्रतिपत्ता चतुर्विधश्रीसङ्घस्यान्यतमो जीवः, कथम्भूतो ? जिनेषु भक्तिस्तस्या भरः प्राबल्यं तस्मा**ज्जिनभक्तिभरात् 'उच्छरंत'**त्ति अवस्तृणन्नुदयं गच्छन् योऽसौ **रोमाञ्चः** स एव शरीरावारकत्वा**त्कञ्चुको** रोमाञ्चकञ्चुकस्तेन **करालोऽ**न्तरङ्गशत्रूणां भीषणः । तथा प्रकृष्टो हर्षः **प्रहर्षस्त**स्माद्य**त्प्रणतं** प्रणामस्तेन **उन्मिश्रं** व्याकुलं यथा भवत्येवम्, यद्वा प्रहर्षवशाद्योऽसौ प्रणय आनन्दाश्रुगद्गदस्वरस्तेनोन्मिश्रम्, क्रियाविशेषण-मेतत् । तथा **शीर्षे** मस्तके **कृताञ्जलिः** कृतकरकुड्मलः सन् **भणति** ।।१२।।

**गुण० अथ स** शरणं प्रतिपत्ता चतुर्विधसङ्घस्य अन्यतमो जीवः, कथम्भूतः ? जिनेषु भक्तिर्जिनभक्तिस्तस्या भरस्तस्मा**त्जिनभक्तिभरादवस्तृण**न्नुदयं गच्छन् योऽसौ **रोमाञ्चः स एव कञ्चुको** रोमाञ्चकञ्चुकः, **तेन करालोऽ**न्तरङ्ग**शत्रूणां भीषणः**, तथा **प्रहर्षात्**

**यत्प्रणतं** प्रणामस्तेनो**न्मिश्रं** व्याकुलं यथाभवत्येवं यदि वा प्रकर्षवशाद्योऽसौ प्रणयानन्दाश्रुगद्गदस्वरस्तेन **शीर्षे** मस्तके **कृताञ्जलिः** कृतकरकुड्मलः सन् **भणति** ।।१२।।

**सोम०** अर्हच्छरणमङ्गीकुर्वन् यदसौ भणति तद्गाथादशकेनाह-

**गुण०** यदसौ अर्हच्छरणमुररीकुर्वन् भणति तद् गाथादशकेनाह-

**राग-द्दोसारीणं हंता कम्मट्ठगाइअरिहंता ।**
**विसय-कसायारीणं अरिहंता हुंतु मे सरणं ।।१३।।**

**सोम०'रागद्दोसा'** इति, रागस्त्रिधा दृष्टिरागकामरागस्नेहरागभेदात्, द्वेषः परद्रोहाध्यवसायः । अथवाऽभिष्वङ्गमात्रं रागः, अप्रीतिमात्रं द्वेषः, एतयोरुपलक्षणत्वात् मदमत्सराहंकाराणां ग्रहः, त एवारयो रागद्वेषारयस्तेषां हन्तारो **रागद्वेषारिहन्तारस्**तथा कर्मणां ज्ञानावरणादीनामष्टकं कर्माष्टकं तदादौ येषां ते कर्माष्टकादयस्ते च तेऽरयश्च **कर्माष्टकाद्यरयः,** आदिशब्दात्परीषहव्रेदनोपसर्गादिग्रहः, तेषां **हन्तारः,** षष्ठीलोपोऽत्र द्रष्टव्यः ।
तथा **विषया** शब्दरूपगन्धरसस्पर्शाः **कषायाः** क्रोधमानमायालोभा अनन्तानुबन्ध्यादिभेदास्त एव जीवानामनर्थकारित्वा**दरयस्**तेषां' **हन्तारः,** पाश्चात्यं "हंता" इति पदमत्रापि सम्बध्यते । अथवा विषयकषायाणां विनाशकत्वेनारयस्तीर्थकरा विषयकषायारयः। णमिति वाक्यालङ्कारे, एवंविधा **अर्हन्तो** जिना **मे** मम **शरणं** परित्राणं **भवन्त्वि**त्यर्थः ।।१३।।

**गुण०** द्रव्यभावभेदाद् द्विधा रागः, तत्र द्रव्यरागो हरिद्रादिः, भावरागस्त्रिधा दृष्टिरागो विषयरागः स्नेहरागः, द्वेषः परद्रोहाध्यवसायः, त एवारयो **रागद्वेषारयस्**तेषां **हन्तारः,** कमाष्टकाद्येवारयः कर्माष्टकं प्रतीतम्, आदिशब्दात्परीषहवेदनोपसर्गग्रहः, ततः **कर्माष्टकाद्यरयो** लुप्तषष्ठीविभक्तित्वात् तेषां **हन्तारः,** शब्दरूपरसस्पर्शगन्धा **विषयाः,** क्रोधादयः **कषायास्त एवारयस्**तेषां **हन्तारोऽर्हन्तो** जिनाः **मे** मम अपारसंसारकारागृहपरिचङ्क्रमणभयातुरस्य समाश्वासनस्थानतुल्यं **शरणं** परित्राणं **भवन्त्वित्यर्थः** ।।१३।।

**रायसिरिमवकसित्ता तव-चरणं दुच्चरं अणुचरित्ता ।**
**केवलसिरिमरिहंता अरिहंता हुंतु मे सरणं ।।१४।।**

**सोम०'रायसिरि'**त्ति, राज्यश्रियं राज्यलक्ष्मी**मपकृष्य** अवधूय त्यक्त्वेत्यर्थः, तथा तप्यते

कर्ममलापनयनेनात्मा सुवर्णमिवाग्निनाऽनेनेति **तप**स्तस्य चरणमासेवनम्, कथम्भूतम् ? **दुश्चरं** सामान्यसाधुभिः कर्तुमशक्यं वार्षिकषण्मासादिरूपमप्रमत्ततामौनकायोत्सर्गादिक्रिया-विशेषितमजलं च तत्तपो**ऽनुचर्या**सेव्य ये **केवलश्रियं** केवलज्ञानविभूति**मर्हन्त**स्तस्या योग्या भवन्तीत्यर्थः । ते**ऽर्हन्तः** तीर्थकृतो **मे शरणं भवन्त्वि**ति सर्वत्र योज्यम्, अथवा प्रथमान्तान्येव पदानि योज्यानि ।

**राज्यश्रियमपकर्षयन्तः** त्यजन्तस्तथा **तपश्चरणं दुश्चरमनुचरन्तः केवलश्रियं चार्हन्तः** प्राप्नुवन्तो ये ते शरणम्, एतेन पूर्वोक्तेन राज्यश्रीत्यागतपश्चरणकरणकेवलश्रीप्रापणरूपावस्थात्रय-शरणगमनप्रतिपादनेन यद्यपि शक्रादीनां सर्वास्वप्यवस्थासु जिना नमस्कारार्हास्तथापि ते गृहवासस्थाः साधूनां न नमस्कारार्हा अविरतत्वादिति दर्शितम्, यच्चानागतजिनाः साधुभिर्नमस्क्रियन्ते तेऽपि चारित्रावस्थास्था एवेति भावः [**द्रव्यजिनानां नमस्करणीयतायां सर्वविरतानां साधु-साध्वीनां देशविरतानामविरतानां च श्रावक-श्राविकाणां किदृशः कियद् वाऽधिकारोवर्त्तत इत्येवात्र समाधिप्रापणाय पू. उपाध्यायप्रवर-श्रीधर्मसागरगणिसंदब्धप्रवचनपरीक्षायाः पू० महोपाध्यायश्रीयशोविजयगणि-विरचितप्रतिमाशतकस्य संटङ्क उल्लेखः सूक्ष्मबुद्ध्याऽवलोकनीयो जिज्ञासुभिः ० सम्पा.**] ।।१४।।

**गुण०** **राज्यश्रियं** (राज्यलक्ष्मीं) **अपकृष्या**वधूय तथा तप्यते कर्ममलापनयनेनात्मा सुवर्णमिवाग्निना अनेनेति **तप**स्तस्य **चरणं** सेवनं **दुश्चरं** सामान्यसाधुभिः कर्तुमशक्यम्, तत्तपो**ऽनुचर्य** आसेव्य ये **केवलश्रियं** केवलज्ञानविभूति**मर्हन्त**स्तस्या योग्या भवन्तीति, **अर्हन्तस्**तीर्थकृतो **मे शरणं** परित्राणं **भवन्त्विति** सर्वत्र योज्यम् । अथवा ये राज्यलक्ष्मीमपकर्षयन्तस्त्यजन्तः । तथा तपश्चरणं दुश्चरमनुचरन्तः । केवलश्रीं चार्हन्तः प्राप्नुवन्त ये ते शरणम्। एतेन यद्यपि शक्रादयो गर्भस्थमात्रमपि जिनं नमस्कुर्वन्ति । तथापि गृहवासे तेषामप्यविरतत्वात् साधूनां तिसृष्ववस्थासु ते नमस्करणयोग्या इति दर्शितम् । यत्त्वनागतजिना नमस्क्रियन्ते तत्तेऽपि चारित्रावस्थास्था एवेति भावः **[द्रव्यजिनानां नमस्करणीयतायां सर्वविरतानां साधु-साध्वीनां देशविरता-नामविरतानां च श्रावक-श्राविकाणां किदृशः कियद् वाऽधिकारो वर्त्तत**

**इत्येवात्र समाधिप्रापणाय पू० उपाध्यायप्रवरश्रीधर्मसागरगणिसंदब्ध प्रवचन-परीक्षायाः पू० महोपाध्यायश्रीयशोविजयगणिविरचित्तप्रतिमा-शतकस्य संटङ्क उल्लेखः सूक्ष्म बुद्धयाऽवलोकनीयो जिज्ञासुभिः। ०सम्पा.]** ।।१४।।

**थुय-वंदणमरिहंता अमरिंद-नरिंदपूयमरिहंता ।**
**सासयसुहमरहंता अरिहंता हुंतु मे सरणं ।।१५।।**

**सोम०'थुयवंद**'त्ति, स्तवः **'थुइ'** पाठे स्तुतिर्वा सद्भूतगुणोत्कीर्त्तनं **वन्दनं** कायिकः प्रणामः, तौ **अर्हन्तः** तयोर्योग्या जगतोऽपीति शेषः । **अमरेन्द्रनरेन्द्राणां पूजां** समवसरणादिकां समृद्धि-**मर्हन्तस्त**स्या अपि योग्या भवन्तः, तथा शश्वत् भवं शाश्वतं तच्च तत्सुखं च **शाश्वतसुखं** निर्वाणादनन्तरं तद**प्यर्हन्ति** तस्याऽपि योग्या भवन्तीत्यर्हन्तः, शेषं पूर्ववत् ।।१५।।

**गुण० स्तुतयः "सव्वन्नुसोमदंसणे"**त्यादि **वन्दनं** कायिकप्रणामस्त**मर्हन्तस्त**द्योग्या इत्यर्थः । **अमरेन्द्रनरेन्द्राणां पूजां** समवसरणादिकां समृद्धि**मर्हन्त**स्तस्या अपि योग्या भवन्तः शश्वद्भवं शाश्वतं तच्च तद् सुखं च **शाश्वतसुखं** निर्वाणानन्तरं तद**प्यर्हतीत्**यर्थः । शेषं पूर्ववत् ।।१५।।

**परमणगयं मुणित्ता जोइंद-महिंदझाणमरिहंता ।**
**धम्मकहं अरिहंता अरिहंता हुंतु मे सरणं ।।१६।।**

**सोम० 'परमण'**त्ति, परेषामात्मव्यतिरिक्तानां मनांसि परमनांसि तेषु गतं स्थितं चिन्तितमित्यर्थः तन्**मुणन्तो** जानन्तः 'मुणत् प्रतिज्ञाने' इति धातुः, एतेन अनुत्तरसुराणां मनःसंशयपरिज्ञानतदुच्छेदसमर्था जिना न गौतमादय इत्युक्तम् । तथा योगिनो मुनयस्तेषामिन्द्राः गौतमादयः महान्तश्च ते इन्द्राश्च महेन्द्राः शक्रादयस्तेषां ध्यानं स्थिराध्यवसायरूपं तदर्हन्तीति **योगीन्द्रमहेन्द्रध्यानार्हाः**। तथा **धर्मकथां** दानशील-तपोभावनादिकां **कथयितुमर्हन्त**स्तस्याः कथनयोग्याः सर्वज्ञत्वेन सर्वभाषानुयायि-योजनगामिवागतिशयत्वेन च, छद्मस्थावस्थायां तु मौनावलम्बित्वेन धर्मकथना-नर्हत्वाज्जिनानाम्, शेषं प्राग्वत् ।।१६।।

**गुण०** परेषामात्मव्यतिरिक्तानां मनांसि **परमनांसि** तेषु **गतं** स्थितं चिन्तितमित्यर्थः, तन्**मुणन्तो** जानन्तः । **योगीन्द्राः** गौतमादयः, **महेन्द्राः** शक्रादयस्तेषां **ध्यानं** स्थिराध्यवसायरूपं **तदर्हन्तीति** । तथा **धर्मकथां** कथयितु**मर्हन्तस्**तस्याः कथनयोग्या ज्ञातार इत्यर्थः छद्मस्थावस्थायां तु जिनानां धर्मकथानर्हत्वात्, शेषं तथैव ।। १६।।

**सव्वजियाणमहिंसं अरिहंता सच्चवयणमरिहंता ।**
**बंभव्वयमरिहंता अरिहंता हुंतु मे सरणं ।।१७।।**

**सोम० 'सव्व'** त्ति सर्वे सूक्ष्मबादरत्रसस्थावरा ये जीवास्तेषां न हिंसा अहिंसा रक्षा तामर्हन्तः, तथा सतां हितं **सत्यं** तच्च **तद्वचनं** च तदेवा**र्हन्तोऽ**सत्यभाषणहेतुरागद्वेषमोहरहितत्वात्तेषाम्, तथा **ब्रह्मव्रत**मष्टादशभेदम् । **"दिव्यौदारिककामानां"** इत्यादि श्लोकोक्तमासेवितुं प्ररूपयितुं **चार्हन्तः**, शेषं तथैव ।।१७।।

**गुण०** सर्वे च ते जीवाश्च तेषां न हिंसनमहिंसा रक्षा तामर्हन्तः । तथा सतां हितं **सत्यं** तच्च तद्**वचनं** च असत्यभाषणहेतुरागद्वेषमोहरहितत्वात्तेषां तदे**वार्हन्तः**, **ब्रह्मव्रत**मष्टादशविकल्पमासेवितुं प्ररूपयितुं चार्हन्तस्ते, शेषं प्राग्वत् ।।१७।।

**ओसरणमुवसरित्ता चउतीसं अइसए निसेवित्ता ।**
**धम्मकहं च कहित्ता अरिहंता हुंतु मे सरणं ।।१८।।**

**सोम० 'ओस'**ति अवस्रियते गम्यते संसारभयोद्विग्नैर्जीवैरित्यवसरणं समवसरणमित्यर्थः, तदवसृत्याऽलङ्कृत्य, तथा **चतुस्त्रिंशतो** जन्मजकर्मक्षयजसुरकृतान् यथाक्रमं चतुरेकादशैकोनविंशतिसङ्ख्याप्रसिद्धा**नतिशयान्निषेव्य**, उपलक्षणत्वात्पञ्चत्रिंशद्वचनातिशयांश्च, तथा **धर्मकथां कथयित्वा** ये मुक्तिं यान्ति यास्यन्ति याता इत्यध्याहार्यम् । **'कहंता'** इति पाठे धर्मकथां कथयन्तो ये वर्त्तन्ते ते शरणम्, पूर्वं धर्मकथनयोग्या इत्युक्तमत्र तु धर्मकथां कथयन्त एवेति न पौनरुक्त्यमत्र चाध्ययनेऽन्यत्रापि यत्र कुत्रचित् पौनरुक्त्यसम्भवस्तत्र स्तुत्युपदेशरूपत्वेन न दोष इति ज्ञेयम्, यत उक्तं-

**'सज्झायज्झाणतवोसहेसु उवएसथुइपयाणेसु ।**
**संतगुणकित्तणेसु अ न हुंति पुनरुत्तदोसा उ ।।** शेषं तथैव ।।१८।।

गुण० सामस्त्येनावस्रियते गम्यते संसारभयोद्विग्नैर्जीवैरिति **समवसरणमवसृत्या**लङ्कृत्य **चतुस्त्रिंशतो** बुद्धातिशया**न्निषेव्य** उपलक्षणत्वाच्च पञ्चत्रिंशद्वचनातिशयांश्चोपयुज्य **धर्मकथां च कथयित्वा** ये मुक्तिं यान्ति यास्यन्ति याता इत्यध्याहार्यम् । पूर्वं धर्मकथनयोग्या इत्युक्तम्, ननु तां कथयित्वेति न पौनरुक्त्यम् ? उक्तञ्च-

**उपदेशस्तुतिध्यानतपोदानौषधादिषु ।**
**गुणस्तवे श्रुताऽध्याये, पौनरुक्त्यं न गण्यते।।** अर्हन्तः शेषं प्राग्वत् ।।१८।।

**एगाए गिराणेगं संदेहं देहिणं समुच्छित्ता।**
**तिहुयणमणुसासित्ता अरिहंता हुंतु मे सरणं ।।१९।।**

सोम० **'एगाइ गिर'**त्ति एकया गिरा एकेनापि वचने**नानेकप्रकारान् सन्देहान्** संशयान्, केषां ? **देहिनां** सुरासुरनृतिर्यग्रूपाणां **समं** समकालमेव **छित्त्वा** संशयत्रुटिं कृत्वेत्यर्थः **'समुच्छित्ते'**ति पाठे समुच्छिद्येति ज्ञेयम् । **त्रिभुवनमनुशास्य** शिक्षयित्वा अनुशासयन्तो वा सम्यक्त्वदेशविरतिसर्वविरतिलक्षणशिक्षाप्रदानेन, मोक्षं यान्तीति योगः । शेषं तथैव ।।१९।।

गुण० **एकया गिरा** वाचा एकेनापि वचनेन अनेकेषां **देहिनां** प्राणिना**मनेकप्रकारं सन्देहं** संशयं **समुच्छिद्य** संशयत्रुटिं कृत्वेत्यर्थः, ननु कथमर्हद्गीरेकाऽपि युगपत्प्रतिप्राणिसंशयव्यवच्छेदाय भवति ? एकस्यामपि भगवद्भाषायां सर्वाक्षरसंयोगः कथमप्यस्ति । स च श्रोतृश्रवणपुद्गलस्पृष्टः सन् व्यक्तीभवति । तथाहि - अर्हद्भाषादलिकानि नानासन्देहवतां श्रोतॄणां कर्णकोटरं प्रविष्टानि, ततस्तद् श्रवणपुद्गलसंयोगतः स्वकीयां सर्वाक्षरसन्निपातलक्षणां शक्तिं व्यक्तीकुर्वन्ति, ततस्तदुत्तररूपतया अनेकशः परिणमन्ति । दृश्यते च द्रव्यान्तरसंयोगेन द्रव्यान्यथाभावः यथा हरिद्रायाश्चूर्णसंयोगेनारुणत्वं नीलीसंयोगेन नीलत्वमित्यादि । अत्राऽर्थे श्रीभद्रबाहुगुरवोऽप्याहुः **"वासोदगस्स"**... अतः एकापि गीः संशयवतां निजनिजभाषात्वेन परिणमन्ती, सर्वेषामपि संशयव्यवच्छेदिका भवतीति सुस्थम् । **त्रिभुवनमनुशिष्य** शिक्षयित्वा अनुशासयन्तो वा सम्यक्त्वदेशविरतिसर्वविरतिलक्षणशिक्षाप्रदानेन ते, शेषं प्राग्वत् ।।१९।।

**वयणामएण भुवणं निव्वावित्ता गुणेसु ठावित्ता ।**
**जियलोयमुद्धरित्ता अरिहंता हुंतु मे सरणं ।।२०।।**

**सोम०** '**वयणा**' इति वचनमेवामृतं वचनामृतं क्षुत्पिपासापीडादिदोषापहारकत्वात् तेन वचनामृतेन **भुवनं** लोकं निर्वाप्य तस्य तृप्तिमुत्पाद्य **निर्वापयन्तो** वा प्रीणयन्त आप्यायन्त इत्यर्थः । तथा **गुणेषु** उत्तरोत्तरगुणस्थानकेषु सम्यक्त्वदेशविरतिप्रमत्ताप्रमत्तादिकेषु प्रागुक्तं भुवनमेव **स्थापयित्वा** स्थापयन्तो वा सदुपदेशवशात्तानि प्रापयन्त इत्यर्थः । तथा **जीवलोकं** भव्यजीवलोकमभव्यास्तु तीर्थकरोपदेशेनापि नावबुध्यन्ते, तमुद्धृत्य **उद्धरन्तो** वा भवान्धकूपात् स्ववचनरज्जुनाऽऽकर्षयन्त इत्यर्थः । शेषं पूर्ववत् ।।२०।।

**गुण०** वचनमेवामृतं **वचनामृतं** क्षुत्पिपासापीडादिदोषनिरसनसमर्थत्वात्, उक्तं च "**सव्वा०**" । तेन वचनामृतेन **भुवनं** लोकं निर्वाप्य तस्य तृप्तिमुत्पाद्य **निर्वापयन्तो** वा प्रीणयन्तः । तथा **गुणेसु** उत्तरोत्तरगुणस्थानकेषु सम्यक्त्वविरताविरतप्रमत्ताप्रमत्तादिकेषु भुवनमेव स्थापयित्वा **स्थापयन्तो** वा । तथा **जीवलोकं** भव्यजीवलोकम्, अभव्यास्तु तीर्थकरोपदेशेनाऽपि नावबुध्यन्ते । **तमुद्धरन्तो** भवान्धकूपादिति गम्यत्वात् । तस्मात् स्ववचनरज्जुना कर्षयन्त इत्यर्थः । शेषं प्राग्वत् ।।२०।।

**सोम०** अथातीतानागतार्हच्छरणद्वारेण तन्निगमयन्नाह-

**गुण०** अतीतानागतार्हच्छरणमाह-

**अच्चब्भुयगुणवंते नियजससिसहरपसाहियदियंते ।**
**नियमणाइअणंते पडिवन्नो सरणमरिहंते ।।२१।।**

**सोम०** '**अच्चब्भुअ**'त्ति अत्यद्भुता अन्येष्वसम्भविनो ये गुणाः प्रातिहार्यादिलक्षणा अन्ये वा रूपादयस्ते विद्यन्ते येषां ते अत्यद्भुतगुणवन्तस्तान्, तथा **निजयश** एव **शशधर**श्चन्द्रस्तेन **प्रसाधिता** विभूषिता **दिगन्ता** दिक्पर्यन्ता यैस्तान् । '**पयासिअ**'त्ति पाठे प्रकाशिता वा यैस्तान्, **नियतं** शाश्वतं यथा भवत्येवं सदैवेत्यर्थः, न आदिर्न चान्तो येषां **तेऽनाद्यनन्ता**स्तान् शरणं **प्रपन्न**स्तानाश्रित इत्यर्थः । एतेन कालत्रयभाविनोऽनन्ता अपि जिना गृहीताः ।।२१।।

**गुण०** अत्यद्भुतगुणा बुद्ध्यतिशयवचनातिशयप्रातिहार्यलक्षणास्ते विद्यन्ते येषां ते तथा तान्, **अत्यद्भुतगुणवतः** । निजयश एव शशधरो निजयशःशशधरः तेन प्रसाधिता मण्डिता धवलीकृता दिगन्ता यैस्ते, तान् **निजयशःशशधरप्रसाधितदिगन्तान्** । **नियतं**

शाश्वतं वा यथाभवत्येवं न आदिर्न चान्तो येषां ते **अनाद्यनन्तास्तान् अर्हतोऽहं शरणं प्रतिपन्न**स्तानाश्रित इत्यर्थः । एतेन कालत्रयभाविनोऽपि जिना गृहीताः ।।२१।।

**सोम०** अथ कृतार्हच्छरणो विशेषेण तेषां नमस्कारमाह-

**गुण०** अथ कृतार्हच्छरणो विशेषेण तेषां नमस्कारमाह-

**उज्झियजर-मरणाणं समत्तदुक्खत्तसत्तसरणाणं ।**
**तिहुयणजणसुहयाणं अरहंताणं नमो ताणं ।।२२।।**

**सोम० 'उज्झि'**त्ति, उज्झितानि त्यक्तानि जरामरणानि यैस्तत्कारणकर्मरहितत्वात्ते उज्झितजरमरणास्तेभ्यः । समस्तानि सम्पूर्णानि यानि दुःखानि तैरार्ता ऋता वा पीडिता ये सत्वाः प्राणिनस्तेषां शरण्याः शरणे साधवस्तेभ्यः, यद्वा समाप्तं निष्ठां गतं दुःखं येषां ते **समाप्तदुःखाः,** तथा आर्ता जन्मजरामरणादिदुःखैः पीडिता ये सत्त्वास्तेषां शरण्याः, समाप्तदुःखाश्च ते **आर्तसत्त्वशरण्याश्चे**ति विशेषणकर्मधारयस्तेभ्यः । तथा त्रिभुवनजनानां सुखं ददाति निजावतारेणेति त्रिभुवनजनसुखदास्तेभ्यः। सर्वत्र चतुर्थ्यर्थे षष्ठी **"छट्ठी विभत्तीइ भण्णइ चउत्थी"** इति प्राकृतसूत्रबलात्, तेभ्यः पूर्वोक्तगुणेभ्योऽर्हद्भ्यो नमो नमस्कारोऽस्तु ।।२२।।

**गुण०** जरामरणकारणकर्मरहितत्वा**दुज्झितानि** त्यक्तानि **जरामरणानि** यैस्ते तेभ्यः समाप्तानि सम्पूर्णानि **समस्तानि** वा यानि **दुःखानि** तैरार्ता रुजा वा पीडितास्ते च ते सत्त्वाश्च समाप्तदुःखार्त्तसत्त्वाः **समस्तदुःखार्त्तसत्वा** वा तेषां **शरण्या**स्तेभ्य**स्त्रिभुवनजनानां सुखं ददातीति** ते तथा तेभ्यः, सर्वत्र चतुर्थ्यर्थे षष्ठी, तेन तेभ्यो**ऽर्हद्भ्यो नमो** नमस्कारोऽस्तु ।।२२।।

**सोम०** अथ द्वितीयं शरणं यथा प्रतिपद्यते तथाऽऽह-

**गुण०** यथाविधि द्वितीयं शरणं करोति तदाह -

**अरिहंतसरणमलसुद्धिलद्धपरिसुद्धसिद्धबहुमाणो ।**
**पणयसिरिरइयकरकमलसेहरो सहरिसं भणइ ।।२३।।**

**सोम० 'अरिहंत'**त्ति अर्हतां शरणमर्हच्छरणं तेन पूर्वोक्तेन या मलस्य कर्मरजसः

शुद्धिस्तया लब्धः परिशुद्धो निर्मलः सिद्धान् प्रति बहुमानो भक्तिर्येन स तथा, **'सुविशुद्ध'**त्ति पाठे सुष्ठु अतिशयेन विशुद्धो निर्मल इत्यर्थः। पुनः किम्भूतः ? **प्रणतं** भक्तिवशान्नम्रीभूतं य**च्छिर**स्तत्र **रचितः करकमलाभ्यां शेखरो** येन स तथा, एवम्भूतः सन् सहर्षं भणति ।।२३।।

**गुण० अर्हच्छरणेन** या **मलस्य** कर्मरजसः **शुद्धि**स्तया **लब्धः परिशुद्धो** निर्मलः **सिद्धान्** प्रति **बहुमानो** भक्तिर्येन स तथा, किम्भूतः ? **प्रणतं** भक्तिवशान्नम्रीभूतं य**च्छिर**स्तत्र **रचितः** कृतः **करकुड्मल** एव **शेखरो** येन स तथा **सहर्षं** सानन्दं यथा भवत्येवं **भणति** ।।२३।।

**सोम०** यच्चायं भणति तद्गाथाषट्केनाह-

**गुण०** यच्चायं भणति तद्गाथाषट्केनाह-

**कम्मट्ठक्खयसिद्धा साहावियनाण-दंसणसमिद्धा ।**
**सव्वट्ठलद्धिसिद्धा ते सिद्धा हुंतु मे सरणं ।।२४।।**

**सोम० 'कम्मट्ठ'**त्ति, **कर्माष्टकक्षयेण सिद्धाः** प्रसिद्धास्ते च तीर्थसिद्धादिभेदेन पञ्चदशधा, ●[तानाह १-तीर्थसिद्धाः प्रसन्नचन्द्रसनत्कुमारादयः २-अतीर्थसिद्धा मरुदेव्यादिकाः ३-गृहलिङ्गसिद्धाः पुण्याढ्यादिकाः ४-अन्यलिङ्गसिद्धा वल्कलचीर्यादिकाः ५-स्वलिङ्गसिद्धा जम्बूस्वाम्यादिकाः ६-स्त्रीलिङ्गसिद्धा राजीमत्यादिकाः ७-नरसिद्धा भरतादिकाः ८-कृत्रिमनपुंसकसिद्धाः गुणसेनादिकाः ९-प्रत्येकबुद्धसिद्धा नमिराजादिकाः १०-स्वयम्बुद्धसिद्धाः समुद्रपालादिकाः ११-बुद्धबोधितसिद्धाः त्रिकाधिकपञ्चदशशततापसादिकाः १२-एकसिद्धाः गजसुकुमालादिकाः १३-अनेकसिद्धा भरतपुत्रादिकाः १४-अजिनसिद्धाः पुण्डरीकगौतमादिकाः १५-जिनसिद्धा आदिनाथादिकाः ।] पुनः कथम्भूताः ? **स्वाभाविके** निरावरणे येऽनवच्छिन्ने **ज्ञानदर्शने** ताभ्यां **समृद्धाः** स्फीतिमन्तः। तथाऽर्थ्यन्तेऽभिलष्यन्ते इत्यर्था सर्वे च तेऽर्थाश्च तेषां लब्धयः प्राप्तयः **सिद्धाः** निष्पन्नाः **सर्वार्थलब्धयो** येषां ते तथा, सिद्धसर्वकार्याः प्राप्तसर्वसुखज्ञानादिभावाः कृतकृत्या

● कौंसगतः पाठः पूर्वमुद्रितौ प्रतौ दृश्यते, न तु हस्तलिखितेष्वादर्शेषु । सं.

इत्यर्थः, आर्षत्वात् सिद्धशब्दस्याग्रे निपातः, सर्वार्थलब्धिभिः सिद्धा निष्ठिता इत्येवं वा समासः । **ते सिद्धा मम शरणं भवन्तु** ।।२४।।

गुण० **कर्माष्टकक्षयेण सिद्धाः** प्रसिद्धास्ते च तीर्थसिद्धादिभेदेन पञ्चदशधा । पुनः कथम्भूताः ? **स्वाभाविके** निरावरणेऽनवछिन्नप्रवाहे ये **ज्ञानदर्शने** ताभ्यां **समृद्धाः** स्फीतिमन्तः । अर्थ्यन्तेऽभिलष्यन्ते इत्यर्थस्तेषां लब्धयः प्राप्तयः, सर्वाश्च ता अर्थलब्धयश्च कृतकृत्यत्वात् **सर्वार्थलब्धयो** दानाद्याः **सिद्धा** निष्पन्ना येषां ते सिद्धास्तथा **ते सिद्धा मम शरणं भवन्त्वित्यर्थः** ।।२४।।

**तियलोयमत्थयत्था परमपयत्था अचिंतसामत्था ।**
**मङ्गलसिद्धपयत्था सिद्धा सरणं सुहपसत्था ।।२५।।**

सोम० **'तिअलोय'**त्ति, त्रैलोक्यस्य चतुर्दशरज्वात्मकस्य यन्मस्तकं सर्वोपरिवर्तिस्थानं पञ्चचत्वारिंशल्लक्षयोजनविस्तीर्णेषत्प्राग्भाराख्यसिद्धशिलाया उपरितनयोजनसत्कोपरितन-चतुर्विंशतितमभागरूप आकाशदेशस्तत्र तिष्ठन्तीति **त्रैलोक्यमस्तकस्थाः,** तथा **परमपदं** मुक्तिपदं सर्वकर्मरहितत्वरूपं तद्धेतुत्वाच्चारित्रादिक्रियाकलापस्य तत्र **तिष्ठन्तीति** ते तथा, तथा**ऽचिन्त्य**मनन्तत्वात् **सामर्थ्यं** जीवशक्तिविशेषो बलं येषां ते तथा । तथा मङ्गलरूपाः सिद्धाः सम्पन्नाः पदार्था येषां ते तथा, यद्वा सांसारिकदुःखरहितं **मङ्गलभूतं** यत् **सिद्धपदं** तत्र **तिष्ठन्तीति** ते तथा, ते **सिद्धाः शरणं** भवन्तु, पुनः कथम्भूताः ? **सुखेन** जन्मजरामरणक्षुत्तृषाद्याबाधारहितेन मुक्तिप्रभवेन **प्रशस्ता** अव्याकुला अनन्तसुखा इत्यर्थः ।।२५।।

गुण० **त्रैलोक्यस्य** चतुर्दशरज्ज्वात्मकलोकस्य **यन्मस्तकं** सर्वोपरिवर्तिस्थानं सिद्धिक्षेत्रं तस्याप्युपरितनदेशे **तिष्ठन्तीति परमपदं** मुक्तिपदं तद्धेतुत्वाच्चारित्रादिक्रियाकलापस्तत्र तिष्ठन्तीति ते । तथा अनन्तचतुष्टयोपेतत्वात् **अचिन्त्यसामर्थ्यं** जीवशक्तिविशेषो येषां ते । तथा दुष्टाष्टप्रबलकर्मरिपुविजयेन प्रवरशिवपुरप्रवेशतो **मङ्गलरूपाः सिद्धाः** सम्पन्नाः **पदार्था** येषां ते तथा, अथवा सांसारिकदुःखविरहितं मङ्गलभूतं यत्तत्सिद्धिपदं तत्र तिष्ठन्तीति ते तथा ते **सिद्धाः शरणं** भवन्तु, निस्तीर्णसर्वदुःखजाति-जरामरणत्वादाबाधारहितत्वाच्च । **सुखेन** मुक्तिप्रभवेन **प्रशस्ता** अव्याकुलाः प्रशस्तसुखा इत्यर्थः ।।२५।।

**मूलुक्खयपडिवक्खा अमूढलक्खा सजोगिपच्चक्खा ।**
**साहावियत्तसुक्खा सिद्धा सरणं परममुक्खा ।।२६।।**

**सोम०** '**मूलुक्खय**'त्ति, **मूलादुत्खाता** उन्मूलिताः **प्रतिपक्षाः** कर्मरूपा यैस्ते तथा, समूलनिर्मूलितकर्माण इत्यर्थः । '**मूलक्खए**'त्ति पाठान्तरेऽयमर्थो **मूलस्य** संसारहेतु-कर्मबन्धमूलस्य मिथ्यात्वाविरतिकषाययोगरूपस्य शत्रुसङ्घातस्य **क्षये** कर्तव्ये **प्रतिपक्षा** इव वैरिण इव तज्जयं कृतवन्त इत्यर्थः। तथा लक्ष्ये द्रष्टव्यपदार्थे न मूढा **अमूढलक्षाः** सदोपयुक्तत्वात्तेषाम् । तथा **सयोगिनां** सयोगिकेवलिनामेव **प्रत्यक्षा** दृश्याः, शेषज्ञानिनामविषयत्वात् सिद्धानाम् । तथा **स्वाभाविकम**कृत्रिम**मात्तं** गृहीतमाप्तं प्राप्तं वा **सुखं** यैस्ते तथा । पुनः किंविशिष्टाः ? **परमः** प्रकृष्टोऽत्यन्तं विगमात्कर्मभिः सह **मोक्षो** वियोगः पृथग्भावो येषां ते तथा, ते **सिद्धाः शरणं** भवन्तु ।।२६।।

**गुण०** **मूलस्य** संसारहेतुकर्मबन्धमूलस्य मिथ्यात्वाविरतिकषाययोगरूपशत्रुसङ्घातरूपस्य **क्षये** कर्तव्ये **प्रतिपक्षा** इव वैरिण इव तज्जयं कृतवन्त इत्यर्थः, **मूलोत्खातकर्मप्रतिपक्षा वा** । तथा लक्षे द्रष्टव्यपदार्थे न मूढा **अमूढलक्षाः** सदोपयुक्तत्वात्तेषाम् । तथा शेषज्ञानिनामविषयत्वा**त्सयोगिनामे**व सयोगिकेवलिनां **प्रत्यक्षाः** दृश्याः सदापि सुखसम्पूर्णत्वेन तृप्तत्वात् । **स्वाभाविकमात्तं** गृहीतं **सुखं** यैस्ते तथा **परमः** प्रकृष्टोऽत्यन्तं विगमात्कर्मभिः सह **मोक्षो** वियोगो विकटीभावो येषां ते तथा। यदिवा परममोक्षयोगात्**परममोक्षाः सिद्धाः शरणं** भवन्त्वित्यर्थः ।।२६।।

**पडिपिल्लियपडणीया समग्गझाणग्गिदड्ढभवबीया ।**
**जोईसरसरणीया सिद्धा सरणं समरणीया ।।२७।।**

**सोम०** '**पडिपिल्लिअ**'त्ति, **प्रतिप्रेरिताः** क्षिप्ता अनादृता इत्यर्थः, **प्रत्यनीकाः** शत्रवो यैः समशत्रुमित्रत्वात् । यद्वा **प्रतिप्रेरिता** निराकृताः **प्रत्यनीका** रागाद्यान्तरशत्रवो यैस्ते तथा । तथा **समग्रं** सम्पूर्णं **यद्ध्यानं** परमलयः शुक्लध्यानमित्यर्थः, तदे**वाग्नि**र्वह्निस्तेन **दग्धं** भस्मसात्कृतं **भवस्य** संसारस्य **बीजं** ज्ञानावरणीयादिकर्म यैस्ते तथा, **योगीश्वरा** गणधराश्छद्मस्थतीर्थकरा वा तैः **शरणीया** आश्रयणीया नमस्करणध्यानादिना । तथा **स्मरणीया** ध्येया मोक्षसुखाभिलाषुकाणां भव्यानामिति शेषः, एवंविधाः **सिद्धाः शरणं** भवन्तु ।।२७।।

**गुण०** कर्मोपाधिमुक्तत्वात्**प्रतिप्रेरिताः** क्षिप्ता अनादृताः **प्रत्यनीकाः** शत्रवो यैः, समशत्रुमित्रत्वात् । अथवा **प्रतिप्रेरिता** निराकृताः **प्रत्यनीका** अभ्यन्तरशत्रवो रागाद्या यैस्ते । तथा **समग्रं** सम्पूर्णं यद् **ध्यानं** परमलयस्तदे**वाग्निस्**तेन **दग्धं** भस्मसात्कृतं **भवबीजं** ज्ञानावरणीयादि यैस्ते । तथा **योगीश्वरै**र्गणधरैश्छद्मस्थतीर्थकरैर्वा तत्सुखमभिलाषुभिः **स्मरणीया** ध्येयाः **शरणीया** वा अनुगन्तव्याः शरणत्वेन ते । एवं गुणगरिष्ठाः **सिद्धाः शरणत्वेन** त्रिसन्ध्यमपि **स्मरणीया** इत्यर्थः ॥२७॥

**पावियपरमाणंदा गुणनीसंदा विदिण्णभवकंदा ।**
**लहुईकयरविचंदा सिद्धा सरणं खवियदंदा ॥२८॥**

**सोम० 'पाविअ'**त्ति, **प्रापित** आत्मजीवं प्रति ढौकितः प्राकृतत्वाद्वा प्राप्तः **परमानन्दो** यैः सदा मुदितत्वात्ते तथा । तथा **गुणानां** ज्ञानदर्शनादीनां परिपाकप्राप्तत्वा**न्निःस्यन्दः** सारो येषु ते तथा, सर्वसारज्ञानादिगुणा इत्यर्थः। **विदीर्णो** विदारितः स्फाटितो **भवस्य** संसारस्य मोहनीयादिकर्मरूपः **कन्दो** यैस्ते । तथा लोकालोकप्रकाशककेवलोद्योतेन **लघुकीकृतौ** अल्पप्रभावीकृतौ **रविचन्द्रौ** यैः, तदुद्योतस्य परिमितयोजनप्रकाशकत्वात्ते । तथा **क्षपितं** क्षयं नीतं **द्वन्द्वं** संग्रामादिरूपं यैस्ते तथा, सर्वथा निष्कषायत्वात् । ते एवंविधाः **सिद्धाः शरणं** भवन्तु ॥२८॥

**गुण०** सदामुदितत्वात् **प्रापित** आत्मजीवं प्रति ढौकितः **परमानन्दो** परमोल्लासविशेषो यैस्ते । तथा **गुणानां** ज्ञानदर्शनचारित्ररूपाणां परिपाकप्राप्तत्वा**न्निष्यन्दः** सारो येषां ते । तथा कर्मोच्छेदना**द्विदीर्णो** विदारितः स्फाटितो **भवस्य** संसारस्य **कन्दो** यैस्ते । तथा केवलोद्योतेन **लघुकीकृतौ** अल्पप्रभावीकृतौ **रविचन्द्रौ** यैर्यतस्तदुद्योतस्य योजनप्रमितत्वात् ते । तथा निष्कषायत्वात् **क्षपितं** क्षयं नीतं **द्वन्द्वं** संग्रामो यैस्ते तथा । एते एवंविधाः **सिद्धाः शरणं** भवन्तु ॥२८॥

**उवलद्धपरमबंभा दुल्लहलंभा विमुक्कसंरंभा ।**
**भुवणघरधरणखंभा सिद्धा सरणं निरारंभा ॥२९॥**

**सोम० 'उवलद्ध'**त्ति, उपलब्धं प्राप्तं परमब्रह्म प्रकृष्टं ज्ञानं यैस्ते **उपलब्धपरमब्रह्माणः,** समवाप्तकेवलज्ञाना इत्यर्थः। तथा **दुर्लभो लम्भो** लाभो मुक्तिपदप्राप्तिलक्षणो येषां

सर्वलाभाग्रेसरत्वात्तल्लाभस्य, सर्वचारित्रादिक्रियाणां तल्लाभे एव साफल्याच्च । तथा **विमुक्तः** परित्यक्तः करणीयपदार्थेषु **संरम्भ** आटोपो यैस्ते तथा, निष्पन्नसर्वप्रयोजनत्वात्तेषाम् । तथा **भुवनं** त्रिभुवनं तदेव **गृहं** तस्य **धरणमवष्टम्भनं** तत्र स्तम्भा इव स्तम्भाः, भुवनलोकस्य दुर्गतौ पततः स्वशरणप्रतिपत्तुः स्थिराधारभूतत्वात्तेषाम् तथा **निरारम्भा** निर्गता बहिर्भूता आरम्भेभ्यः सर्वकृत्यप्रयोजनेभ्यो ये ते तथा कृतकृत्यत्वात्तेषाम् । ते एवम्भूताः **सिद्धा** मम **शरणमा**लम्बनं भवन्तु । एतेन सिद्धाख्यं द्वितीयं शरणमभिहितम् ।।२९।।

**गुण०** **उपलब्धं** प्राप्तं **परमब्रह्मज्ञानं** यैस्ते तथा, अवगतकेवला इत्यर्थः । सर्वलाभाग्रेसरत्वात् तल्लाभस्य **दुर्लभो लाभो** मुक्तिप्राप्तिलक्षणो येषां ते तथा दुर्लभलाभत्वमेवार्थैर्भाव्यते। **विमुक्तः** परित्यक्त इतिकर्तव्यतापदार्थेषु **संरम्भ** आटोपो यैस्ते, निष्पन्नसर्वप्रयोजनत्वात्तेषाम्, तथा **भुवनं** त्रिभुवनं तदेव **गृहं** तस्य **धरणम**वष्टम्भनं तत्र **स्तम्भा** इव स्तम्भा भुवनस्य सिद्धिशरणप्रतिपत्तुर्लोकस्य दुर्गतौ पततः स्थिराधारभूतत्वात्तेषामित्यर्थः। तथा **निरारम्भा** निर्गता बहिर्भूता आरम्भेभ्यः कृत्यप्रयोजनेभ्यो ये ते तथा । ते एवंस्वरूपाः **सिद्धा** मम **शरणं** भवन्तु ।।२९।।

**सोम०** अथ साधुशरणं प्रतिपित्सुर्यद्विधत्ते तदाह-

**गुण०** एतेन सिद्धाख्यं द्वितीयं शरणमभिहितम् । अधुना साधुशरणं प्रतिपित्सुर्यद्विधत्ते तदाह -

**सिद्धसरणेण नयबंभहेउसाहुगुणजणियअणुराओ ।**
**मेइणिमिलंतसुपसत्थमत्थओ तत्थिमं भणइ ।।३०।।**

**सोम०** **'सिद्ध'**त्ति, नया नैगमादयस्तैरुपलक्षितं यद्ब्रह्म श्रुतज्ञानं द्वादशाङ्गरूपं 'नयभङ्गप्रमाणगमगहन'मिति वचनात्तस्य नयब्रह्मणो ये हेतवः कारणभूताः साधुगुणा विनयादयो, विनयादिगुणसम्पन्नस्यैव श्रुतावाप्तेः, तेषु नयब्रह्महेतुषु साधुगुणेषु जनित उत्पादितोऽनुरागो बहुमानो यस्य स **नयब्रह्महेतुसाधुगुणजनितानुरागः** शरणप्रतिपत्ता साध्वादिः । केनास्यानुरागः कृतः ? इत्याह-**सिद्धशरणेन** पूर्वोक्तेन । पुनः कथम्भूतः सः ? मेदिन्यां पृथ्व्यां मिलत् लुठत् सुप्रशस्तं भक्तिभरभासुरत्वान्मस्तकमुत्तमाङ्गं यस्य

स **मेदिनीमिलत्सुप्रशस्तमस्तकः** । एवंविधः स साधुगुणरागी भूतलन्यस्तमौलिः सन् **तत्र** प्रस्तावे **इदं** वक्ष्यमाणं **भणति** ।।३०।।

**गुण०** नया नैगमादयस्तैरुपलक्षितं यद् ब्रह्म श्रुतज्ञानं द्वादशाङ्गं 'नयभङ्गप्रमाणगमगहन'मितिवचनात् तस्य नयब्रह्मणो ये हेतवः कारणभूताः साधुगुणा विनयादयो विनयगुणसम्पन्नस्यैव येनान्यान्यगुणावाप्तिः,

**विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाऽऽश्रवनिरोधः ।।**

तेषु नयब्रह्महेतुषु साधुगुणेषु जनित उत्पादितोऽनुरागो बहुमानो यस्य स **नयब्रह्महेतुसाधुगुणजनितानुरागः,** स शरणं प्रतिपत्ता, केनास्यानुरागः कृतः ? इत्याह- **सिद्धशरणेन** । तथा मेदिन्यां मिलत् लुठत् सुप्रशस्तं भक्तिभरभासुरं मस्तकं यस्य स **मेदिनीमिलत्सुप्रशस्तमस्तकः** गुरुपादार्पितमस्तक इत्यर्थः । स एवंविधः साधुगुणरागी भूतलन्यस्तमौलि**रिदं** वक्ष्यमाणं **भणति** ।।३०।।

**सोम०** यदयं भणति तन्नवभिर्गाथाभिराह-

**गुण०** यदयमाचष्टे तन्नवभिर्गाथाभिराह-

**जियलोयबंधुणो कुगइसिंधुणो पारगा महाभागा ।**
**नाणाइएहिं सिवसुक्खसाहगा साहुणो सरणं ।।३१।।**

**सोम०** **'जियलोय'**त्ति, **जीवलोकस्य** प्राणिवर्गस्य षड्जीवनिकायात्मकस्य त्रिविधं त्रिविधेन रक्षाकारित्वात् बान्धवा इव **बान्धवा** ये । तथा कुत्सिता गतिः **कुगतिः** नरकतिर्यगादिरूपा सैव सिन्धुः महानदी **समुद्रो** वा तस्यास्तस्य वा पारं तीरं गच्छन्तीति **पारगास्**तीरवर्तिनः सुगतिगामित्वादेव साधूनाम् । तथा **महान् भागो**ऽतिशयविशेषो येषां ते तथाऽनेकलब्धिसम्पन्नत्वात्तेषाम् । तथा **ज्ञानादिभि**र्ज्ञानदर्शनचारित्रैरेव शिवसौख्यं मोक्षशर्म साधयन्ति ये ते **शिवसौख्यसाधकाः,** एतेन तीर्थान्तरीयैर्यत्स्नानादिक्रियाभिर्मोक्षसाधनमुक्तं तन्निरासः कृतो द्रष्टव्यः । ते एवंविधाः **साधवो** मम **शरणं** भवन्तु ।।३१।।

**गुण०** **जीवलोकस्य** प्राणिवर्गषट्निकायात्मकस्य **बान्धवा** इव बान्धवा ये वर्तन्ते तेषां

त्रिविधं त्रिविधेन रक्षाकरणात् । कुगतिरेव सिन्धुः **कुगतिसमुद्रो** वा तस्यास्तस्य वा पारं तीरं गच्छन्तीति **पारगास्**तीरवर्तिनः कटाक्षीकृतसुगतित्वात् । भागोऽचिन्त्या शक्तिर्**महान् भागो**ऽतिशयविशेषो येषां ते । तथा **ज्ञानादिभिरेव** ज्ञानदर्शनचारित्रैः शिवसुखं साधयन्ति ये ते **शिवसुखसाधकाः**,

**हत्वा जीवसहस्राणि कृत्वा पापशतानि च ।**
**स्नात्वा गङ्गाजले पूते यान्ति जीवाः शिवालयम् ।।**

इत्यादिना यदुच्यते तीर्थान्तरीयैस्तन्निरासः कृतः । ते एवंविधाः **साधवो** मम **शरणं** भवन्तु ।।३१।।

**सोम॰** साधुभेदानाह-

**गुण॰** साधव एव ये प्रत्यक्षज्ञानादिसम्पदुपेतास्तान् सार्धगाथया-ऽऽह-

**केवलिणो परमोही विउलमई सुयहरा जिणमयम्मि ।**
**आयरिय उवज्झाया ते सव्वे साहुणो सरणं ।।३२।।**

**सोम॰** केवलमसहायं मत्यादिज्ञानानपेक्षं सर्वद्रव्यपर्यायादिविषयं ज्ञानं विद्यते येषां ते **केवलिनः** । **'परमोहि'**त्ति अवधिर्मर्यादा रूपिद्रव्येषु प्रवृत्तिरूपा तदुपलक्षितं ज्ञान-मप्यवधिः, परमश्चासाववधिश्च परमावधिः यदुत्पत्तेरनन्तरमवश्यमन्तर्मुहूर्तेन केवली भवति उत्कृष्टमवधिज्ञानमित्यर्थस्तद्योगात्साधवोऽपि **परमावधयः**, उत्कृष्टावधि-साधुभणनेन जघन्यमध्यमावधयोऽपि साधवोऽन्तर्भाविता ज्ञेयाः । **'विउलमइ'त्ति** मनःपर्यायज्ञानं द्विधा ऋजुमतिविपुलमतिभेदात्, तत्र विपुला मतिर्येषां ते **विपुलमतयः**, विपुलमतिग्रहणेन ऋजुमतयोऽपि गृहीता ज्ञातव्याः, द्वयेषामप्येषां मनुष्यक्षेत्रान्तर्वर्तिसंज्ञिपञ्चेन्द्रियमनोद्रव्यपरिच्छेदकत्वात्, बह्वल्पपर्यायग्रहणादिनैव विशेषात् । तथा श्रुतं कालिकोत्कालिकाङ्गप्रविष्टानङ्गप्रविष्टादिलक्षणं सूत्रार्थोभयरूपं धरन्ति योग्यशिष्यप्रशिष्यादिप्रदानेनाव्यवच्छिन्नं कुर्वन्तीति **श्रुतधराः** । सामान्यतः सर्वेऽपि विशेषेण तु आचर्यन्ते आसेव्यन्ते मोक्षार्थिभिरित्याचार्याः पञ्चविधाचारधारिणः सूत्रार्थोभयवेदिनो गच्छावलम्बनभूताः षट्त्रिंशद्गुणवन्तोऽर्थव्याख्यानकारिणः। उपेत्याऽऽगत्य अधीयते येभ्य इत्युपाध्यायाः सूत्रार्थोभयवेदिनो द्वादशाङ्गसूत्राध्यापका उपाध्यायाः । एते च आचार्योपाध्यायाः सामान्यतो लौकिकाः कलाचार्यादयोऽपि

लभ्यन्ते इति तद्व्यवच्छेदायाह- **'जिणमयंमि'**त्ति जिनमते जिनशासने ये **आचार्योपाध्यायाः,** एतद्ग्रहणं चोपलक्षणम्, तेन प्रवर्तकस्थविरगणावच्छेदका अप्यत्र गृहीता ज्ञातव्याः । सर्वशिष्यान् तपःसंयमव्यापारेषु प्रवर्तयन्तो गणतप्तिकराः प्रवर्तका उच्यन्ते । प्रवर्तकव्यापारितार्थेषु सीदमानान् साधून् स्थिरीकुर्वन्तः स्थविराः। गच्छयोग्यक्षेत्रोपध्यादिसम्पादनार्थं नवनवक्षेत्रविहारकारिणो गणावच्छेदकाश्च । **ते** च **सर्वे** केवलिप्रभृति**साधवः शरणं** भवन्तु ।।३२।।

**गुण०** केवलमसहायं ज्ञानं मत्यादिज्ञानानपेक्षं सर्वद्रव्यसर्वपर्यायादिविषयं ज्ञानं विद्यते येषां ते **केवलिनः**। अवधिर्मर्यादा रूपिद्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधिः, परमश्चासाववधिश्च परमावधिः, स च क्षेत्रतो लोकप्रमाणा-सङ्ख्येयालोकाकाशखण्डप्रमाणः, कालतोऽसंख्येयोत्सर्पिण्यवसर्पिणीविषयः, द्रव्यतो रूपिद्रव्यप्रभृति यावत्परमाणुदर्शी, भावतः सामान्येनानन्तपर्यायपरिच्छेदको विशेषतः परमाणोरपि चतुष्पर्यायनिर्णयकारी, परमावधिश्चावश्यमन्तर्मुहूर्त्तेन केवली भवति, तद्योगात्साधवोऽपि **परमावधयः,** उत्कृष्टावधिसाधुभणनेन जघन्यमध्यमावध-योऽप्यन्तर्भाविता ज्ञेयाः । विपुला मतिर्येषां ते **विपुलमतयः,** अत्रापि विपुलमति-भणनेन ऋजुमतयोऽप्यन्तर्भाविताः, एतौ च मनुष्यक्षेत्रान्तर्वर्तिसंज्ञिपञ्चेन्द्रियमनोद्रव्य-विषयौ । श्रुतं कालिकोत्कालिकाङ्गप्रविष्टानङ्गप्रविष्टादिलक्षणं धरन्ति योग्यशिष्य-प्रदानेन तस्यावस्थितिं कुर्वन्तीति **श्रुतधराः** प्रवचनव्याख्याननिपुणाः, ते एवम्भूताः श्रुतधराः । तथा आचर्यते आसेव्यते ज्ञानार्थिभिरि**त्याचार्यः** । उपेत्यागत्य अधीयते यस्मादि**त्युपाध्यायः** । इत्यनया व्युत्पत्त्या लौकिकाचार्योपाध्यायाः कलाचार्यादयोऽपि लभ्यन्त इति तद्व्यवच्छेदायाह - **जिनमते** जिनशासने ये आचार्योपाध्यायाः, एतेन मुख्यानां ग्रहणात्प्रवर्तकस्थविरगणावच्छेदिनोऽपि ज्ञातव्याः । **ते** च **सर्वे** केवलि-प्रभृति**साधवो** मम **शरणं** भवन्त्वित्यर्थः ।।३२।।

**चउदस-दस-नवपुव्वी दुवालसिक्कारसंगिणो जे य ।**
**जिणकप्पाऽहालंदिय परिहारविसुद्धिसाहू य ।।३३।।**

**सोम०** तथा चतुर्दश पूर्वाणि विद्यन्ते येषां ते **चतुर्दशपूर्विणः** श्रीप्रभवादयः । दशान्येव पूर्वाणि विद्यन्ते येषां ते **दशपूर्विणः** श्रीआर्यमहागिर्यादयः। अन्त्यानि चत्वारि पूर्वाणि प्रायः समुदितान्येव व्यवच्छिद्यन्ते इति चतुर्दशपूर्व्यनन्तरं दशपूर्विणोऽभिहिताः । तथा

**नवपूर्विणः** श्रीआर्यरक्षितादयः, पूर्वीशब्दः स्थानत्रयेऽपि सम्बध्यते । तथा- **'दुवालस'त्ति** अग्रेतनाङ्गशब्दसम्बन्धात् द्वादशाङ्गिनः । ननु चतुर्दशपूर्विणां द्वादशाङ्गिनां च को भेदः ? उच्यते द्वादशतममङ्गं दृष्टिवादः, स च परिकर्म १ सूत्र २ पूर्वगत ३ अनुयोग ४ चूलिका ५ भेदात्पञ्चभेदः, पूर्वाणि च चतुर्दशापि पूर्वगतभेदमध्ये सन्ति द्वादशतमाङ्गस्यैकदेशभूतान्येवेति पूर्वधरद्वादशाङ्गधरभेदसिद्धिः। तथा एकादशाङ्गिनश्च **ये च,** चकारो भिन्नक्रमसूचकः ।

सम्प्रति विशेषानुष्ठानिन आह-**'जिणकप्पं'**त्ति एकाकित्वेन निष्प्रतिकर्मशरीरतया च जिनस्येव कल्प आचारो येषां ते जिनकल्पिका दुष्करक्रियाकारिणः । **'अहालंदिअ'**त्ति उदकार्द्रः करो यावता कालेन शुष्यति तत् जघन्यं लन्दं तत आरभ्योत्कृष्टं पञ्चरात्रिन्दिवलक्षणं लन्दम्, तदत्र गृह्यते, उत्कृष्टलन्दस्यानतिक्रमेण चरन्तीति यथालन्दिकाः, पञ्चको गणोऽमुं कल्पं प्रतिपद्यते, मासकल्पक्षेत्रं च गृहपङ्क्तिरूपाभिः षड्भिर्वीथिभिर्जिनकल्पिकवत् परिकल्पयन्ति, एकैकस्यां च वीथ्यां पञ्च पञ्च दिनानि पर्यटन्ति, जिनकल्पिकास्त्वेकमेव दिनम् । सप्तम एव दिने पुनस्तस्यां वीथ्यां समागच्छन्ति इत्येतेषां भेदः । तथा परिहारविशुद्धिकाश्च ते साधवश्च **परिहारविशुद्धसाधवः ।**

नव साधवोऽमुं कल्पं प्रतिपद्यन्ते, तेषां मध्ये षण्मासान् यावच्चत्वारस्तपः कुर्वन्ति, चत्वारोऽनुपारिहारिकत्वमेकश्च कल्पस्थितत्वं गुरुत्वमित्यर्थः, एते पञ्चापि निर्लेपाचाम्लभोजिनः, पारिहारिकाणां च ग्रीष्मे चतुर्थषष्ठाष्टमरूपं शिशिरे षष्ठाष्टदशमरूपं वर्षास्वष्टमदशमद्वादशमरूपं जघन्यमध्यमोत्कृष्टभेदं तपः, पारणके च तेषां नित्यमाचाम्लम्, द्वितीयषण्मासाननुपारिहारिकाः पारिहारिकत्वं पारिहारिकाश्चानुपारिहारिकत्वं प्रतिपद्यन्ते, तृतीयषण्मासान् कल्पस्थितः पूर्वोक्तं पारिहारिकतपः, अपरेऽष्टापि निर्लेपाचाम्लादितपः कुर्वन्ति, एवमष्टादशभिर्मासैरयं कल्पः पूर्णो भवति, तत्समाप्तौ च तमेव कल्पं जिनकल्पं वा प्रतिपद्यन्ते गच्छं वा समायान्ति । चः सर्वेषां समुच्चये ।।३३।।

**गुण०** पूर्वशब्दस्य तृतीयपदस्थस्यापि पृथक्योजनात् चतुर्दशसङ्ख्यानि पूर्वाणि विद्यन्ते येषां ते **चतुर्दशपूर्विणः** श्रीभद्रबाहुस्वामिन इव । तान्येवाद्यानि दश येषां ते **दशपूर्विणः** श्यामार्यसूरय इव । **नवपूर्विणः** श्रीआर्यरक्षितगुरव इव । अङ्गशब्दस्य प्रत्येकमभिसम्बन्धात् **द्वादशाङ्गिनः,** इह चतुर्दशपूर्विणो द्वादशाङ्गिनश्चैकार्था इति न वाच्यम्, यतो द्वादशतमाङ्गस्य दृष्टिवादलक्षणस्य पञ्चप्रस्थानात्मकत्वात्, **एकादशाङ्गिनश्च** ये,

चस्य भिन्नक्रमार्थत्वात्, **ये** विशेषानुष्ठानिनो विशेषलब्धिसम्पन्नाश्च तान् सार्धगाथया दर्शयति-**जिणकप्पा-** गाथार्धम्, खीरासवमाहुः एकाकित्वनिष्प्रतिकर्मशरीरतया जिनस्येव कल्पो येषां ते **जिनकल्पिका**स्तेषामयं विधिः प्रतिपन्नजिनकल्पो यत्र ग्रामे मासकल्पं चातुर्मासकं वा करिष्यति तत्र षड्भागान् कल्पयति, ततश्च यत्र भागे एकस्मिन् विषये गोचरचर्यां हिण्डति, तत्र सप्तम एव दिवसे पर्यटति । एषणादिविषयं मुक्त्वा न केनापि सार्धं जल्पति, एकस्यां च वसतौ यद्यपि उत्कृष्टतः सप्त जिनकल्पिका वसन्ति तथापि परस्परं न भाषन्ते, यद्युपविशति तदा नियमादुत्कट एव, न तु निषद्यायाम्, औपग्रहिकोपकरणस्यैवाभावात्, प्रतिपद्यमानकः सामायिक-छेदोपस्थापनयोः पूर्वप्रतिपन्नसूक्ष्मसम्परायययथाख्यातचारित्रयोरुपशमश्रेण्यामवाप्यते प्रतिपद्यमानानामुत्कृष्टतः शतपृथक्त्वम्, पूर्वप्रतिपन्नानां सहस्रपृथक्त्वं जिनानाम्, जिनकल्पिकाः प्रायोऽपवादं नासेवन्ते, जङ्घाबलक्षीणस्त्वविहरमाणोऽप्याराधक एव, आवश्यिकीनैषेधिकीमिथ्यादुष्कृतगृहिविषयपृच्छोपसम्पल्लक्षणाः पञ्च सामाचार्यः, नत्विच्छादयः, लोचं चासौ नित्यमेव करोति, विहारो भिक्षा च तृतीयपौरुष्यामेव । **यथालन्दिका**स्तेषां स्वरूपमिदम्-उदकार्द्रः करो यावता कालेन शुष्यति तत आरभ्य उत्कृष्टतः पञ्चरात्रिंदिवलक्षणस्य उत्कृष्टलन्दस्यानतिक्रमेण चरन्तीति यथालन्दिकाः, पञ्चको गणोऽमुं कल्पं प्रतिपद्यते ग्रामं च गृहपङ्क्तिरूपाभिः षड्भिर्वीथी-भिर्जिनकल्पिकवत्परिकल्पयन्ति, किन्त्वेकैकस्यां वीथ्यां पञ्च दिनानि पर्यटन्ति । इत्युत्कृष्टलन्दभारिणो यथालन्दिका उच्यन्ते, एते च प्रतिपद्यमानका जघन्यतः पञ्चदश भवन्ति, उत्कृष्टतः सहस्रपृथक्त्वं, पूर्वप्रतिपन्नास्तु जघन्यत उत्कृष्टतश्च कोटिपृथक्त्वं भवन्ति । **परिहारविशुद्धिकाश्च** ते **साधवश्च** परिहारविशुद्धिकसाधवः, निर्विशमानका निर्विष्टकायिकाश्च ते, तत्र यथोक्ततपस आसेवकत्वान्निर्विशमाना उच्यन्ते, अनुपारि-हारिका विहितवक्ष्यमाणतपसो निर्विष्टकायिका इति, तत्र नवानामयं कल्पो भवति, ग्रीष्मशिशिरवर्षासु पृथक्पृथक् जघन्यमध्यमोत्कृष्टभेदं तपः कुर्वन्ति, तत्र ग्रीष्मे चतुर्थषष्ठाष्टमानि, शिशिरे षष्ठाष्टमदशमानि, वर्षासु अष्टमदशमद्वादशमानि, पारणके चाचाम्लम्, पञ्चानां भिक्षानां द्वयोर्ग्रहो द्वयोरप्यभिग्रहः, तत्र प्रथमं चत्वारो यथोक्तं तपः कुर्वन्ति, चत्वारोऽनुपारिहारिकत्वमेकश्च कल्पस्थितत्वम्, एते च पञ्चापि प्रतिदिनं षण्मासान् यावदाचाम्लभोजिनः, षण्मासानन्तरं व्यूढतपसोऽनुपारिहारिकत्वं अनुपारि-

हारिकाश्च पारिहारिकत्वम्, कल्पस्थस्तथैवास्ते यावद् द्वितीयषण्मासाः, ततो द्वितीय-षण्मासानन्तरं कल्पस्थः तपः करोति, तेषां व्यूढतपसामष्टानां मध्यादेकः कल्पस्थो भवति, सप्तानुपारिहारिका भवन्ति, अष्टावपि षण्मासं यावत्प्रतिदिनाचाम्लभोजिनः, अष्टादशभिर्मासैः पूर्णकल्पो भवति, कल्पसमाप्तौ पुनस्तमेव वा जिनकल्पं वा प्रतिपद्यन्ते गच्छवासमायान्ति, प्रतिपत्तिश्च जिनसमीपे सेवकपार्श्वे वा, एते च सहस्रारान्तमेव यान्ति ।।३३।।

**सोम०** विशेषलब्धिसम्पन्नान् साधूनाह-

**खीरासव महुआसव संभिन्नस्सोय कुट्ठबुद्धी य ।**
**चारण-वेउव्वि-पयाणुसारिणो साहुणो सरणं ।।३४।।**

**सोम०** '**खीरासव**'त्ति चक्रवर्तिसम्बन्धिनो गोलक्षस्य भक्षितेक्षुक्षेत्रादिविशेषस्यार्द्धार्द्धक्रमेण पीतगोक्षीरस्य पर्यन्ते यावदेकस्या गोः सम्बन्धि यत्क्षीरं तदिव येषां वचनं माधुर्य-रसमाश्रवति मुञ्चतीति **क्षीराश्रवाः** । मधुशर्करादि मधुरद्रव्यं तद्रसतुल्यं येषां वचनं ते **मध्वाश्रवाः**। उपलक्षणत्वात्सर्पिराश्रवा अपि गृह्यन्ते, ते च सुगन्धिघृतरसतुल्यवचनाः। तथा '**संभिन्नस्सोय**'त्ति ये सर्वैः शरीरावयवैः श्रृण्वन्ति जानन्ति च, चक्रवर्तिस्कन्धा-वारसत्कमनुष्यतिर्यग्कोलाहलशब्दसन्दोहान् अयमेतस्यायमेतस्येत्यादिव्यक्त्या पृथक् पृथक् भिन्नान् व्यवस्थापयन्तीति वा सम्भिन्नश्रोतसः। '**कुट्ठबुद्धीय**'त्ति नीरन्ध्रकोष्ठ-कक्षिप्तधान्यवद् ये सुनिश्चितस्थिरसंस्कारसूत्रार्थास्ते कोष्ठबुद्धयः ।

'**चारण**'त्ति अतिशयचरणाच्चारणाः, ते द्विधा जङ्घाचारणा विद्याचारणाश्च । तत्राद्या एकोत्पातेन रुचकवरद्वीपं यान्ति, ततः प्रतिनिवृत्ता द्वितीयोत्पातेन नन्दीश्वरे तृतीयोत्पातेन यतो गतास्तत्रायान्ति, ऊर्ध्वदिशं त्वाश्रित्य ते प्रथमोत्पातेन पाण्डुकवनं द्वितीयोत्पातेन नन्दनवनं तृतीयोत्पातेन यतो गतास्तत्रायान्ति, तपोलब्धेः प्रयुज्यमानाया ह्रासभवनात्। विद्याचारणास्तु प्रथमोत्पातेन मानुषोत्तरनगं द्वितीयोत्पातेन नन्दीश्वरं तृतीयोत्पातेन यतो गतास्तत्रायान्ति; ऊर्ध्वं तु प्रथमोत्पातेन नन्दनवनं द्वितीयोत्पातेन पाण्डुकवनं तृतीयोत्पातेन यतो गतास्तत्रायान्ति, विद्यायाः प्रयुज्यमानाया वृद्धिभवनात् । तथाऽन्येऽपि बहुप्रकाराश्चारणाः साधवः भवन्ति, तद्यथा-आकाशगामिनः, पर्यङ्कावस्थानिषण्णाः, कायोत्सर्गस्थशरीरा वा पादोत्क्षेपक्रमं

विनाऽपि व्योमचारिणः, केचित्तु *फलपुष्पपत्रहिमवदादिगिरिश्रेणिअग्निशिखानीहारावश्याय*-मेघवारिधारामर्कटतन्तुज्योतीरश्मिपवनाद्यालम्बनगतिपरिणामकुशलाः । तथा वापीनद्यादिजले तज्जीवानविराधयन्तो भूमाविव पादोत्क्षेपनिक्षेपकुशला जलचारणाः, तथा भुव उपरि चतुरङ्गुलप्रमिते व्योम्नि पादोत्क्षेपनिक्षेपनिपुणा जङ्घाचारणा इति । **'विउव्वि'**त्ति वैक्रियलब्धिमन्तः साधवः, ते च वैक्रियशक्त्या नानारूपैरसङ्ख्येयानपि द्वीपसमुद्रान् पूरयन्ति, जम्बूद्वीपं तु स्त्र्याद्यन्यतररूपैर्बिभ्रति । **'पयाणुसारि'**त्ति ये पूर्वापरपदानुसारतः स्वयं त्रुटितपदमनुसरन्ति पूरयन्ति ते पदानुसारिणः । इह चोपलक्षणत्वादामर्षौषध्यादिलब्धिसम्पन्नाः साधवोऽत्र ज्ञेयाः, एते एवंविधभेदभिन्नाः **साधवो** मे **शरणं** भवन्तु ।।३४।।

**गुण०** चीर्णग्रन्थिपर्णकादिविशेषस्य चक्रवर्त्तिसम्बन्धिनो गोलक्षस्यार्धार्धक्रमेण पीतगोक्षीरस्य पर्यन्ते यावदेकस्या गोः सम्बन्धि यत्क्षीरं तदिह गृह्यते, तदिव यस्य वचनरसमाधुर्यमाश्रवति मुञ्चतीति स **क्षीराश्रवः**। मधुशर्करादिमधुरद्रव्यं तद्रसतुल्यं यस्य वचनं स **मध्वाश्रवः**। उपलक्षणत्वात्सर्पिराश्रवश्च । ये सर्वैः शरीरावयवैः श्रृण्वन्ति जानन्ति च, भिन्ना वा चक्रवर्त्तिस्कन्धावारबहलकोलाहलजशब्दसन्दोहान्, अयमेतस्यायमेतस्येत्यादिव्यक्त्या पृथक्पृथक् व्यवस्थापयन्तीति **संभिन्नश्रोतसः**। नीरन्ध्रधान्यकोष्ठकक्षिप्तधान्यवद् ये सुनिश्चितस्थिरसंस्कारसूत्रार्थास्ते **कोष्ठबुद्धयः**। अतिशयचरणा**च्चारणा**स्ते च द्विधा जङ्घाचारणा विद्याचारणाश्च । **'विउव्वि'**त्ति वैक्रियलब्धिमन्तः साधवस्तेषां च नानारूपैरसङ्ख्येयद्वीपसमुद्राभरणविषया वैक्रियशक्तिर्भवति, जम्बूद्वीपं पुत्र्यादिरूपैर्बिभ्रत्यपि । ये पूर्वापरपदानुसारतस्त्रुटितपदमनुसरन्ति पूरयन्तीत्यर्थस्ते **पदानुसारिणो** वज्रस्वामिन इव । इह च येऽतिशयर्द्धिसम्पन्नाः साधवो नोक्तास्तेऽप्युपलक्षणत्वाद् ज्ञेयाः । एतेन ये जिनकल्पिकादयः पदानुसारिपर्यन्ताः **साधव**स्ते **शरणं** भवन्तु ।।३४।।

**सोम०** अथ सर्वसाधारणगुणा ये साधवस्तान् गाथापञ्चकेनाह-

**गुण०** अथ साधारणगुणा ये साधवस्तान् गाथापञ्चकेनाह

**उज्झियवइर-विरोहा निच्चमदोहा पसंतमुहसोहा ।**
**अभिमयगुणसंदोहा हयमोहा साहुणो सरणं ।।३५।।**

**सोम०** वैरं प्रभूतकालजं श्रीवीरजिनं प्रति त्रिपृष्ठभवनिहतसिंहजीवहालिकब्राह्मणकपिलस्येव।

विरोधः कुतश्चित्कारणात्तत्कालसम्भवोऽप्रीतिविशेषः, प्रतिमार्थे उदायनचण्डप्रद्योतयोरिव, अथवा वैरहेतवो विरोधाः, उज्झितास्त्यक्ता वैराणि विरोधाश्च यैस्ते तथा । यत **एवोज्झितवैरविरोधा** अत एव नित्यं सततं **अद्रोहाः** परद्रोहवर्जिताः, वैरवत एव परद्रोहाभिप्रायसद्भावात् । यत एवाद्रोहा अत एव **प्रशान्ता** प्रसन्ना **मुखशोभा** वदनच्छाया येषां ते तथा, परद्रोहिणां हि मुखं विकरालं स्यादिति । यत एवंरूपा अत **एवाभिमतः** प्रशस्यः, पाठान्तरेऽभिगतस्सहचारी वा **गुणसन्दोहो** गुणनिकरो येषां ते तथा । एवंविधानां च ज्ञानातिशयः स्यादिति, **हतो मोहो**ऽज्ञानं यैस्ते तथा ज्ञानिन इत्यर्थः। ते **साधवः शरणं** भवन्तु ।।३५।।

**गुण०** वैरं प्रभूतकालजम्, तत्कालजो विरोधोऽप्रीतिविशेषः, ततश्च वैराणि च विरोधाश्च, उज्झितास्त्यक्ता वैराणि विरोधाश्च यैस्ते, तथा - **नित्यं** सर्वदैव । यत एव **उज्झितवैरविरोधा** अत एवाद्रोहाः परद्रोहवर्जिनः, वैरत एव परद्रोहाभिप्रायः स्यात् । यत **एवाद्रोहा** अत एव **प्रशान्ता** प्रसन्ना **मुखशोभा** वदनच्छाया येषां ते तथा, परद्रोहिणो हि विकरालमुखशोभा भवन्तीति । यतश्चैवंस्वरूपा अत **एवाभिगतो**ऽनुगतः सहचारी **गुणसन्दोहो** गुणनिकरो येषां ते तथा । एवंविधानां च ज्ञानातिशयो भवतीति । **हतो मोहो**ऽज्ञानं यैस्ते तथा ज्ञानिन इत्यर्थः । ते **शरणं साधवो** भवन्तु ।।३५।।

**खंडियसिणेहदामा अकामधामा निकामसुहकामा ।**
**सुपुरिसमणाभिरामा आयारामा मुणी सरणं ।।३६।।**

**सोम०** खण्डितानि त्रोटितानि स्नेहरूपाणि दामानि रज्जवः, आर्द्रकुमारेणेवात्मनो हस्तिनो वा यैस्ते **खण्डितस्नेहदामानः** छिन्नस्नेहनिगडा इत्यर्थः । न विद्यते कामो विषयाभिलाषो धामानि च गृहाणि येषामथवा न विद्यन्ते कामधामानि विषयगृहाणि येषां ते तथा, विषयासक्तिहेतुरम्यमन्दिररहिता इत्यर्थः। यद्वा न कामस्य धाम स्थान**मकामधामाः**, प्राकृतत्वात्पुंस्त्वम्, **निष्कामं** निर्विषयं यत्**सुखं** मोक्षसम्बन्धि तद्विषयो**ऽभिलाषो** येषां ते तथा, मोक्षसुखाभिलाषिण इत्यर्थः । तथा सत्पुरुषाणामाचार्यादीनामिङ्गिताकारसम्पन्नत्वादिना स्वविनयेन वन्दारूणां वा स्वशान्तत्वादिना दमदन्तेनेव युधिष्ठिरादीनां मनांस्यानन्दयन्ति अभिरामयन्तीति **सत्पुरुषमनोऽभिरामाः**। तथा त्यक्तान्यकृत्यत्वादात्मानं तासु तासु प्रवचनोक्तक्रियासु रामयन्ति क्रीडयन्तीत्**यात्मारामाः**,

यद्वा आराममिव भव्यजीवानां क्रीडास्थानमिवात्मा येषां हर्षहेतुत्वात्ते तथा, अथवाऽऽचारं पञ्चप्रकारममन्ति गच्छन्त्याश्रयन्तीत्याचारामाः मन्यन्ते बुध्यन्ते जगतः कालत्रयावस्थामिति **मुनयः** साधवस्ते **शरणं** भवन्तु ।।३६।।

**गुण०** खण्डितानि त्रोटितानि स्नेहरूपाणि दामानि रज्जवो यैस्ते, आर्द्रकुमारेणेवात्मनो ध्यातॄणां च **खण्डितस्नेहदामान**श्छिन्नस्नेहनिगडा इत्यर्थः । **न** विद्यन्ते **कामो** विषयाभिलाषो **धामानि** च गृहाणि येषां ते तथा । अथवा न विद्यन्ते कामधामानि स्मरमन्दिराणि विषयासक्तिहेतूनि येषां ते तथा । **निष्कामो** निर्विषयो **मोक्षसुखे कामो**ऽभिलाषो येषां ते तथा मोक्षाभिलाषिण इत्यर्थः । तथा इङ्गिताकारसम्पन्नत्वात् सत्पुरुषाणामाचार्योपाध्यायादीनां वन्दारूणां च दमदन्तेनेव युधिष्ठिरादीनां मनांस्यानन्दयन्त्यभिरामयन्ति **सत्पुरुषमनोऽभिरामाः**। तथा त्यक्तान्यकृत्यत्वादात्मानं तासु तासु प्रवचनोक्तक्रियासु आ सामस्त्येन रामयन्ति क्रीडयन्त्यात्मानमिति **आत्मारामाः,** यदिवा विशिष्टसंयमस्थाननियोजनेन आत्मानं क्रीडास्थानं पुरनिवासिलोकस्योद्यानयात्रास्थानमिव येषां ते तथा । आचारं वा पञ्चप्रकारममन्ति गच्छन्ति आश्रयन्तीत्याचारामा **मुनयः शरणं** भवन्तु ।।३६।।

**मिल्हियविसय-कसाया उज्झियघर-घरणिसंगसुहसाया ।**
**अकलियहरिसविसाया साहू सरणं विहुयसोया।३७।।**

**सोम०** **'मिल्हिअ'**त्ति मिल्हिता अपास्ता विषयाः शब्दाद्याः कषायाश्च क्रोधाद्याश्च यैस्ते तथा, विषयकषायरहिता इत्यर्थः । तथा **गृह**मगारं **गृहिणी** कलत्रं तयोः **सङ्गः** सम्बन्धस्तस्माद्यः **सुखास्वादः** सौख्यानुभव **उज्झितः** परिहृतो यैस्ते तथा निष्परिग्रहा निस्सङ्गाश्चेत्यर्थः । तथा न कलितौ नाश्रितौ हर्षविषादौ प्रमोदवैमनस्ये यैस्ते तथा, समभावव्यवस्थिता इत्यर्थः । तथा गतः प्रमादो येभ्यस्ते तथाऽप्रमत्ता इत्यर्थः। **'विहुअसोआ'** इति पाठे तु विधूतानि श्रोतांसि आश्रवद्वारलक्षणानि यैः । यद्वा विधुतः क्षिप्तः शोकः चित्तखेदो यैस्ते तथा, विधूताऽसंयमस्थाना **गतशोका** वेत्यर्थः। ते **साधवः शरणं** भवन्तु ।।३७।।

**गुण०** **मिल्लित्ता** अपास्ता **विषयाः** शब्दाद्याः **कषायाश्च** क्रोधाद्याः यैस्ते तथा विषयकषायरहिता इत्यर्थः। **गृहगृहिण्योः सङ्गः** सम्बन्धस्तस्माद्यः **सुखास्वादः** सुखलेश्याविशेष

उज्झितः परिहृतो यैस्ते **उज्झितगृहगृहिणीसङ्गसुखास्वादा** निष्परिग्रहा निर्जिगीष-वश्चेत्यर्थः । **न कलितौ** न गणितौ नाश्रितौ **हर्षविषादौ** प्रमोदवैमनस्ये यैस्ते तथा समभावव्यवस्थितत्वात् । **'विहूअसोआ'** इति पाठान्तरम्- **विधूतानि श्रोतांसि** आश्रवद्वाराणि यैर्यदिवा विधूतः क्षिप्तः शोकश्चित्तखेदो यैस्ते तथा विधूतासंयमस्थाना **गतशोका** वेत्यर्थः । ते **साधवः शरणं** स्युः ।।३७।।

**हिंसाइदोससुन्ना कयकारुन्ना सयंभुरूप्पन्ना ।**
**अजराऽमरपहखुन्ना साहू सरणं सुकयपुन्ना ।।३८।।**

**सोम०** हिंसा आदिर्येषां ते हिंसादयः, ते च ते दोषाश्च, आदिशब्दादलीकभाषणपरस्वापहार-स्त्रीसेवापरिग्रहादीनां ग्रहः । **हिंसादिदोषैः शून्याः** तैर्विरहिता इत्यर्थः। तथा **कृतं** विहितं **कारुण्यं** दुःखप्रहाणेच्छा सर्वजीवेषु यैस्ते तथा सर्वजीवेषु कृपार्द्रचेतस इत्यर्थः । तथा जीवाजीवादिपदार्थानां जिनोक्तानां यथावस्थिततत्त्वेन रोचनं मननं श्रद्धानं रुक् सम्यक्त्वमित्यर्थः, प्रज्ञानं प्रज्ञा बुद्धिः सम्यग्ज्ञानमित्यर्थः, स्वयं भवतीति स्वयम्भूः, स्वयम्भूवौ रुक्प्रज्ञे सम्यक्त्वज्ञाने येषां ते **स्वयम्भूरुक्प्रज्ञाः।** यदि वा स्वयम्भुरूचा स्वयम्भूतसम्यक्त्वेन क्षायिकादिना पूर्णाः, दूरीकृतमिथ्यात्वा इत्यर्थः। **'पुन्ना'** इति पाठे इयं व्याख्या । यद्वा स्वयम्भूशब्देन स्वयम्भूरमणः समुद्र उच्यते तत्तुल्ये विस्तीर्णे इत्यर्थः, रुक्प्रज्ञे येषां ते तथा । अथवा **'स्वयंभुरूप्पन्ना'** इति पाठे स्वयम्भरा आत्मनिर्वाहकाः कस्याप्यनाश्रितत्वेनोत्पन्ना व्यवस्थिताः स्वयम्भरोत्पन्नाः । तथा न विद्येते जरामरणे यत्र **तदजरामरं** निर्वाणं तस्य **पथो** मार्गस्तदुपदर्शक-त्वात्प्रवचनशास्त्राणीत्यर्थः, तत्र **क्षुण्णाः** निपुणाः, सम्यक् तस्य वेदिन इत्यर्थः । क्षुण्णः पुनः पुनः परिशीलनेनासेवितोऽजरामरपथो मोक्षमार्गो ज्ञानदर्शनचारित्रलक्षणो यैस्ते तथा, प्राकृतत्वात् क्षुण्णशब्दस्य परनिपातः। **'अजरामरबहुखुन्ना'** इति पाठे तु अजरामरे निर्वाणे वर्णयितव्ये बहु प्रभूतं यथा भवत्येवं क्षुण्णाः सम्यग्मोक्षस्वरूपप्ररूपका इत्यर्थः । ते **साधवः शरणं** भवन्तु। पुनः किम्भूताः ? सुष्ठु अतिशयेन कृतं पुण्यं चारित्रप्राप्तिलक्षणमेष्यद्भवयोग्यं स्वर्गादिलाभलक्षणं वा यैस्ते **सुकृतपुण्याः,** सुकृतैः तपःप्रभृतिभिर्वा पूर्णाः भृताः सञ्चितप्रभूततपस इत्यर्थः ।।३८।।

**गुण० हिंसादिदोषैः शून्यास्**तैर्विरहिता इत्यर्थः। कृतं विहितं कारुण्यं दुःखप्रहाणेच्छा

दययार्द्रभावः सर्वसत्त्वेषु यैस्ते **कृतकारुण्याः** कृपाकवचितचेतस इत्यर्थः । तथा जीवाजीवादिपदार्थानां शासने यथाप्रणीतत्वेन रोचनं मननं श्रद्दधानं रुक् सम्यक्त्वम्, प्रज्ञानं प्रज्ञा बुद्धिः स्वयं भवतीति स्वयम्भूः, स्वयम्भुवौ रुक्प्रज्ञे सम्यक्त्वबुद्धी येषां ते **स्वयम्भूरुक्प्रज्ञाः,** यदिवा स्वयम्भूरुचा सम्यक्त्वेन पूर्णा स्वयम्भूरुक्पूर्णा दूरीकृतमिथ्यात्वा इत्यर्थः । स्वयम्भूसमुद्रतुल्ये वा विस्तीर्णे रुक्प्रज्ञे येषां ते । तथा न विद्येते जरामरौ वृद्धत्वनिधने यत्र **तदजरामरं** निर्वाणं तत्रोपदेष्टव्ये व्यावर्णयितव्ये च **बहु** प्रभूतं यथा भवत्येवं **क्षुण्णा** निपुणा मोक्षस्वरूपज्ञातार इत्यर्थः । यदा तु **'पह'** इति पाठस्तदा अजरामरपथदेशकत्वात् प्रवचनशास्त्राणि तत्र निपुणाः सम्यक् तद्वेदिन इत्यर्थः । ते **साधवः शरणं** भवन्तु । सुष्ठु अतिशयेन कृतं पुण्यं चारित्रप्राप्तिलक्षणं यैस्ते **सुकृतपुण्याः**। सुकृतैस्तपःप्रभृतिभिर्वा पूर्णा भृताः सञ्चितप्रभूततपस इत्यर्थः ।।३८।।

**कामविड़ंबणचुक्का कलिमलमुक्का विविक्कचोरिक्का ।**
**पावरयसुरयरिक्का साहूगुणरयणचच्चिक्का ।।३९।।**

**सोम०** काम्यते अभिलष्यते विषयार्थिभिरिति **काम**स्तस्य कामस्य स्मरजनितविकारस्य या **विडम्बना** नाना विक्रियाभिः परिचेष्टनं तस्याः **'चुक्क'**त्ति प्राकृतत्वाच्च्युतास्तया रहिता ज्ञातपरमार्थत्वात् तां त्यक्तवन्त इत्यर्थः । तथा **कलिमलं** पापं तेन **मुक्ताः** पवित्रचारित्रनीरेण तं प्रक्षालितवन्त इत्यर्थः। तथा **'विविक्क'**त्ति विविक्तमदत्तादान-नियमेनाऽऽत्मनः पृथक् कृतं **चौरिक्यं** चौर्यं यैस्ते तथा स्वामिजीवतीर्थकृद्गुर्व-नुज्ञातभक्तपानादिग्रहणेन सर्वथाऽपि तं परिहृतवन्त इत्यर्थः । तथा पातयति दुर्गतौ जीवानिति पापं तदेव रजः पापरजः तत्कारणत्वात् पापरजश्च तत्सुरतं मैथुनं च **पापरजःसुरतं** तेन **रिक्ताः** तत्त्यागिनो, नवगुप्तिसनाथब्रह्मव्रतधरणाद्, एवंविधाः **साधवः** शरणम्, किम्भूताः साधवः ? **गुणा** व्रतषट्कादयस्त एव **रत्नानि** तैः **चर्चिकत्ति** दीप्तिमन्तस्तैर्मण्डिता इत्यर्थः। यद्वा साधूनां गुणाः साधुगुणा इत्येवं कार्यम्, प्राकृतत्वाद्दीर्घत्वम्, साधव इति विशेष्यं तु प्रस्तावादेव लभ्यते ।।३९।।

**गुण०** काम्यतेऽभिलष्यते विषयार्थिभिरिति कामस्तस्य स्मरजनितविकारस्य या विडम्बना कदर्थना मदोन्मत्तस्येव नानाविक्रियाभिः परिवेष्टनं तस्याः **कामविडम्बनायाः**

**चुक्कति** प्राकृतत्वाद् च्युतास्तया विरहिता विज्ञातपरमार्थत्वात्तां त्यक्तवन्त इत्यर्थः। **कलिमलः** पापस्तेन **मुक्तास्**तद्विवर्जिताः पवित्रचारित्रनीरपूरेण तं प्रक्षालितवन्त इत्यर्थः। **विविक्तं** अदत्तादानपरिहारेणात्मनः पृथक्कृतं **चौरिक्यं** चौर्यं यैस्ते, तथा स्वामिजीवजिनगुर्वाद्यनुज्ञातभक्तपानादिग्रहणेन सर्वथाऽपि तत्परिहृतवन्त इत्यर्थः । पातयति जीवानिति पापम्, तस्य रजः कश्मलः **पापरजश्च** तत्**सुरतं** मैथुनं तेन **रिक्तास्**तत्त्यागिनो नवगुप्तिसनाथब्रह्मव्रतचरणात् । यत एवंभूता अत एव साधूनां गुणाः **साधुगुणा** व्रतषट्कादयस्त एव **रत्नानि** तै**श्चिच्चिक्कत्ति** दीप्तिमन्तः, तैर्मण्डिता इत्यर्थः। ते साधवः शरणमिति ।।३९।।

**सोम०** नन्वत्र साधुशरणाधिकारे ज्येष्ठपदवर्तित्वेनाचार्यादयः कथं गृह्यन्ते ? इति संशयापनोदायाह-

**साहुत्तसुट्ठिया जं आयरियाई तओ य ते साहू ।**
**साहुभणिएण गहिया ते तम्हा साहुणो सरणं ।।४०।।**

**सोम० साधुत्वे** साधुस्वरूपे समभावपरसाहाय्यदानमुक्तिसाधकयोगसाधनादिलक्षणे **सुष्ठु** अतिशयेन **स्थितास्**तत्सेविन इत्यर्थः । यद्वा साधुत्वेन सुस्थिताः समाहिताः **साधुत्वसुस्थिताः यद्** यस्मात्कारणा**दाचार्यादयः** पञ्चापि **ततश्च ते** पञ्चापि **साधव** उच्यन्ते, तत्कार्यकरणात् । **तस्मात्साधुभणितेन** साधुसत्कोच्चारेण **गृहीतास्ते** सर्वेऽप्यतीतानागतवर्तमानकालभाविनोऽत्राधिकारे मम **शरणं** भवेयुरिति ।।४०।।

**गुण० साधुत्वे** साधुस्वरूपे समभावपरसाहाय्यपरोपकारलक्षणे **सुष्ठु** अतिशयेन **स्थिता** अध्यवसिता व्यवस्थिता **यद्** यस्माद्धेतोरा**चार्यादयः** आचार्योपाध्यायप्रवर्तकस्थविरगणावच्छेदिन**स्ततस्ते** पञ्चापि **साधवस्**तत्कार्यकरणात् **साधुभणितेन** साधुसत्कारेण **गृहीता** ग्रहणमागतास्**तस्मात्ते** सर्वेऽप्यत्राधिकारोक्तगुणगरिष्ठा अतीतानागतवर्तमानकालभाविनोऽतीतानागतयोरनन्ता वर्तमानोत्कृष्टकाले नवकोटीसहस्रम्, जघन्ये तु कोटीसहस्रद्वयम्, ते सर्वे **साधवो** मम **शरणं** भवेयुः ।।४०।।

**सोम०** उक्तं तृतीयं शरणमथ चतुर्थं शरणमाह-

**गुण०** चतुर्थशरणप्रतिपादनायाह-

**पडिवन्नसाहुसरणो सरणं काउं पुणो वि जिणधम्मं ।**
**पहरिसरोमंचपवंचकंचुयंचियतणू भणइ ।।४१।।**

**सोम०** साधुश्रावकाद्यन्यतमो जीवः **प्रतिपन्नसाधुशरणः** सन् **पुनरपि जिनधर्मं शरणं कर्तुं** प्रतिपत्तुमिच्छन्नित्यध्याहार्यम्, इदं वक्ष्यमाणं **भणति** । किंविशिष्टोऽसौ ? प्रकृष्टो हर्षः प्रहर्षः वदनविकाशादिचिह्नगम्यो मानसः प्रीतिविशेषस्तद्वशेन यो रोमाञ्चप्रपञ्चः स एव कञ्चुकस्तेनाञ्चिता विभूषिता तनुः शरीरं यस्य स **प्रहर्षरोमाञ्चप्रपञ्चकञ्चुकाञ्चिततनुः,** प्रमोदपूरिताङ्गः सन्नित्यर्थः ।।४१।।

**गुण०** स साधुसाध्वीश्राद्धश्राविकान्यतमो जीवः **प्रतिपन्नसाधुशरणो**ऽङ्गीकृतमुनिशरणः **पुनर**थशब्दार्थो भिन्नक्रमश्च, ततश्च पुनरथानन्तरं **जिनधर्मं शरणं कर्तुं** प्रतिपत्तु-माश्रयितुमिच्छन्नित्यध्याहार्यम् । किंविशिष्टोऽसावित्याह-**'पहरिस'**त्ति तत्र वदन-विकाशादिचिह्नगम्यो मानसः प्रीतिविशेषो हर्षः प्रहर्षः प्रकृष्टो हर्षः प्रहर्षस्तद्वशेन रोमाञ्चप्रपञ्चो रोमोद्धर्ष उत्कर्षः स एव कञ्चुकश्चोलकस्तेनाञ्चिता विभूषिता तनूः शरीरं यस्य स **प्रहर्षरोमाञ्चप्रपञ्चकञ्चुकाञ्चिततनुः** प्रमोदपूरिताङ्गः सनिदं वक्ष्यमाणं **भणति** ।।४१।।

**सोम०** स यद् भणति तदाह-

**गुण०** यच्च ब्रूते तदाह-

**पवरसुकएहिं पत्तं पत्तेहि वि नवरि केहि वि न पत्तं ।**
**तं केवलिपन्नत्तं धम्मं सरणं पवन्नो हं ।।४२।।**

**सोम० प्रवरसुकृतै**र्विशिष्टपुण्यैः **प्राप्तं** लब्धं सम्यक्त्वदेशविरतिरूपं धर्ममिति सम्बन्धः, अर्धपुद्गलपरावर्त्ताभ्यन्तरीभूतभवैरेव भव्यजीवैरासन्नसिद्धिकैः प्राप्यमानत्वात्, तथा **पात्रै**रपि भाग्यवद्भिरपि ब्रह्मदत्तचक्र्यादिभिरिव **कैश्चित् नवरीति** पुनरर्थे **न प्राप्तं** नासादितम्, पात्रत्वं ब्रह्मदत्तस्य चक्रित्वलाभात्, देवेन्द्रचक्रवर्त्यादिपदानि हि भव्यानामेव भवन्तीति । **तमे**वम्भूतं **केवलिभिः** केवलज्ञानोपलब्धसमस्ततत्त्वैः **प्रज्ञप्तं** देशितं **धर्मं** श्रुतधर्मचारित्रधर्मरूपं **शरणं प्रपन्नोऽहमिति** ।।४२।।

**गुण० प्रवरसुकृतैः** विशिष्टपुण्यैः **प्राप्तं** लब्धं सम्यक्त्वदेशविरतिसर्वविरतिरूपं जिनप्रणीतं धर्ममिति सम्बन्धः, यतो जीवस्यानादिभवाऽलभ्यस्तैर्मिथ्यात्वादिभिर्हेतुभिः सदैवावृतत्वेन तत्प्राप्तेरतिशयेन दुर्लभत्वात्, यदाह-

**अंतिम-कोडाकोडीए, सव्वकम्माणमाउवज्जाणं ।।**
**पलियासंखिज्जइमे, भागे खीणे हवइ गंठी ।।१।।** [वि.आ.भा. ११९४]
**अपुव्वेणत्ति पुंजं, मिच्छत्तं कुणइ कुद्दवोवमया ।**
**अनियट्टीकरणेए उ, सो सम्मं दंसणं लहइ ।।२।।** [वि.आ.भा. १२१८]
**सम्मत्तम्मिय लद्धे, पलियपुहुत्तेण सावउ हुज्जा ।।**
**चरणोवसमइखयाणं, सागरसंखंतरा हुंति ।।३।।** [वि.आ.भा. १२२२]

यावत्यां कर्मस्थितौ सम्यक्त्वं लब्धं तन्मध्यात्पल्योपमपृथक्त्वलक्षणे स्थितिखण्डे क्षपिते देशविरतो भवेत्, ततोऽपि सङ्ख्यातेषु सागरेषु क्षपितेषु चारित्रमित्यादि, अतो नाल्पपुण्यैरवाप्यत इत्यर्थः, पुण्यवद्भिः प्राप्यत इत्युक्तम् । तत्र किं सर्वैरपि तैर्लभ्यत इत्याह **'पत्तेहिं'**त्ति पात्रैरपि भाग्यवद्भिरपि **कैश्चिद्** ब्रह्मदत्तचक्र्यादिभिरिव **नवरि** पुनर्न **प्राप्तं** नासादितम्, पात्रत्वं च ब्रह्मदत्तस्य चक्रित्वलाभात्, देवेन्द्रचक्रवर्त्यादिकर्मणां बन्धो भव्यानामेवोक्त इति । तमेवम्भूतं **केवलिभिः प्रज्ञप्तं** देशितं **धर्मं** श्रुतधर्मचारित्रधर्मरूपं **शरणं प्रपन्नोऽह**मिति ।।४२।।

**सोम०** अथ धर्मस्यैव माहात्म्यमुपदर्शयन्नाह-

**गुण०** अथ धर्मस्यैव माहात्म्यमुपदर्शयन् तमेव शरणं प्रतिपित्सुराह-

**पत्तेण अपत्तेण य पत्ताणि य जेण नर-सुरसुहाइं ।**
**मोक्खसुहं पि य पत्तेण नवरि धम्मो स मे सरणं ।।४३।।**

**सोम० प्राप्तेनाप्राप्तेनापि** लब्धेनालब्धेनापि, केन ? **येन** जैनधर्मेण **नरसुरसुखानि प्राप्तानि,** तत्र प्राप्तेन यथा लब्धसम्यक्त्वेन धनसार्थवाहेन **नरसुखं** युगलिकसुखं प्राप्तम्, अप्राप्तेनापि च यथा तेनैव तस्मिन्नेव भवे सम्यक्त्वलाभात् पूर्वम्, प्राप्तेन धर्मेण सुरसुखं बहुभिरपि श्रीवीरजीवनयसारादिभिः । अप्राप्तेन धर्मेण **सुरसुखं "तावस जा जोइसिआ चरगपरिव्वाय बंभलोगो जा"** इत्याद्युक्तेर्बहुभिः कपिलादिभिरिव लब्धं, यद्वा अनेकैः भव्यैः प्राप्तेन धर्मेण नरसुरसुखानि लब्धानि, अभव्यैश्च अप्राप्तेनापि तेन,

तेषामप्यागमे केवलक्रियादिबलेनाऽऽनवमग्रैवेयकं गमनश्रवणात् । **मोक्षसुखं** पुनर्येन धर्मेण प्राप्तेनैव प्राप्यते, नान्यथा, मरुदेवीप्रभृतयोऽपि भावतश्चारित्रपरिणामं प्राप्यैव मोक्षं जग्मुरिति, **नवरि** पुनः **स धर्मो मे मम शरणं** भवतु । अथ व्याख्यान्तरं-**पात्रेण** ज्ञातिकुलसौभाग्यादिगुणयुक्तेन तथा **अपात्रेणापि** गुणवियुक्तेन दारिद्र्याद्युपहतेनापि प्राप्तानि लब्धानि **येन** कारणेन **नरसुरसुखानि** मनुजदेवसमृद्धयः, तत्र पात्रेण ऋजुत्वादिगुणवता वरुणसारथिमित्रेणेव नरसुखं विदेहेषु सुकुलोत्पत्त्यादिकं यथा प्राप्तमपात्रेण दौःस्थ्याक्रान्तेन कौशाम्ब्यामार्य-सुहस्तिप्रव्राजितसम्प्रतिराजजीवद्रमकेणेव, पात्रेण सुरसुखं सर्वार्थसिद्धिसम्भवं शालिभद्रेणेवापात्रेण सुरसुखं वसुदेवपूर्वभवे नन्दिषेणेनेव प्राप्तम्, च एवकारार्थो भिन्नक्रमश्च पात्रेणेत्यत्र योज्यते, ततोऽयमर्थः । **नवरं** केवलं **मोक्षसुखं** पुनः **पात्रेणैव** चारित्रधर्माधारभूततथाभव्यत्वगुणलक्षणेनैव प्राप्यते, नान्यथेति, यस्य धर्मस्य प्राप्त्यैवेति शेषः, **स धर्मो** मम **शरणं** भवतु ।।४३।।

**गुण०** **पात्रेण** ज्ञातिकुलरूपसौभाग्यादिगुणयुक्तेन, न केवलं पात्रेण, **अपात्रेणापि** गुणवियुक्तेन दारिद्र्याद्युपहतेन **प्राप्तानि** लब्धानि **येन** कारणेन **नरसुरसुखानि** मनुजदेवसमृद्धयः, तत्र पात्रेण ऋजुत्वादिगुणवता वरुणसारथिमित्रेणेव नरसुखं विदेहेषु सुकुलोत्पत्त्यादिकं यथा प्राप्तम्, अपात्रेणापि दौःस्थ्याक्रान्तेन कौशाम्ब्यामार्यसुहस्तिसूरिप्रव्राजितसम्प्रति-राजजीवद्रमकेणेव, पात्रेण सुरसुखं सर्वार्थसिद्धिसम्भवं शालिभद्रेणेव च, अपात्रेण सुरसुखं वसुदेवपूर्वभवे नन्दिषेणेनेव प्राप । अपेः पुनरर्थत्वान्**मोक्षसुखं पुनः, चस्य** भिन्नक्रमत्वात् **पात्रेणैव,** चारित्रधर्माधारभूतभव्यत्वगुणलक्षणेनेत्यर्थः, प्राप्यते । अथवा प्राप्तेनाप्राप्तेनापि लब्धेनालब्धेनापि येन जैनधर्मेण नरसुरसुखानि प्राप्तानि, तत्र प्राप्तेन यथा लब्धसम्यक्त्वलाभेन धनसार्थवाहेन नरसुखं मिथुनकसुखमप्राप्तेनापि तेनैव तस्मिन्नेव भवे सम्यक्त्वलाभात्पूर्वं प्राप्तेन नरसुखं वीरजीवबलाधिपेनेव, अप्राप्तेन च सुरसुखं **"चरगपरिव्वाय बंभलोगो जा"** इत्युक्तेर्बहुभिरिव **मोक्षसुखं पुनः प्राप्तेनैव** प्राप्यते येन धर्मेण यच्च मरुदेवीप्रभृतयोऽलब्धेनापि तेन तदवाप्नुवन्, तत्तेऽपि भावतः प्राप्तचारित्रपरिणामा इति, **नवरि** पुनः **स धर्मो मे** मम **शरणं** भवतु ।।४३।।

**निद्दलियकलुसकम्मो कयसुहजम्मो खलीकयकुहम्मो ।**
**पमुहपरिणामरम्मो सरणं मह होउ जिणधम्मो ।।४४।।**

**सोम० निर्दलितानि** विदारितानि तत्कर्तृजनेभ्यः **कलुषाणि** मलिनानि **कर्माणि** येन धर्मेण स तथा, निर्धूतसर्वपाप इत्यर्थः। यत एवंविधोऽत एव कृतं शुभं जन्म कर्म वा सेवकजनेभ्यो गणधरतीर्थकरत्वादिप्राप्तिलक्षणं येन स **कृतशुभजन्मा कृतशुभकर्मा वा**। यत एवंविधोऽत एव **खलीकृतः** शत्रुवन्निर्घाटितो निस्सारितोऽधर्मो **कुधम्मो** वा सम्यक्त्ववासितान्तःकरणेभ्यो येन स तथा । तथाऽयं **जिनधर्मः प्रमुखे** आदाविहलोकेऽपि रम्यो धम्मिलादीनामिव **परिणामे** परिपाकप्राप्तौ भवान्तरेऽपि दामन्नकादीनामिव **रम्यो** मनोज्ञः, मिथ्यादृष्टिधर्मस्तु नैवंविधः, तस्यारम्भेऽप्यादावपि पञ्चाग्नितपःप्रभृत्यादेर्महाकष्टहेतुत्वेन परिणामे परलोके च मिथ्यात्वरूपत्वा-दुर्गतिमूलत्वेन चासुन्दरत्वात् । विषयसुखस्य त्वादौ सुन्दरत्वेऽपि परिणामे शनैः शनैरिहलोके परलोकेपि च कटुविपाकत्वाच्च, जिनधर्मस्त्वादौ परिणामेऽपि च रम्य एव, स एवंविधो धर्मो मम **शरणं भवतु** ।।४४।।

**गुण० निर्दलितानि** विदारितानि तत्कर्तृजनेभ्यः **कलुषाणि** मलिनानि **कर्माणि** येन धर्मेण स तथा निर्धौतसर्वपाप इत्यर्थः। यत एव निर्दलिताशुभकर्मा अत एव **कृतं शुभं कर्म** जन्मा वा सेवकजनेभ्यो गणधरतीर्थकरत्वादिपदवीप्राप्तिलक्षणं येन स कृतशुभकर्मा जन्म वा । अत एव **खलीकृतः** शत्रुवन्निर्घाटितो निःसारितः **कुधर्मो** मिथ्याधर्मः सम्यक्त्वतत्त्ववासितेभ्यो येन स तथा । मिथ्यादृष्टिधर्मस्यारम्भेऽप्यादावपि पञ्चाग्नितपः-प्रभृत्यादेर्महाकष्टहेतुत्वेनासुन्दरत्वात् परिणामे च मिथ्यात्वरूपत्वेन दुर्गतिमूलत्वाद्, अयं तु **जिनधर्मः प्रमुखे** आदाविहलोकेऽपि धम्मिल्लादीनामिव **परिणामे** परिपाकप्राप्तौ भवान्तरे दामन्नकादीनामिव **रम्यो** मनोज्ञः। स एवंविधो धर्मो **मम शरणं भवतु** ।।४४।।

**कालत्तए वि न मयं जम्मण-जर-मरण-वाहिसयसमयं ।**
**अमयं व बहुमयं जिणमयं च सरणं पवन्नो हं ।।४५।।**

**सोम० कालत्रयेऽप्य**तीतानागतवर्तमानरूपे **न मृतो** न विनष्टस्तं न मृतं भरतैरावतेषु व्यवच्छेदसद्भावेऽपि महाविदेहेषु कालत्रयेऽपि धर्मस्य नैरन्तर्येण सद्भावात् । तथा जन्म च जरा च मरणं च व्याधयश्च जन्मजरामरणव्याधयस्तेषां शतानि **शमयतीति जन्मजरामरणव्याधिशतशमकः**, सिद्धिपदप्रदानेन तन्निवारक इत्यर्थः, तम् । **'सुमय'** मिति पाठे तु जन्मजरामरणव्याधिशतानि सुष्ठु अतिशयेन मृतानि विनष्टानि स्थितानि

यस्मात्स तथा । तथा सद्वर्णगन्धरसोपेतं वर्णबलसौभाग्यपुष्टिजननं सर्वरोगनाशनं वस्तु **अमृतमु**च्यते तदिव सकललोकस्यानन्दतुष्टिपुष्टिजनकत्वाद् । **बहुमतः** सर्वस्याप्यतिशयेनाभीष्ट इत्यर्थः, तं प्रक्रमायातं जिनधर्मम् । न केवलं जिनधर्मम्, **जिनमतं च** जिनप्रवचनं द्वादशाङ्गरूपं पूर्वोक्तगुणसुन्दरं **शरणत्वेनाहं प्रपन्न** आश्रित इत्यर्थः ।।४५।।

**गुण०** **कालत्रयेऽ**तीतानागतवर्तमानरूपे **न मृतो** न विनष्टस्तं न मृतं विदेहेषु नैरन्तर्येण तत्सद्भावात् कालत्रये**ऽपि** धर्मो विद्यत एवेत्यर्थः । जन्म च जरा च मरणं च व्याधयश्च **जन्मजरामरणव्याधयस्**तेषां जन्मजरामरणव्याधीनां **शतानि** तानि **सुष्ठु** अतिशयेन **मृतानि** स्थितानि विनष्टानि यस्मात् स तथा तमथवा **जन्मजरामरणव्याधिशतानां शमकः** सिद्धिपदप्रदानेन तन्निवारकस्तम् '**अमयं व**'त्ति चारुवर्णगन्धरसोपेतं वर्णबल-सौभाग्यपुष्टिजननं सर्वरोगशमनमनेकगुणसम्पन्नममृतं तदिव सकललोकस्यानन्दतुष्टि-पुष्टिजनकत्वात्, बहुमतः सर्वस्याप्यतिशयेनाभीष्ट इत्यर्थः । तं किं **बहुमतं** इति चेत् प्रक्रमायातं जिनधर्ममेव, न केवलं जिनधर्मं **जिनमतं** च प्रवचनं च द्वादशाङ्गमित्यर्थः तदप्येवंगुणमेव, शेषं प्राग्वत् ।।४५।।

**पसमियकामपमोहं दिट्ठाऽदिट्ठेसु न कलियविरोहं ।**
**सिवसुहफलयममोहं धम्मं सरणं पवन्नो हं ।।४६।।**

**सोम०** **प्रकर्षेण** कटुविपाकतादर्शनेनोपशमं नीतः । **कामस्य प्रकृष्टो मोह** उन्मादो मोहो वा येन स तथा, निवारितकामोद्रेक इत्यर्थः, जिनधर्मभावितमतेः कामनिवृत्तेः सद्भावात्। तथा दृष्टादृष्टविषया ये बादरैकेन्द्रियद्वीन्द्रियादयो जीवाः पुद्गलस्कन्धादयोऽजीवाश्च, तथाऽदृष्टाः सर्वलोकवर्त्तिसूक्ष्मैकेन्द्रियादयो जीवा धर्माधर्मास्तिकायादयोऽजीवाश्च । स्वर्गनरकादयो वा येऽतिशयज्ञानिगोचरास्तेषु **दृष्टादृष्टेषु** पदार्थेषु **न कलितो** न प्राप्तो **विरोधो** विपरीतप्ररूपणारूपो येन स तथा तम्, केवलिप्रज्ञप्तत्वात् यथावस्थित-स्वरूपावेदकमित्यर्थः। तथा शिवसुखमेव फलं शिवसुखफलं तद्ददातीति **शिवसुख-फलद**स्तम्, अत एव न मोघो**ऽमोघो**ऽवन्ध्यः सफल इत्यर्थः । तमेवंप्रकारं **धर्मं शरणं प्रपन्नोऽहमि**ति ।।४६।।

**गुण०** **प्रशमितः "सल्लं"** इत्यादि तद्विपाकवर्णनेनोपशमं नीतः **कामस्य प्रकृष्टो मोह** उन्मादो येन स तथा निवारितकामोद्रेक इत्यर्थस्तम् । दृष्टाश्च अदृष्टाश्च दृष्टादृष्टा जीवाः, तत्र दृष्टा बादरैकेन्द्रियद्वीन्द्रियादयः दृष्टिविषयत्वात्तेषामदृष्टाः सूक्ष्मपनकसूक्ष्मैकेन्द्रियाः सर्वलोकवर्तिनोऽतिशयज्ञानिगोचरास्तेषु **दृष्टादृष्टेषु** जीवेषु **न कलितो** न कृतो **विरोधो** विपरीतप्ररूपणा येन स तथा तम्, केवलिप्रज्ञप्तत्वाद् यथावस्थितस्वरूपावेदकमित्यर्थः । शिवसुखमेव फलं तद्ददातीति **शिवसुखफलदस्तं** शिवसुखफलदम् । अत एव न मोघोऽ**मोघो**ऽवन्ध्यः सार्थक इत्यर्थस्तमेवंप्रकारं **धर्मं शरणमहं प्रपन्नः** ।।४६।।

**नरयगइगमणरोहं गुणसंदोहं पवाइनिक्खोहं ।**
**निहणियवम्महजोहं धम्मं सरणं पवन्नो हं ।।४७।।**

**सोम०** पापकारिणो नरान् कायन्त्याह्वयन्तीति नरका रत्नप्रभादिषु सीमन्तकाद्यास्त एव गम्यन्त इति गतिस्तत्र यद्गमनं तद् रुणद्धि निवारयतीति **नरकगतिगमनरोधस्तम्,** तथा **गुणानां** क्षान्त्यादीनां **सन्दोहः** समुदायो यत्र स तथा तम्, तथा प्रकृष्टा वादिनः प्रवादिनः, निर्शब्दो निषेधार्थः, तैः प्रवादिभिः निर् न क्षोभ्यते इति **प्रवादिनिक्षोभ्यस्तम्,** अथवा प्रवादिभ्यो निर्गतः क्षोभः कम्पनं यस्य स तथा, यद्वा प्रवादिनां निर् नितरां क्षोभो यस्मात्स तथा तम्, सुयुक्तियुक्तत्वेन श्रीसर्वज्ञोक्तत्वेन च वादिभिः क्षोभयितुमशक्य इत्यर्थः। **'निहणिय'**त्ति निहतो नाशं नीतो मन्मथयोधः कामसुभटो येन स तथा, नवगुप्तिरचनारुचिरब्रह्मकवचाञ्चितत्वात् धर्मस्य, तं **धर्मं शरणं प्रपन्नोऽहमि**ति ।।४७।।

**गुण०** **नरकगतिगमनरोधम्,** नरका रत्नप्रभाद्यास्तत्र गमनं तं रुणद्धि निवारयतीति । **गुणानां** क्षान्त्यादीनां च **सन्दोहः** समुदायो यत्र स तथा तम् । प्रकर्षवन्तो वादिनः प्रवादिनस्त्रिषष्ट्याधिकत्रिशतानां सङ्ख्योपेताः, निःशब्दस्य निषेधार्थत्वात् तैः प्रवादिभिर्न क्षोभ्यत इति प्रवादिनिक्षोभ्यस्तं **प्रवादिनिःक्षोभ्यम्** । नवगुप्तिरचनारुचिरकवचकवचितत्वेन **निर्जितः** प्रतिहतो नाशं नीतो **मन्मथयोधः** कामसुभटो येन स तथा तं **धर्मं शरणं प्रपद्येऽहम्** ।।४७।।

**सोम०** अथ निधानोपमया धर्मस्य नमस्कारमाह-

**गुण०** कृतधर्मशरणः पुनस्तस्यैव चारित्रश्रुतरूपस्य निध्युपमया नमस्कारमाह-

**भासुरसुवन्नसुंदररयणालंकारगारवमहग्घं ।**
**निहिमिव दोगच्चहरं धम्मं जिणदेसियं वंदे ।।४८।।**

**सोम०** देवादिभास्वरगतिहेतुत्वाद् **भास्वरः शोभनो वर्णः** श्लाघा गुणोत्कीर्त्तनरूपा यस्मात्स **सुवर्णः**, चारित्रवतामिन्द्रादिभिरपि श्लाघनीयत्वात्, तथा **सुन्दरा** मनोज्ञा या क्रियाकलापविषया इच्छामिच्छेत्यादिदशविधसामाचार्यादिरूपा या **रचना** विविधकल्पना सैव तया वाऽ**लङ्कारः** शोभाविशेषो यस्य स **सुन्दररचनालङ्कारः**, तथा **गौरवं** महत्त्वं तद्धेतुत्वाद्धर्मोऽपि गौरवं तथा महानर्घो माहात्म्यविशेषो यस्य स महार्घः, चारित्रवतामामर्षौषध्याद्यनेकमाहात्म्यविशेषसम्भवात्, ततः पञ्चानामपि विशेषणानां कर्मधारयः । अथवा शोभनो वर्णः श्लाघा तेन सुन्दरा या सामाचार्यादिरचना सैवालङ्कारो यस्येत्येकमेव कार्यम्, चारित्रपक्षेऽयं पूर्वोक्तोऽर्थः। श्रुतधर्मपक्षे तु भास्वरज्ञानिभिः केवलिभिरुक्तत्वाद् भास्वरः शोभना वर्णा अक्षराणि तेषां या सुन्दरा रचना पदपङ्क्त्या विरचना तस्या योऽलङ्कारो द्वात्रिंशत्सूत्रदोषपरिहारेणाष्टगुणधारणेन च शोभाविशेषस्तस्माद् यद्गौरवं गुरुत्वमनन्तार्थत्वादिरूपं तेन महानर्घ आधिक्यं पूजातिशयो वा यस्य स तथा, ततो विशेषणद्वयकर्मधारयः, अथवा भास्वरेति वर्णविशेषणं कार्यम्, यद्वा **भास्वरसुवर्णसुन्दररचनालङ्कारेण गौरवं** गुरुत्वं यस्य स तथा, **महार्घमिति** पृथक्कृत्वा समस्यते । निधिपक्षे पुनर्भास्वरं दीप्तिमत् सुवर्णं कनकं सुन्दराणि यानि कनकानि रत्नानि अलङ्कारा हाराद्याभरणविशेषास्तैर्गौरवं सम्पूर्णता तेन महार्घो बहुमूल्यः । **'दोगच्च'**ति चारित्रधर्मपक्षे दुष्टा गतिर्दुर्गतिः कुदेवत्वकुमानुषत्वतिर्यग्नरकलक्षणा तस्या दुर्गतेर्भावो दौर्गत्यम्, श्रुतधर्मपक्षे तु "गत्यर्था ज्ञानार्था धातवो"ऽतो गतिर्ज्ञानं दुष्टा गतिः दुर्गतिरज्ञानमित्यर्थः तद्धरतीति दौर्गत्यहरम्, निधानपक्षे तु दुर्गतस्य दरिद्रस्य भावो दौर्गत्यं दारिद्र्यं तद्धरतीति दौर्गत्यहरं दारिद्र्यापहारकृदित्यर्थः। एवंविधं निधानोपमितं **धर्मं श्रीजिनैः** श्रीसर्वज्ञैर्देशितमुपदिष्टं **जिनोपदिष्टं वन्दे** नमस्कुर्वेऽहमित्यर्थः ।।४८।।

**गुण०** भास्वरगतिहेतुत्वाच्चारित्रधर्मस्य **भास्वरः** शोभनो वर्णः श्लाघा **"देवा वि तं नमंसंतीत्यादि"** गुणोत्कीर्तनरूपो यस्य यस्मात्स **सुवर्णः**, तथा **सुन्दरा** मनोज्ञा इतिकर्तव्यक्रियाकलापैश्चित्रा इच्छामिच्छादिदशभेदरूपा या **रचना** परिकल्पना तस्या

यथावसरमलङ्करणादलङ्कारः सुन्दररचनालङ्कारः, गौरवहैतुत्वात् **गौरवम्,** महानर्घो माहात्म्यविशेषो यस्य स **महार्घः,** ततो द्वन्द्वः, श्रुतधर्मपक्षे तु **"सुयधम्मो सज्झाओ"** इति वचनात्, श्रुतं द्वादशाङ्गं तत्र भास्वरज्ञानिभिः केवलिभिरुक्तत्वात् भास्वरम्, शोभना वर्णा अक्षराणि यत्र तत्सुवर्णम्, ततः सुवर्णानामक्षराणां या सुन्दरा रचना पदपङ्क्तिविरचनम्, तस्या द्वात्रिंशत्सूत्रदोषपरिहारेणाष्टगुणालङ्करणेन चालङ्कारो विभूषणम्, सुवर्णसुन्दररचनालङ्कारस्तस्माच्च गौरवो गुरुत्वम्, तथा एकैकस्यापि सूत्रस्यानन्तार्थत्वात्, यदाह-**"सव्वनईण..."** ततो महानर्घ आधिक्यं पूजातिशयो वा यस्य । अतश्चोपमीयते **निधिमिव** महानिधानमिवेत्यर्थः, किंविशिष्टम् ? दुष्टा गतिर्दुर्गतिः कुदेवत्वकुमानुषत्वतिर्यग्नरकलक्षणा, तस्या दुर्गतेर्भावो **दौर्गत्यम्,** श्रुतधर्मपक्षे तु अज्ञानत्वम्, तद् **हरतीति,** तत्र निधीयन्ते पोष्यन्तेऽर्था येषु इति निधयः, भास्वरं दीप्तिमत्सुवर्णं कनकं सुन्दराणि रुचिराणि रत्नानि पद्मरागादीनि अलङ्कारा हाराद्याभरण-विशेषास्तैर्गौरवः सम्पूर्णता तेन च महार्घो बहुमूल्यः, अत एव दुर्गतस्य दरिद्रस्य भावो दौर्गत्यं दारिद्र्यं तद्धरतीति **दौर्गत्यहरः** दारिद्र्यापहार-कृदित्यर्थः, एवंविधो यो निधिस्तत्कल्पं **जिनोपदिष्टं धर्मं वन्दे** । द्व्यर्थेयं गाथा ।।४८।।

**सोम०** उक्तश्चतुःशरणरूपः प्रथमोऽधिकारः । अथ दुष्कृतगर्हारूपं द्वितीयमधिकारमाह-

**गुण०** उक्तं चतुर्थं शरणम्, तद्भणनेन चाभिहितोऽस्याध्ययनस्य प्रथमोऽर्थाधिकारः । द्वितीयार्थाधिकारमाह-

**चउसरणगमणसंचियसुचरियरोमंचअंचियसरीरो ।**
**कयदुक्कडगरिहाऽसुहकम्मक्खयकंखिरो भणइ ।।४९।।**

**सोम० चतुःशरणगमनेन** चतुःशरणाङ्गीकारेण **सञ्चितं** राशीकृतं **यत्सुचरितं** पुण्यं तेन योऽसौ **रोमाञ्चो** रोमोल्लासस्तेना**ञ्चितं** भूषितं **शरीरं** यस्य स तथा, चतुःशरणगमनार्जितसुकृतवशात्कण्टकितगात्र इत्यर्थः । तथा **कृतानी**हभवेऽन्यभवे च विहितानि यानि **दुष्कृतानि** पापकृत्यानि तेषां गर्हा गुरुसमक्षं "हा दुट्ठु कय"मित्यादि निन्दा, तया योऽसावशु**भकर्मक्षयः** पापकर्मापगमस्तत्र **काङ्क्षिर** आकाङ्क्षावान् भणति, दुष्कृतगर्हातो यः पापापगमो भवति तमात्मनः समभिलषन्नेवं वक्ष्यमाणं **भणति** वदतीत्यर्थः ।।४९।।

**गुण०** **चतुःशरणगमनेन** चतुःशरणाङ्गीकरणेन **सञ्चितं** राशीकृतं **यत्सुचरितं** पुण्यं तेन योऽसौ **रोमाञ्चो** रोमोल्लासस्तेना**ञ्चितं** भूषितं **शरीरं** यस्य स तथा, शरणगमनार्जितस्य सुकृतस्य वशात्कण्टकितगात्र इत्यर्थः। **कृतानि** विहितानि यानि **दुष्कृतानि** अशुभाचारास्तेषां **गर्हा** गुरुसमक्षं "हा दुक्कयमि"त्यादि निन्दा, तया कृतदुष्कृतगर्हया योऽसा**वशुभकर्मक्षयः** पापकर्मापगमस्तत्र **काङ्क्षिर** आकाङ्क्षावान् **भणति** दुष्कृतगर्हातो यः पापापगमो भवति तमात्मनः समभिलषन्नेवं वक्ष्यमाणं वदतीत्यर्थः ।।४९।।

**सोम०** यच्च भणति तदाह-

**गुण०** यच्च भणति तदाह-

**इहभवियमन्नभवियं मिच्छत्तपवत्तणं जमहिगरणं ।**
**जिणपवयणपडिकुट्ठं दुट्ठं गरिहामि तं पावं ।।५०।।**

**सोम०** इहास्मिन् भवे यत्कृतं त**दिहभविकम्,** अन्यस्मिन् भवे भव**मन्यभविक**मतीतभविष्य-द्भवसम्भवमित्यर्थः, **मिथ्यात्वप्रवर्त्तनं** कुतीर्थिकदानमानसन्मानतद्देवार्चनतच्चैत्यकारा-पणाद्यधिकरणमन्यदपि **चाधिकरणं** भवनारामतटाकादिकारणधनुःखड्गादिशस्त्र-यन्त्रगन्त्रीहलोदूखलशृङ्खलादिविधापनदानादिरूपं यत्कृतमिति शेषः, तथाऽन्यच्च **जिनप्रवचने यत्प्रतिक्रुष्टं** प्रतिषिद्धं **दुष्टं तत्पापं गर्हामि** जुगुप्सामीत्यर्थः ।।५०।।

**गुण०** इहास्मिन् भवे यत्कृतं **तदिहभविक**मन्यस्मिन् भवे भव**मन्यभविकम**तीतभविष्यद्भव-सम्भवमित्यर्थः, **मिथ्यात्वप्रवर्तनं** कुतीर्थिकदानसन्मानतद्देवार्चनतत्चैत्यकारापणाद्यधि-करणमन्यदपि च पुरप्राकारादिखड्गादियन्त्रगन्त्रीहलोदूखलादि तथाऽन्यदपि यद् **जिनप्रवचने प्रतिक्रुष्टं** निराकृतं भवतीति हेतुत्वाद् **दुष्टं तत्पापं गर्हामि** जुगुप्सामि ।।५०।।

**सोम०** उक्ता सामान्येन दुष्कृतगर्हा, सम्प्रति विशेषेण तामाह-

**मिच्छत्ततमंधेणं अरिहंताइसु अवन्नवयणं जं ।**
**अन्नाणेण विरइयं इण्हिं गरिहामि तं पावं ।।५१।।**

**सोम०** मिथ्यात्वमेव तमोऽन्धकारः तेनान्धस्तेन **मिथ्यात्वतमोऽन्धेन,** मिथ्याशास्त्रोपहत-

भावचक्षुषा जीवेनेति शेषः, **अर्हदादिषु** अर्हत्सिद्धाचार्योपाध्यायादिषु पूजाबहुमानार्हेषु **अवण्णवयणं जं ति** अवर्णवादवचनमसद्दोषकथनमवज्ञावचनं वा हीलारूपं **यदज्ञानेन** विवेकशून्येनोक्तमिति शेषः, तथा **विरचितं** कृतं कारितमनुमतं चातीतानागतवर्तमानकाले, यच्चान्यदपि जिनधर्मप्रत्यनीकत्ववितथप्ररूपणापरदेवधर्मस्थापनादिरूपमि**दानीम**वगतपरमार्थस्त**त्पापं गर्हामि** निन्दामि गुरुसमक्षमालोचयामीत्यर्थः ।।५१।।

**गुण०** मिथ्यात्वमेव तमोऽन्धकारं तद्रूपं पातकं वा तेन **मिथ्यात्वतमोऽन्धेन** मिथ्याशास्त्रोपहतभावचक्षुषा सता जीवे**नार्हदादिषु** अर्हत्सिद्धाचार्योपाध्यायादिषु **अवर्णवादवचनम**सद्दोषकथनं **यदज्ञानेन** जिनशासनबाह्येनोक्तमिति शेषः । तथान्यदपि मिथ्यात्वमोहितमतिना **विरचितं** कृतं कारितमनुमतं वा अतीतानागतवर्तमानकाले, **इदानीम**वगतपरमार्थः सन् **तत्पापं गर्हामि** निन्दामि गुरुसमीपे आलोचयामि, गुरुभिर्दत्तं तपःकर्म सम्यक् प्रतिपद्येऽहम् ।।५१।।

**सुय-धम्म-संघ-साहुसु पावं पडिणीययाए जं रइयं ।**
**अन्नेसु य पावेसुं इण्हिं गरिहामि तं पावं ।।५२।।**

**सोम०** श्रुतं च धर्मश्च सङ्घश्च साधवश्च **श्रुतधर्मसङ्घसाधवः** तेषु **पापमा**शातनारूपं **प्रत्यनीकतया** विद्विष्टभावेन **यद्रचितं,** तत्र श्रुतस्य द्वादशाङ्गरूपस्य तदध्येत्रध्यापकानां वा उपरि यदरुच्यबहुमानादिचिन्तनम् "अज्ञानमेव शोभन"मिति भणतः पूर्वभवे माषतुषस्येव । धर्मप्रत्यनीकता "कविला इत्थंपि इहयंपी"ति भणतो मरीचेरिव । सङ्घप्रत्यनीकता सम्मेतशैलयात्रागच्छत्श्रीसङ्घविलोडकानां [विलोपकानां] सगरसुतजीवपूर्वभवचौराणामिव । साधुप्रत्यनीकता गजसुकुमालं प्रति सोमिलद्विजस्येव । तथा सर्वेषां श्रुतधर्मार्हदाचार्योपाध्यायसाधूनामुपरि प्रत्यनीकता नमुचिदत्तगोशालकादीनामिव ज्ञेया । तथा**ऽन्येष्वपि पापेष्व**ष्टादशसु प्राणातिपातादिषु यत् किमपि **पापं** जीवव्यपरोपणादिकं कृतं तद**प्यधुना गर्हामी**त्यर्थः ।।५२।।

**गुण०** श्रुतं च धर्मश्च सङ्घश्च साधवश्च **श्रुतधर्मसङ्घसाधव**स्तेषु **पापं प्रत्यनीकतया** विद्विष्टभावेन **यद्रचितमन्येष्वपि पापेष्व**ष्टादशसु प्राणातिपातादिषु विषयभूतेषु यत्किमपि **पापं** जीवव्यपरोपणादिकं कृतं **तदप्यधुना गर्हामि** ।।५२।।

**सोम०** यच्चोक्तं "अन्नेसु य पावेसु"त्ति तदेव व्यक्तीकरोति-

**गुण०** यच्चोक्तं "अन्नेसु य पावेसु" तदेव व्यक्तीकुर्वन्नाह-

**अन्नेसु य जीवेसु मित्ती-करुणाइ गोयरेसु कयं ।**
**परियावणाइदुक्खं इण्हिं गरिहामि तं पावं ।।५३।।**

**सोम० अन्येष्वपि जीवेषु** तीर्थकरादिव्यतिरिक्तेषु एकेन्द्रियादिसर्वभेदभिन्नेषु **मैत्रीकारुण्य-माध्यस्थ्यानि** विधेयतया **गोचरो** विषयो येषां ते तथा । तेषु **कृतं** निष्पादितं **'परिआवणाइ'**त्ति **परितापनादिदुःखं** परितापनारूपमध्यपदग्रहणात्तुलादण्डन्याये-नाभिहतादिभिर्दशभिः पदैस्तेषु जीवेषु यत्किमपि **दुःखं** कष्टं कृत**मिदानीं तदपि पापं गर्हामि** जुगुप्साम्यालोचयामीतियावत् ।।५३।।

**गुण० अन्येष्वपि, जीवेषु** तीर्थकरादिव्यतिरिक्तेषु पृथिव्यादिलोकान्तपर्यन्तेषु । कथम्भूतेषु **मैत्रीकारुण्यादिगोचरेषु । कृतं परितापनादिदुःखं** परितापनादिमध्यपदग्रहणात् तुलादण्डन्यायेनाभिहतादिभिर्दशभिः पदैस्तेषु जीवेषु यत्किमपि दुःखं कष्टं कृत**मिदानीं तदपि पापं गर्हामि** ।।५३।।

**सोम०** अथोपसंहारमाह-

**जं मण-वय-काएहिं कय-कारिय-अणुमईहिं आयरियं ।**
**धम्मविरुद्धमसुद्धं सव्वं गरिहामि तं पावं ।।५४।।**

**सोम० यत्कि**ञ्चित् पापमकृत्यं मनोवाक्कायै रागद्वेषमोहाज्ञानवशात् **कृतकारितानुमति-भिराचरितं** विहितं **धर्मस्य** जिनधर्मस्य **विरुद्धं** प्रतिकूलमत एवा**शुद्धं** सदोषं **सर्वं** समस्तमपि **तत्पापं गर्हाम्य**पुनःकरणेनाङ्गीकरोमि गुरुसन्निधावालोचयामि ।।५४।।

**गुण० यत्**पापमकृत्यं **मनोवाक्कायैः** रागद्वेषमोहाज्ञानहेतुभूतैः **कृतकारितानुमतिभिराचरितं** विहितं **धर्मस्य विरुद्धं** प्रतिकूलं सूत्रनिषिद्धमत एवा**शुद्धं** सदोषं **सर्वं** समस्तमपि **तत्पापं गर्हामि** गुरुसन्निधावालोचयामीति तात्पर्यार्थः । शेषं प्राग्वत् ।।५४।।

**सोम०** उक्तो दुष्कृतगर्हारूपो द्वितीयोऽधिकारः । अधुना सुकृतानुमोदनारूपं तृतीयाधिकारमाह-

**गुण०** तृतीयाधिकारमाह-

**अह सो दुक्कडगरिहादलिउक्कडदुक्कडो फुडं भणइ ।**
**सुकडाणुरायसमुइन्नपुन्नपुलयंकुरकरालो ।।५५।।**

**सोम० अथा**नन्तरं **स** साध्वादिको जीवः, कथम्भूतः ? **दुष्कृतगर्हया** दुश्चरित्रनिन्दनेन **दलितानि** चूर्णीकृतानि **उत्कटानि** प्रबलानि **दुष्कृतानि** पापानि येन स तथा, दुष्कृतगर्हया प्रतिहतमहापातकनिकर इत्यर्थः । एवंविधः सन् **स्फुटं** यथा स्यादेवं **भणति** । पुनः स किम्भूतः ? **सुकृतानुरागेण** सुचरितबहुमानेन **समुदीर्णाः** सञ्जाताः पुण्यबन्धहेतुत्वात् **पुण्याः** पवित्रा ये **पुलकाङ्कुरा** रोमोद्गमविशेषास्तैः **करालो** व्याप्तः कर्मवैरिणं प्रति भीषणो वा ।।५५।।

**गुण० अथा**नन्तरं **स** साधुप्रभृतिको जीवः । कथम्भूतो ? **दुष्कृतगर्हया** दुश्चरितनिन्दनेन **दलितानि** चूर्णीकृतानि **उत्कटानि** दुष्कृतानि येन स दलितोत्कटदुष्कृतः प्रतिहतमहापातकनिकर इत्यर्थः । तथा **स्फुटं** प्रकटं **भणति** । पुनः किंगुण ? इत्याह- **सुकृतानुरागेण** सुचरितबहुमानेन **समुत्पन्नाः** सञ्जाताः **पुण्याः** पवित्रा ये **पुलकाङ्कुरा** रोमोद्गमविशेषास्तैः **करालो** भीषणः कर्मवैरिणं प्रतीति शेषः ।।५५।।

**सोम०** यद्भणति तद्गाथाद्वयेनाह-

**अरिहत्तं अरिहंतेसु, जं च सिद्धत्तणं च सिद्धेसु ।**
**आयारं आयरिएसु, उज्झायत्तं उवज्झाएसु ।।५६।।**

**सोम० अर्हत्त्वं** तीर्थकरत्वं प्रतिदिनं द्विर्धर्मदेशनाकरणभव्यनिकरप्रतिबोधनतीर्थप्रवर्त्तनादिरूपम्, केषु ? **अर्हत्सु** तीर्थकरेषु तदनुमन्येऽहमिति सम्बन्धः। **यच्च सिद्धत्वं** सदा केवलज्ञानोपयुक्तत्वसर्वकर्मविमुक्तत्वनिरूपमसुखभोक्तृत्वादिरूपं **सिद्धेष्व**नुमन्ये । तथाऽऽ**चारं** ज्ञानाचारादिरूपं पञ्चविध**माचार्येष्व**नुमन्ये । तथा- **उपाध्यायत्वं** सिद्धान्ताध्यापकत्वरूप**मुपाध्यायेष्व**नुमन्ये इति ।।५६।।

**गुण०** **अर्हत्त्वं** तीर्थंकरत्वं योजनप्रमाणवाण्या भविकनिकरप्रतिबोधकत्वं समवसरणादि च, केषु ? तीर्थकरेषु तदनुमन्येऽहमिति सम्बन्धः । **यच्च सिद्धत्वं** सदा केवलज्ञानोपयुक्तत्वं सर्वकर्मविमुक्तत्वं **सिद्धेष्वनु**मन्य इति । तथा **आचारं** ज्ञानदर्शनचारित्रतपोवीर्यरूपं पञ्चविधं **आचार्येष्व**नुमन्य इति । तथा **उपाध्यायत्वं** सिद्धान्ताध्यापकत्व**मुपाध्यायेष्व**नुमन्य इति ।।५६।।

**साहूण साहुचरियं, देसविरइं च सावगजणाणं ।**
**अणुमन्ने सव्वेसिं, सम्मत्तं सम्मदिट्ठीणं ।।५७।।**

**सोम०** तथा **साधूनां** सामायिकादिचारित्रवतां पुलाकबकुशादिभेदभिन्नानां जिनकल्पिकप्रतिमाधरयथालन्दिकपरिहारविशुद्धिककल्पातीतप्रत्येकबुद्धबुद्धबोधितादिभेदैरनेकविधानां सर्वकालसर्वक्षेत्रविशेषितानां **साधुचरितं** चरणादिक्रियाकलापं ज्ञानदर्शनचारित्रधारित्वसमभावत्वासहायसहायत्वादिरूपं चाऽनुमन्ये । **'साहुकिरियमि'**ति पाठान्तरे तु साधुक्रियां सर्वसाधुसामाचारीरूपामित्यर्थः। तथा **देशविरतिं** सम्यक्त्वाणुव्रतगुणव्रतशिक्षाव्रतैकादशप्रतिमादिरूपाम्, केषाम् ? 'श्रां पाके' श्रान्ति पचन्ति तत्त्वार्थश्रद्धानं निष्ठां नयन्तीति श्राः, 'टुवपी बीजसंताने' वपन्ति जिनभवनादिसप्तक्षेत्रेषु निजधनबीजानीति वाः, कृत् विक्षेपे' किरन्ति विक्षिपन्ति क्लिष्टकर्मरज इति काः, श्राश्च वाश्च काश्च श्रावकास्ते च ते जनाश्च **श्रावकजनास्तेषां** श्रावकत्व**मनुमन्ये** । तथा **सर्वेषां** सम्यक्त्वम्, **सम्यक्त्वं** जिनोक्ततत्त्वश्रद्धानरूपं **"तमेव सच्चं निस्संकं जं जिणेहिं पवेइअमि"**ति निश्चयलक्षणमनुमन्ये। केषाम् ? सम्यग् अविपर्यस्ता दृष्टिः दर्शनं येषां ते सम्यग्दृष्टयः, तेषां **सम्यग्दृष्टीनाम**विरतानामपि सुरैरप्यचाल्यसम्यक्त्वानां श्रेणिकादीनामिवेत्यर्थः ।।५७।।

**गुण०** **साधुनां** प्रमत्तपुलाकादिबुद्धबोधितभेदानां **साधुचरितं** चरणकरणादि, **देशविरतिं** च **श्रावकजनानां** श्रावकत्व**मनुमन्ये** इत्यर्थः, **सर्वेषां सम्यक्त्वं सम्यग्दृष्टीनाम**विरतानां श्रेणिकादीनामिव ।।५७।।

**सोम०** अथ सर्वानुमोदनार्हसङ्ग्रहमाह-

**अहवा सव्वं चिय वीयरायवयणाणुसारि जं सुकडं ।**
**कालत्तए वि तिविहं अणुमोएमो तयं सव्वं ।।५८।।**

**सोम० अथवे**ति सामान्यरूपप्रकारदर्शने **'चिअ'** एवार्थे, ततः **सर्वमेव वीतरागवचनानुसारि** जिनमतानुयायि **यत् सुकृतं** जिनभवनबिम्बकारणतत्प्रतिष्ठासिद्धान्तपुस्तकलेखन-तीर्थयात्राश्रीसङ्घवात्सल्यजिनशासनप्रभावनाज्ञानाद्युपष्टम्भधर्मसान्निध्यक्षमामार्दव-संवेगादिरूपं मिथ्यादृक्सम्बन्ध्यपि मार्गानुयायि कृत्यं **कालत्रयेऽपि त्रिविधं** मनोवाक्कायैः कृतं कारितमनुमतं च यदभूत् भवति भविष्यति चेति । **'तकत्'** इति तत्शब्दात् 'त्यादिसर्वादिः स्वरेष्वन्त्या'दिति सूत्रेण स्वार्थेऽकप्रत्यये रूपम्, तदित्यर्थः, **तत् सर्वं** निरवशेष**मनुमोदयामो**ऽनुमन्यामहे, हर्षगोचरतां प्रापयाम इत्यर्थः। बहुवचनं चात्र पूर्वोक्तचतुःशरणादिप्रतिपत्त्या उपार्जितपुण्यसम्भारत्वेन स्वात्मनि बहुमान-सूचनार्थम् ।।५८।।

**गुण० अथवा 'चिय'** एवार्थे ततः **सर्वमेव वीतरागवचनानुसारि** जिनमतानुयायि **यत्सुकृतं** जिनशासनोक्तं किञ्चित् दृश्यते **कालत्रयेऽपि त्रिविधं** मनोवाक्कायैः कृतं कारितमनुमोदित**मनुमोदयामो**ऽ**नुमन्यामहे तकं सर्वम्** ।।५८।।

**सोम०** तदेवमुक्तः सुकृतानुमोदनारूपस्तृतीयोऽधिकारः । अथ चतुःशरणादिकरणे यत्फलं स्यात्तद्गाथाद्वयेनाह-

**गुण०** चतुःशरणादीन् कुर्वतो यद्भवति तद्गाथाद्वयेनाह-

**सुहपरिणामो निच्चं, चउसरणगमाइ आयरं जीवो ।**
**कुसलपयडीओ बंधइ, बद्धाउ सुहाणुबंधाओ ।।५९।।**

**सोम० शुभपरिणामः** प्रशस्तमनोऽध्यवसायः सन् **नित्यं** सदैव **चतुःशरणगमनादि** चतुःशरण-गमनदुष्कृतगर्हासुकृतानुमोदनान्या**चरन्** कुर्वन् साधुप्रभृतिको **जीवः कुशलं** पुण्यं तत्प्र**कृतीः "साउच्चगोअमणुदुगे"**त्यादिगाथोक्ताः द्विचत्वारिंशत्सङ्ख्याः **बध्नाति,** शुभाध्यवसायबध्यमानत्वात्तासाम्, तथा ताश्च प्रकृती**र्बद्धाः** सतीः शुभाध्यवसायव-शाच्छु**भोऽनुबन्ध** उत्तरकालः फलविपाकरूपो यासां ताः **शुभानुबन्धा** एवंविधाः करोतीत्यर्थः ।।५९।।

**गुण०** **शुभपरिणामो** **नित्यं** सदैव **चतु:शरणगमनाद्याचरन्** कुर्वन् साधुप्रभृतिको **जीवः** **कुशलप्रकृतीः** पुण्यप्रकृतीर्द्विचत्वारिंशत्सङ्ख्या **बध्नाति,** तथा ताश्च प्रकृतीर्ब**द्धाः** सतीर्विशिष्टाध्यवसायवशात् **शुभानुबन्धाः** शुभोत्तरकालफलविपाकाः करोतीति गम्यमित्यर्थः ।।५९।।

**मंदणुभावा बद्धा तिव्वणुभावाओ कुणइ ता चेव ।**
**असुहाओ निरणुबंधाओ, कुणइ तिव्वाओ मंदाओ ।।६०।।**

**सोम०** तथा ता एव शुभप्रकृतीः प्राग्**मन्दानुभावाद् बद्धाः** स्वल्पशुभपरिणामवशान्मन्दरसा बद्धा विशिष्टतरशुभाध्यवसायविशेषात्तीव्रोऽनुभावो रसो यासां ता**स्तीव्रानुभावाः** अत्युत्कटरसाः **करोति,** उपलक्षणादल्पकालस्थितीः दीर्घकालस्थितीः करोति, अल्पप्रदेशका बहुप्रदेशकाश्च करोतीत्यपि ज्ञेयम् । तथा '**असुहाउ**'त्ति याश्चाशुभा "**नाणंतरायदसगम्**"इत्यादिगाथोक्ता द्वयशीतिसङ्ख्याः पूर्वं बद्धाः स्युस्ता निर्गतोऽनुबन्ध उत्तरकालफलविपाकरूपो याभ्यस्ताः **निरनुबन्धाः** एवंविधाः **करोति,** तद्विपाकजनितं दु:खमुत्तरकाले तस्य न भवतीत्यर्थः । तथा **ता एव** यास्तीव्रास्तीव्ररसाः प्राक्तीव्राशुभपरिणामेन बद्धास्ता मन्दा मन्दरसाः करोति, चतु:शरणगमनादिरूप-शुभाध्यवसायबलाद् । अत्रापि दीर्घकालस्थितीरल्पकालस्थितीर्बहुप्रदेशका अल्प-प्रदेशकाश्च करोतीत्यपि ज्ञेयम्, शुभपरिणामवशादशुभप्रकृतीनां स्थितिरसप्रदेशानां ह्राससम्भवात् ।।६०।।

**गुण०** **ता एव** शुभप्रकृती**र्मन्दानुभावबद्धाः** स्वल्पशुभपरिणामबद्धाः विशिष्टतरशुभा-ध्यवसायविशेषा**त्तीव्रानुभावा** अत्युत्कटरसाः **करोति,** किञ्चाल्पकालस्थितिका दीर्घकालस्थितीः करोति, अल्पप्रदेशिका बहुप्रदेशिकाश्च करोति । तथा**ऽशुभा-**द्वयशीतिसङ्ख्याः "**नाणंतराये**"त्यादिकाः पापप्रकृतीः पूर्वं बद्धा अशुभा **निरनुबन्धा**स्तद्विपाकजनितदु:खरहिताः **करोति,** **तीव्राश्च** ताः सतीः शुभपरिणामेनैव **मन्दानुभावा** अल्पविपाकाः करोति, किञ्च दीर्घकालस्थितीरल्पकालस्थितीः करोति, बहुप्रदेशिका अल्पप्रदेशिकाः करोति।।६०।।

**सोम०** उक्तं चतुःशरणप्रतिपत्त्यादेर्महत्फलम्, अत एव तदवश्यं कर्त्तव्यमिति दर्शयति-

**ता एयं कायव्वं बुहेहिं निच्चं पि संकिलेसम्मि ।**
**होइ तिकालं सम्मं असंकिलेसम्मि सुगईफलं [सुकयफलं] ।।६१।।**

अल्प शुभ परिणामइं करीनें जे शुभ कर्मप्रकृतिनो मंद रस बांध्यो होय ते उत्कृष्ट शुभ परिणामें करी चउसरण भणता थिको ते शुभ कर्मप्रकृतिनो अति तीव्र रस उपजावें जिम सेलडीनो रस कढतां तीव्र रस थाइ तिम शुभ परिणामें तीव्र रस थाइ । ज्ञानावरणीय नीचैर्गोत्रादिक अशुभ कर्मप्रकृति छें ते रस रहित करें अनें तीव्र अशुभ परिणामे करी अशुभ कर्मप्रकृतिनो तीव्र रस बांध्यो हुइ ते चउसरण भणतो मंदरस करइ ।।६०।।

**ता एयं कायव्वं बुहेहिं निच्चं पि संकिलेसम्मि ।**

**होइ तिकालं सम्मं असंकिलेसम्मि सुकयफलं [सुगइफलं] ।।६१।।**

**टि. सङ्क्लेशे रोगाद्यापदि नित्यं क्रियमाणं तदुपशमाय स्यात् । सम्यग्मनोवाक्कायैः क्रियमाणं स्वर्गापवर्गपदम् ।।६१।।**

**अव. बुधैरपि सङ्क्लेशेऽपि नित्यं ता एतत् चतुःशरणं कार्यम् । सङ्क्लेशरहितेऽपि त्रिकालं सम्यक् । असङ्क्लेशेऽपि सुकृतफलं भवति ।।६१।।**

**बाला.** ते माटइं ए चउसरण करवुं पंडितइं सदाइ रोगादिक संकलेस आवइ वली विशेषें करवुं होइ । संकलेस नो हइतो त्रिण काल सम्यग् प्रकारिं भणतां थकां पुण्यफल थाइ, एटले चउचरण त्रिकाल गणतां रोग सोग आपदा सर्व नासें अने आपदा कसी नो हइं तो घणुं पुण्य थाइ ।।६१।।

**चउरंगो जिणधम्मो न कओ, चउरंगसरणमवि न कयं ।**

**चउरंगभवच्छेओ न कओ, हा ! हारिओ जम्मो ।।६२।।**

**टि. चतुः प्रकारः ।।६२।।**

**अव. येन जीवेन चतुरङ्गो जिनधर्मो न कृतः । चतुरङ्गशरणमपि न कृतम् । येन चतुरङ्गभव-संसारछेदो न कृतः । तेन पुरूषेण, हा इति खेदे जन्म हारितः ।।६२।।**

**बाला.** दान-१, शील-२, तप-३, भावना-४, ए चतुरंगः श्री जिनधर्म जेणइं न करयो । अरिहंत-१, सिध्ध-२, साधू-३, अने धर्म-४, ए च्यारनूं शरण पणि जेणि न करयुं ।। च्यार गतिरूप संसारनो छेद जेणिं न करयो तेणिं हारयो माणसनो जनम ते खेदाइ हांय हांय हवै जे चउसरण न करें तेहनें पछतावो कहे छे ।।६२।।

**इय जीय ! पमायमहारिवीरभद्दंतमेयमज्झयणं ।**

**झाएसु तिसंझमवंझकारणं निव्वुइसुहाणं ।।६३।।**

**टि.** **हे जीव ! आत्मन् वीरं सुभटकल्पम् । भद्रं अन्ते यस्मात् भद्रान्तं मोक्षप्रापकम् । एतदध्ययनम् । जीअ इति पाठो जितप्रमादमहारिवीरभद्रस्येदं तदेव । उक्तसाधोः लक्षणमध्ययनमिति ।।६३।।**

**अव.** **हे जीव ! प्रमाद एव महारि महान् अरिः वैरीस्तस्य वीरजीपनशील हे प्रमादमहारि । वीरभद्रं कल्याणमन्ते यस्मात् तदेवाध्ययनमेवंविधं त्रिसन्ध्यं ध्याय एकचित्तयाध्ययनस्यार्थरहस्यं चिन्तय । इयं हे जीव ! प्रमादमहारिवीरभद्र ! तमेवाध्ययनं ध्यायत । यत एतदवन्ध्यं कारणं सफलं निवृत्तिसुखानां मुक्तिसुखानां कारणं सफलमित्यर्थः ।।६३।। इतिं अवचूरिः ।।**

**बाला.** एणिं प्रकारिं हे जीव प्रमादरूप जे मोटा वयरी तेहनें जीतवानइं सुभट प्रमादनो महावयरी एहवो वीरभद्रनामें महामुनीश्वर एतले चोसरणना करणना करणारनुं नाम सूचिउं मुजनइं भद्रथाउ अने हे जीव ! तुं ए मोक्षना सुखनुं सफलकारण (अेवुं) चउसरण अध्ययनं त्रिणकाल ध्याइ ।।६३।।

**।। इति श्री चतुःशरणप्रकीर्णकं समाप्तम् ।।**

श्रीकीर्त्तिविजयवाचकशिष्योपाध्यायश्रीविनयविजयेन एषः चतुःशरणार्थो रचितो बालावबोधाय सं. १८४४ रा वर्षे फाल्गुण सुदि २ दिने ।। श्री पल्लिकानगरे लिखीकृतः ।। श्रीरस्तुः ।।

**।। श्री कल्याणमस्तुः ।।** शुभं भवतु ।। श्रीः ।।

**जीवदया जिणधम्मो, सावयजम्मो गुरा(रू)णपयभत्ती ।।**

**एय रयणकचउक्कं, पुण्णेहि विणा न पावंति ।।१।।**

**।। वैक्रमीये २०६४ तमे वर्षे विजयकीर्तियशसूरिणा संशोधितं सम्पादितञ्चेदं टिप्पणावचूरिबालावबोधसहितं श्रीचतुःशरणप्रकीर्णकं समाप्तम् ।।**

## ।। बृहद्विवरणान्तर्गतोद्धरणपाठानामुपलब्धवृत्तयः ।।

A अनु.द्वा.सू. २९ [चतु० गा० १ वृ०]

**आवस्सयं १, अवस्सकरणिज्जं २, धुव-णिग्गहो ३, विसोही य ४ ।**
**अज्झयणछक्कवग्गो ५, नाओ ६, आराहणा ७, मग्गो ८।।२।।**

**आव०चू०**आवस्सगं० गाहा०**आवस्सगकरणिज्जं** जं तं **आवासं** । अहवा गुणाणमाधारत्तणतो आवास इव **आवासं** । अहवा आ मज्जायाए वासं करेइ त्ति **आवासं** । अहवा जम्हा तं आवासयं जीवं आवासं करेति दंसण-णाण-चरणगुणाण तम्हा तं **आवासं** । अहवा तक्करणातो णाणादिया गुणा आवासेंति त्ति **आवासं** । अहवा आ मज्जायाए पसत्थभावणातो **आवासं** । अहवा आ मज्जाताए, वस आच्छादने [पा० धा० १०२३, का० धा० ४/४७] पसत्थगुणेहि अप्पाणं छादेतीति **आवासं** । अहवा सुण्णमप्पाणं तं पसत्थभावेहिं आवासेतीति **आवासं** । कम्मऽट्ठविहं धुवं, कसाया इंदिया वा धुवा, इमेण जम्हा तेसिं णिग्गहो कज्जति तम्हा **धुवणिग्गहो** । अवस्सं वा निग्गहो **धुवणिग्गहो** । कम्ममलिणो आता विसोहिज्जतीति **विसोधी** । सामादिकादि गण्यमानानि **षडध्ययनानि** समूहो **वग्गो** । **णायो** युक्तम् । अभिप्रेतार्थसिद्धिः **आराधणा** । मोक्खस्स सव्वपसत्थभावाण वा लद्धीण वा **पंथो,** मार्ग इत्यर्थः ।।२।।

**हा०वृ०** अवश्यक्रियानुष्ठानादावश्यकम्, गुणानां वा आवश्यकमात्मानं करोती**त्यावश्यकम्** । **अवश्यकरणीयमिति** मोक्षार्थिना नियमानुष्ठेयमिति । ध्रुवनिग्रह इति - अत्रानादित्वात् प्रायोऽनन्तत्वाच्च ध्रुवं कर्म तत्फलभूतो वा भवः, तस्य निग्रहो **ध्रुवनिग्रहः**, निग्रहहेतुत्वान्निग्रहः । तथा कर्ममलिनस्याऽऽत्मनो विशुद्धिहेतुत्वाद् **विशुद्धिः** । **अध्ययनषट्कवर्गः** सामायिकादिषडध्ययनसमुदायः । सम्यग् जीवकर्मसम्बन्धव्यवहारापनयनाद् **न्यायः** । मोक्षाराधनानिबन्धनत्वाद् **आराधना** । **मार्गः** पन्थाः शिवस्येति गाथार्थः ।

**हे०वृ०** श्रमणादिभिरवश्यं क्रियत इति निपातना**दावश्यकम्,** अथवा ज्ञानादिगुणा मोक्षो वा आ समन्ताद्वश्यः क्रियतेऽनेनेत्यावश्यकम्, अथवा आ समन्ताद्वश्या इन्द्रियकषायादिभावशत्रवो येषां ते तथा, तैरेव क्रियते यत् तदावश्यकम्, अथवा समग्रस्यापि गुणग्राम-

स्यावासकमित्यावासकमित्याद्यपरमपि स्वधिया वाच्यम्, पूर्वमपि च व्युत्पादितमिदम् । तथा मुमुक्षुभिर्नियमानुष्ठेयत्वाद**वश्यकरणीयम्** । तथा **ध्रुवनिग्रह** इति, अत्रानादित्वात् क्वचिदपर्य-वसितत्वाच्च ध्रुवं कर्म तत्फलभूतः संसारो वा, तस्य निग्रहहेतुत्वान्निग्रहो ध्रुवनिग्रहः । तथा कर्ममलिनस्याऽऽत्मनो विशुद्धिहेतुत्वा**द्विशुद्धिः** । तथा सामायिका-दिषडध्ययनकलापात्म-कत्वा**दध्ययनषड्वर्गः** । तथाऽभिप्रेतार्थसिद्धेः सम्यगुपायत्वात् **न्यायः** अथवा जीवकर्मसम्बन्धापनयनान्न्यायः, अयमभिप्रायः-यथा कारणिकैर्दष्टो न्यायो द्वयोरर्थिप्रत्यर्थिनोर्भूमिद्रव्यादिसम्बन्धं चिरकालीनमप्यपनयत्येवं जीवकर्मणोरना-दिकालीनमप्याश्रयाश्रयिभावसम्बन्धमपनयतीत्यावश्यकमपि न्याय उच्यते । तथा मोक्षाराधनाहेतुत्वा**दाराधना** । तथा मोक्षपुरप्रापकत्वादेव **मार्ग** इति गाथार्थः ।।२।।

**B अनु.द्वा.सू. ७३ [चतु० गा० १]**

आवस्सगस्स णं इमे अत्थाहिगारा भवंति । तं जहा-

**सावज्जजोगविरई १, उक्कित्तण २, गुणवओ य पडिवत्ती ३ ।**
**खलियस्स निंदणा ४, वणतिगिच्छ ५, गुणधारणा ६ चेव।।६।।**

**अनु०चू०** सीसो पुच्छति - कहं छव्विहमावस्सयं ति ? भण्णति - 'जतो सामादियादियाण सावज्जवज्जणादि छव्विहो अत्थणिबंधो, इमे य ते अत्था - **सावज्जजोग०** गाधा । पढमे सामादियज्झयणे पाणातिवायादिसव्व**सावज्जजोगविरती** कातव्वा । बितिए दरिसणवि-सोहिणिमित्तं पुणो बोहिलाभत्थं च कम्मखवणत्थं च तित्थकराणा**मुक्कित्तणा**कता । ततिए चरणादि**गुण**समूह**वतो** वंदण-णमंसणादिएहिं **पडिवत्ती** कातव्वा । चतुत्थे मुलुत्तरा-वराधक्खलणाए **क्खलितो** पच्चागतसंवेगो विसुज्झमाणभावो पमादकरणं संभरंतो अप्पणो **णिंदण**गरहणं करेति । पंचमे **व्रण**साधम्मोवणएण दसविधपच्छित्तेण चरणादियारव्रणस्स **चिगिच्छं** करेति । छट्ठे जहा मूलुत्तर**गुण**पडिवत्ती निरतियार**धारणं** च जधा तेसिं भवति तधा अत्थपरूवणा ।

**हा०वृ०** आह - किं पुनरिदमावश्यकं षडध्ययनात्मकम् ? इति, उच्यते - षडर्थाधिकारविनियोगात् । क एतेऽर्थाधिकाराः ? इति तानुपदर्शयन्नाह - **आवस्सगस्स ण**मित्यादि । **सावज्ज** गाहा, व्याख्या - **सावद्ययोगविरतिः** सपापव्यापारविरमणं सामायिकार्थाधिकारः । **उत्कीर्तनेति** सकलदुःखविरेकभूतसावद्ययोगविरत्युपदेशकत्वादुपकारित्वात् सद्भूतगुणो-त्कीर्तनकरणादन्तःकरणशुद्धेः प्रधानकर्मक्षयकारणत्वाद् दर्शनविशुद्धिः (द्धेः) पुनर्बोधि-लाभहेतुत्वाद् भगवतां जिनानां यथाभूतान्यासाधारणगुणोत्कीर्तना चतुर्विंशतिस्तवस्येति ।

**गुणवतश्चप्रतिपत्त्यर्थं** [वन्दना] वन्दनाध्ययनस्य । तत्र **गुणाः** मूलगुणोत्तरगुणव्रत - पिण्डविशुद्धयादयो गुणा अस्य विद्यन्त इति गुणवान्, तस्य गुणवतः प्रतिपत्त्यर्थं वन्दनादिलक्षणा [प्रतिपत्तिः] कार्येति । उक्तं च - पासत्थादी [आवश्यक नि० ११०८] गाहा । **च**शब्दात् पुष्टमालम्बनमासाद्याऽगुणवतोऽपीत्याह । उक्तं च - परियाय० [आवश्यकनि० ११२८] गाहा । **स्खलितस्य निन्दा** प्रतिक्रमणार्थाधिकारः, कथञ्चित् प्रमादतः स्खलितस्य मूलगुणोत्तरगुणेषु प्रत्यागतसंवेगविशुद्धयमानाध्यवसायस्य प्रमादकरणमनुस्मरतोऽकार्यमिदमतीवेति भावयतो निन्दाऽऽत्मसाक्षिकीति भावना । व्रणचिकित्सा कायोत्सर्गस्य, इयमत्र भावना - निन्दया शुद्धिमनासादयत व्रणसाधर्म्योपनयेनाऽऽलोचनादिदशविधप्रायश्चित्तभैषजेन चरणातिचारव्रणचिकित्सेति **गुणधारणा** प्रत्याख्यानस्यार्थाधिकार इति, अयमत्र भावार्थः- यथेह मूलगुणोत्तरगुणप्रतिपत्तिः निरतिचारसन्धारणं च तथा प्ररूपणमर्थाधिकार इति । **च**शब्दादन्ये चापान्तरालार्थाधिकारा विज्ञेया इति । **एव**कारोऽ-वधारण इति गाथार्थः । एषां च प्रत्यध्ययनमर्थाधिकारद्वार एवावकाशः प्रत्येतव्यः ।

**हे०वृ०** आह - नन्वावश्यके किमिति षडध्ययनानि ? अत्रोच्यते, षडर्थाधिकारयोगात् । के पुनस्ते इत्याशङ्क्य तदुपदर्शनार्थमाह - **आवस्सगस्स ण**मित्यादि । **आवश्यकस्य एते** वक्ष्यमाणा **अर्थाधिकारा भवन्ति, तद्यथा - सावज्जजोग** गाहा । व्याख्या - प्रथमे सामायिकलक्षणे अध्ययने प्राणातिपातादिसर्व**सावद्ययोगविरतिरर्था**धिकारः १ । **उक्कित्तण** त्ति द्वितीये चतुर्विंशतिस्तवाध्ययने प्रधानकर्मक्षयकारणात्वाल्लब्धबोधिविशुद्धिहेतुत्वात् पुन-र्बोधिलाभफलत्वात् सावद्ययोगविरत्युपदेशकत्वेनोपकारित्वाच्च तीर्थकराणां गुणोत्कीर्तनाऽर्थाधिकारः । **गुणवओ य पडिवत्ति** त्ति, गुणा मूलोत्तरगुणरूपा व्रतपिण्डविशुद्धयादयो विद्यन्ते यस्य स गुणवाँस्तस्य प्रतिपत्तिर्वन्दनादिका कर्तव्येति तृतीये वन्दनाध्ययनेऽर्थाधिकारः । **च**शब्दात् पुष्टालम्बनेऽगुणवतोऽपि प्रतिपत्तिः कर्तव्येति द्रष्टव्यम् । उक्तं च -

**परियाय परिस पुरिसं खेत्तं कालं च आगमं नाउं ।**
**कारणजाए जाए जहारिहं जस्सं जं जोग्गं ।।१।। [आव०नि० ११२८] त्ति ३ ।**

**खलियस्स निंदण** त्ति स्खलितस्य मूलोत्तरगुणेषु प्रमादाचीर्णस्य प्रत्यागतसंवेगस्य जन्तोर्विशुद्धयमानाध्यवसायस्याऽकार्यमिदमिति भावयतो निन्दा प्रतिक्रमणेऽर्थाधिकारः ४ । **वणतिगिच्छ** त्ति व्रणचिकित्सा कायोत्सर्गाध्ययनेऽर्थाधिकारः । इदमुक्तं भवति - चारित्रपुरुषस्य योऽयमतिचाररूपो भावव्रणस्तस्य दशविधप्रायश्चित्तभेषजेन कायोत्स-

र्गाध्ययने चिकित्सा प्रतिपाद्यते ५ । **गुणधारणा चेव** त्ति गुणधारणा प्रत्याख्यानाध्ययने अर्थाधिकारः । अयमत्र भावार्थः - मूलगुणोत्तरगुणप्रतिपत्तिस्तस्याश्च निरतिचारं सन्धारणं यथा भवति तथा प्रत्याख्यानाध्ययने प्ररूपणा करिष्यते ६ । **च**शब्दादन्येऽप्य-पान्तरालार्थाधिकारा विज्ञेयाः, एवकारोऽवधारण इति गाथार्थः ।

**C आव०नि० ७९८ [चतु० गा० २ वृ०]**

**जो समो सव्वभूएसु तसेसु थावरेसु य ।**
**तस्स सामाइयं होइ, ईई केवलिभासियं।।१२८।।**

**हा०वृ०** **जो समो** गाहा, **यः समः** तुल्यः **सर्वभूतेषु** सर्वजीवेषु, **भूत**शब्दो जीवपर्यायः, त्रस्यन्तीति **त्रसाः** द्वीन्द्रियादयस्तेषु, तिष्ठन्तीति **स्थावराः** पृथिव्यादयस्तेषु च, **तस्य सामायिक**मित्यादि पूर्ववत् । **तस्ये**त्थम्भूतस्य सत्त्वस्य **सामायिकं** भवति । **इति**शब्दः सारप्रदर्शनार्थः, एतावत् **केवलिभाषित**मिति गाथार्थः ।।१२८।।

**हे०वृ०** **जो समो** इत्यादि, **यः समः** सर्वत्र मैत्रीभावात् तुल्यः **सर्वभूतेषु** सर्वजीवेषु **त्रसेषु स्थावरेषु च तस्य सामायिकं भवतीत्ये**तदपि **केवलिभाषितम्,** जीवेषु च समत्वं संयमसान्निध्यप्रतिपादनात् पूर्वश्लोकेऽपि लभ्यते, किन्तु जीवदयामूलत्वाद् धर्मस्य तत्प्राधान्यख्यापनाय पृथगुपादानमिति ।।१२८।।

**D उत्तरा०अध्य० २९, सू. ९ [चतु० गा० ३ वृ०]**

**चउवीसत्थएणं भंते ! जीवे किं जणयइ ? दंसणविसोहिं जणयइ ।।९।।**

सामायिकं च प्रतिपत्तुकामेन तत्प्रणेतारः स्तोतव्याः, ते च तत्त्वतस्तीर्थकृत एवेति तत्सूत्रमाह - **चतुर्विंशतिस्तवेन** एतदवसर्पिणी प्रभवतीर्थकृदुत्कीर्त्तनात्मकेन दर्शनं-सम्यक्त्वं तस्य विशुद्धिः - तदुपघातिकर्मापगमतो निर्मलीभवनं **दर्शनविशुद्धि**स्तां **जनयति** ।।९।।

**E आव०नि० १२१५ [चतु० गाथा० ४ वृ०]**

गतं सप्रसङ्गं दोषविप्रमुक्तद्वारम्, अधुना किमिति क्रियत इति द्वारम्, तत्र वन्दनकरणकारणानि प्रतिपादयन्नाह-

**विणओवयार माणस्स भंजणा पूयणा गुरुजणस्स ।**
**तित्थयराण य आणा सुअधम्माराहणाऽकिरिया।।१२१५।।**

विनय एवोपचारो **विनयोपचारः** कृतो भवति, स एव किमर्थ इत्याह-**मानस्य** अहङ्कारस्य **भञ्जना** विनाशः, तदर्थः, मानेन च भग्नेन **पूजना गुरुजनस्य** कृता भवति, **तीर्थकराणां** चाऽऽ**ज्ञा**ऽनुपालिता भवति, यतो भगवद्भिर्विनयमूल एवोपदिष्टो धर्मः, स च वन्दनादिलक्षण एव विनय इति, तथा **श्रुतधर्माराधना** कृता भवति, यतो वन्दनपूर्वं श्रुतग्रहणम्, '**अकिरिय**'त्ति पारम्पर्येणाक्रिया भवति, यतोऽक्रियः सिद्धः, असावपि पारम्पर्येण वन्दनलक्षणाद् विनयादेव भवतीति, उक्तं च परमर्षिभिः-

तहारूवं णं भंते ! समणं वा माहणं वा वंदमाणस्स
पज्जुवासमाणस्स किंफला वंदणपज्जुवासणया ?,
गोयमा ! सवणफला, सवणे णाणफले, णाणे विण्णाणफले,
विण्णाणे पच्चक्खाणफले, पच्चक्खाणे संजमफले,
संजमे अणण्हयफले, अणण्हए तवफले, तवे वोदाणफले,
वोदाणे अकिरियाफले, अकिरिया सिद्धिगइगमणफला" ।

तथा वाचकमुखेनाप्युक्तम्-

'विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ।।१।।
संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ।।२।।
योगनिरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ।।३।।'

**इति गाथार्थः ।।१२१५।।**

**F आव०नि० १२५० [चतु० गा० ५ वृ०]**

## मिच्छत्तपडिक्कमणं तहेव अस्संजमे पडिक्कमणं ।
## कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं ।।१२५०।।

**आव०हा०वृ०**मिथ्यात्वमोहनीयकर्मपुद्गलसाचिव्यविशेषादात्मपरिणामो **मिथ्यात्वं** तस्य **प्रतिक्रमणं** तत्प्रतिक्रान्तव्यं वर्तते, यदाभोगानाभोगसहसात्कारैर्मिथ्यात्वं गतस्तत्प्रतिक्रान्तव्यमित्यर्थः, **तथैव असंयमे** असंयमविषये **प्रतिक्रमणम्,** असंयमः-प्राणातिपातादिलक्षणः प्रतिक्रान्तव्यो वर्तते, **कषायाणां** प्राग्निरूपितशब्दार्थानां क्रोधादीनां **प्रतिक्रमणम्,**

कषायाः प्रतिक्रान्तव्याः, 'योगानां च' मनोवाक्कायलक्षणानाम् 'अप्रशस्तानाम्' अशोभनानां प्रतिक्रमणम्, ते च प्रतिक्रान्तव्या इति गाथार्थः ।।१२५०।।

**G उत्तरा० २९/११ [चतु० गा० ५ वृ०]**

**पडिक्कमणेणं भंते ! जीवे किं जणयइ ? पडिक्कमणेणं वयछिद्दाइं पिहेइ, पिहिय वयछिद्दे पुण जीवे निरुद्धासवे असबलचरित्ते अट्ठसु पवयणमायासु उवउत्ते अपुहुत्ते सुप्पणिहिए विहरइ ।।११।।**

एतद्गुणस्थितेनापि मध्यमतीर्थकृतां तीर्थेषु स्खलितसम्भवे पूर्वपश्चिमयोस्तु तदभावेऽपि प्रतिक्रमितव्यमिति प्रतिक्रमणमाह - **प्रतिक्रमणेन** अपराधेभ्यः प्रतीपनिवर्त्तनात्मकेन व्रतानां प्राणातिपातनिवृत्त्यादीनां छिद्राणि - अतिचाररूपाणि विवराणि **व्रतच्छिद्राणि पिदधाति** स्थगयति अपनयतीति यावत् । तथाविधश्च कं गुणमवाप्नोतीत्याह- **पिहितव्रतच्छिद्रः पुनर्जीवः निरुद्धाश्रवः** सर्वथा हिंसाद्याश्रवाणां निरुद्धत्वात्, अत एवा**सबलं** सबलस्थानैरकर्बुरीकृतं **चरित्रं** यस्य स तथा, **अष्टसु प्रवचनमातृषु** उक्तरूपासु **उपयुक्तः** अवधानवान् तत एवाविद्यमानं पृथक्त्वं प्रस्तावात्संयमोद्योगेभ्यो वियुक्तस्वरूपं यस्यासौ **अपृथक्त्वः** सदा संयमयोगवान्, (अ) प्रमत्तो वा पाठान्तरात्; तथा **सुप्रणिहितः** सुष्ठु संयमे प्रणिधानवान्, पाठान्तरतो वा सुष्ठु प्रणिहितानि असन्मार्गात् प्रच्याव्य सन्मार्गे व्यवस्थापितानीन्द्रियाण्यनेनेति सुप्रणिहितेन्द्रियः **विहरति** संयमाध्वनि याति ।।११।।

**H आव० नि० १४२४ [चतु० गा० ६ वृ०]**

**अव० एवं** तावद् द्रव्यवणस्तच्चिकित्सा च प्रतिपादिता, अधुना भावव्रणः प्रतिपाद्यते

**मुलुत्तरगुणरूवस्स ताइणो परमचरणपुरिसस्स ।**
**अवराहसल्लपभवो भाववणो होइ नायव्वो ।।**

**आव०हा०कृ०'मुलूत्तरगुणस्वरूवस्स'** गाहा, इयमन्यकर्तृकी सोपयोगा चेति व्याख्यायते, मूलगुणाः-प्राणातिपातादिविरमणलक्षणाः पिण्डविशुद्ध्यादयस्तु उत्तरगुणाः, एते एव रूपं यस्य स मूलगुणोत्तरगुणरूपस्तस्य, **तायिनः, परमश्चासौ चरणपुरुषश्चे**ति समासः तस्य **अपराधाः**-गोचरादिगोचराः त एव **शल्यानि** तेभ्यः **प्रभवः**-सम्भवो यस्य स तथाविधो **भावव्रणो भवति ज्ञातव्य** इति गाथार्थः ।।

I विoआoभाo २३७ [चतु० गा० ६ वृ०]

**जह करगओ निकिंतइ दारूं इंतो पुणो वि वच्चंतो ।**
**इय कंतंति सुविहिया काउस्सग्गेण कम्माइं।।२३७।।**

J आव० नि० १५५१ [चतु० गा० ६ वृ०]

**काउस्सग्गे जह सुट्ठियस्स भज्जंति अंगुमंगाइं ।**
**इय भिंदंति सुविहिया अट्ठविहं कम्मसंघायं ।।१५५१।।**

**आव०हा०वृ० यथा करगतोत्ति** करपत्रं **निकृन्तति**-छिनत्ति विदारयति **दारु**-काष्ठं, किं कुर्वन् ? **आगच्छन् पुनश्च व्रजन्नित्यर्थः, इय** एवं **कृन्तन्ति सुविहिताः**-साधवः **कायोत्सर्गेण** हेतुभूतेन **कर्माणि**-ज्ञानावरणादीनि, तथाऽन्यत्राप्युक्तम्-

"संवरेण भवे गुत्तो, गुत्तीए संजमुत्तमे ।
संजमाओ तवो होइ, तवाओ होइ निज्जरा" ।।१।।

"निज्जराएऽसुभं कम्मं, खिज्जई कमसो सया ।
आवस्सग(गेण) जुत्तस्स, काउस्सग्गो विसेसओ" ।।२।। इत्यादि,

अयं गाथार्थः ।।२३७।। अत्राह-किमिदमित्थमित्यत आह-**काउस्सग्गे** गाहा व्याख्या-**कायोत्सर्गे सुस्थितस्य** सतः **यथा भज्यन्ते अङ्गोपाङ्गानि 'इय'** एवं चित्तनिरोधेन **भिन्दन्ति** विदारयन्ति मुनिवराः-साधवः **अष्टविधं**-अष्टप्रकारं **कर्मसङ्घातं**-ज्ञानावरणीयादिलक्षणमिति गाथार्थः ।।१५५१।।

K आव० नि० १५५४ [चतु० गा० ६ वृ०]

**तम्हा उ निम्ममेणं मुणिणा उवलद्धसुत्तसारेणं ।**
**काउस्सग्गो उग्गो कम्मक्खयट्ठाय कायव्वो।।१५५४।।**

यतश्चैवं **'तम्हा'** गाथा । **तस्मात् तु निर्ममेन**-ममत्वरहितेन **मुनिना** साधुना, किम्भूतेन ? **उपलब्धसूत्रसारेण** विज्ञातसूत्रपरमार्थेनेत्यर्थः, किं ? **कायोत्सर्गः** उक्तस्वरूपः **उग्रः** -शुभाध्यवसायप्रबलः **कर्मक्षयार्थं** न तु स्वर्गादिनिमित्तं **कर्तव्य** इति गथार्थः ।।१५५४।।

L आव० नि० १२१४ [चतु० गा० ७ वृ०]

**आवस्सएसु जह जह कुणइ पयत्तं अहीणमइरित्तं ।**
**तिविहकरणोवउत्तो तह तह से निज्जरा होइ ।।१२१४।।**

**आवश्यकेषु** अवनतादिषु दोषत्यागलक्षणेषु च **यथा २ करोति प्रयत्नम् अहीनातिरिक्तं** न हीनं नाप्यधिकम्, किम्भूतः सन् ? **त्रिविधकरणोपयुक्तः**, मनोवाक्कायै-रुपयुक्त इत्यर्थः, **तथा २ 'से'** तस्य वन्दनकर्तुर्**निर्जरा भवति**-कर्मक्षयो भवति, तस्माच्च निर्वाणप्राप्तिरिति, अतो दोषपरिशुद्धादेव फलावाप्तिरिति गाथार्थः ।।१२१४।।

M आव०म०वृ० ९२१ [चतु० गा० ११ वृ०]

**अरिहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं ।**
**सिद्धिगमणं च अरिहा अरिहंता तेण वुच्चंति।।९२१।।**

'अर्ह पूजायाम्' **अर्हन्ति वन्दननमस्करणे**, तत्र वन्दनं शिरसा, नमस्करणं वाचा, तथा सिद्ध्यन्ति-निष्ठितार्था भवन्त्यस्यां प्राणिन इति **सिद्धिः**-लोकान्तक्षेत्रलक्षणा, वक्ष्यति-'इहं बोंदिं चइत्ताणं तत्थ गंतूण सिज्झइ' **तद्गमनं** च प्रति अर्हन्तीत्यर्हाः-**योग्याः** 'अच' इत्यच, **तेन** कारणेना**र्हन्त उच्यन्ते**, अर्हन्तः ।।९२१।।

N आव०नि० ९४७ [चतु० गा० ११ वृ०]

अथ कर्मक्षयसिद्धमेव प्रपञ्चतो निरुक्तविधिना प्रतिपादयन्नाह-

**दीहकालरयं जं तु कम्मं से सियमट्ठहा ।**
**सियं धंतं ति सिद्धस्स सिद्धत्तमुवजायइ ।।९४७।।**

व्याख्या-दीर्घः संतानापेक्षयाऽनादित्वात् स्थितिबन्धकालो यस्य तद् दीर्घकालम्, निसर्गनिर्मलजीवस्यानुरञ्जनाद् मालिन्यापादनाद् रजः, अथवा, स्नेहेन बन्धनयोग्यं भवतीति साम्याद् रजः, सूक्ष्मत्वसाम्याद् वा रज इति कर्मण एव विशेषणम्, दीर्घकालं च तद् रजश्चेति **दीर्घकालरजः, 'जं तु कम्मं** ति' दीर्घकालरजोरूपं यत् कर्म दीर्घकालस्थितिकं रजोरूपं यत् कर्मेत्यर्थः, एतच्चैवंविधं कर्म, तुशब्दस्य विशेषणार्थत्वादत्र भव्यस्य संबन्धि गृह्यते, नाभव्यस्य, तस्य वक्ष्यमाणध्मातत्वायोगात् । अथवा, भव्यसंबन्धित्वमिह कर्मणो ध्मातत्वसामर्थ्यादेव लभ्यते । यच्छब्दोऽपि साक्षादुपात्ते कर्माणि न तथाविधं

साफल्यमनुभवतिः, अतः 'जंतुकम्मं' इत्येतदन्यथा व्याख्यायते-जन्तुर्जीवस्तस्य कर्म जन्तुकर्म । अनेनाबद्ध-कर्मव्यवच्छेदमाह- बद्धं यत् कर्मेत्यर्थः । कथंभूतं यत् कर्म जन्तुकर्म वा ? इत्याह- **'से सियमट्ठह** त्ति' ज्ञानावरणाद्यष्टप्रकारैः पूर्वं **'से'** तस्य सितं बद्धमित्यर्थः । अथवा, 'से सियं ति' अनाभोगनिर्वर्तितयथाप्रवृत्तकरणेन सम्यग्ज्ञानाद्युपायतश्च क्रमेण शेषितं शेषं कृतं स्थित्यऽनुभवादिभिरल्पीकृतमित्यर्थः । तद् दीर्घकालस्थितिकं रजोरूपं भव्यस्य संबन्धि यत्कर्म जन्तूकर्म वा पूर्वमष्टधा बद्धं तत् क्रमेण शेषितं सत् किम् ? इत्याह-**'सियं धंतं ति** त्ति' सितमित्थं बद्धं ध्मातं तीव्रध्यानानलेन दग्धं क्षपितं महाग्निना लोहमलवदस्येति सिद्ध इति निरुक्तिः । एवं च कर्मदहनानन्तरं **सिद्धस्यैव** सतः **सिद्धत्वमुपजायते** नासिद्धस्य, 'नेरइएसु उववज्जइ' इत्यादिनि**श्चयनयमता**श्रयणादिति । उपजायति इति सदात्मनः स्वाभाविकं सत्सिद्धत्वमनादिकर्मावृतं तदावरणविगमेनाविर्भवत्येव, न पुनरसदुपजायत इति प्रतिपत्तव्यम्, असतः खरविषाणस्येव जन्मायोगादिति । अथवा सिद्धस्य सिद्धत्वं सद्भावरूप-मुपजायते, न तु प्रदीपनिर्वाणकल्पमभावरूपमिति । एवं नयमतान्तरव्यवच्छेदार्थमेतत् । तथा चाहुरेके-

**"दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति नाशम् ।।१।।**
**जीवस्तथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ।।२।।"**

इत्यादि । एवंविधासिद्धाभ्युपगमे दीक्षादिप्रयासवैयर्थ्यात्; निरन्वयक्षणभङ्गस्य चाघटमानत्वादिति । अथवा 'दीहकालरयं ति' एतदन्यथा व्याख्यायते-रयो वेगश्चेष्टाविशेषः, फलम्, अनुभव इत्यनर्थान्तरम् । ततश्च संतानेनानुभूयमानत्वाद् दीर्घकालोऽनुभवो यस्य तद् दीर्घकालरयं यद् भव्यकर्म जन्तुकर्म वा । तथा 'सेसियं ति' एतदप्यन्यथा व्याख्यायते-लेश्याविशेषाश्लेषितं वह्न्ययोगोलकन्यायाज्जीवेन सह संश्लेषमुपगतम् । अष्टधा सितमित्यादि तु तथैव ।। इति निर्युक्तिश्लोक सङ्क्षेपार्थः ।।९४७।।

**O आव०नि० १००४ [चतु० गा० ११ वृ०]**

सम्प्रति भावसाधून् प्रतिपादयति-

**निव्वाणसाहए जोगे, जम्हा साहंति साहुणो ।**
**समा य सव्वभूएसु, तम्हा ते भावसाहुणो ।।१०१०।।**

**निर्वाणसाधकान् योगान्**-सम्यग्दर्शनादिप्रधानान् व्यापारान् **साधयन्ति साधवः**, विहितानुष्ठानपरत्वात्, **समाश्च सर्वभूतेषु**, एतच्च योगप्राधान्यख्यापनार्थमुक्तम्, **तस्मात्** भवन्ति **भावसाधवः** ।।

**P उप० मा० ३ [चतु० गा० १४ वृ०]**

**संवच्छरमुसमजिणो, छम्मासा वद्धमाणजिणचंदो ।**
**इअ विहरीया निरसणा, जइज्ज एओवमाणेणं।।३।।**

व्याख्या-**'संवच्छरेत्ति'** संवत्सरं वर्षं यावद् **ऋषभो जिनः** श्रीप्रथमतीर्थंकरः, **षण्मासान्** यावत् श्री**वर्द्धमानजिनचन्द्रो** वर्द्धमानाभिधानस्तीर्थंकरः, सर्वगुणैः प्रधानत्वाज्जिनचन्द्र इति पदं दत्तम् । **अनया** रीत्या एतौ द्वावपि तीर्थंकरौ **विहरिया** इति विहृतौ पर्यटितौ, **निरशनौ** भोजनरहितौ उपोषिताविति यावत्, शिष्यं प्रत्युपदेशमाह-**जइज्जएत्ति** यतेत तत्र कर्मणि यत्नं कुर्यात्, भगवद्दृष्टान्तेन वीरवदन्येनापि तपः कर्त्तव्यम् ।।३।।

**Q वि०आ०भा० ३२४७ [चतु० गा० १६ वृ०]**

**कुज्जा जिणाइपूया परिणामविसुद्धिहेउओ निच्चं ।**
**दाणादओ य मग्गप्पभावणाओ य कहणं च।।३२४७।।**

**कार्या नित्यं जिनादिपूजे**ति प्रतिज्ञा, स्व**परिणामविशुद्धिहेतुत्वादि**ति हेतुः, **दानादिवदि**ति दृष्टान्तः । अथवा कार्या नित्यमेव जिनादिपूजा, मोक्ष**मार्गप्रभावकत्वात्**, **धर्मकथनवदि**ति ।।३२४७।।

**Q-1 आव० नि० ५७७ [चतु० गा० १९ वृ०]**

**वासोदयस्स व जहा वण्णादी होंति भायणविसेसा ।**
**सव्वेसिंपि सभासा जिणभासा परिणमे एवं ।।५७७।।**

**वर्षोदकस्य वा** वृष्ट्युदकस्य वा, वा शब्दात् अन्यस्य वा, **यथै**करूपस्य सतः **वर्णादयो भवन्ति, भाजनविशेषात्** कृष्णसुरभिमृत्तिकायां स्वच्छं सुगन्धं रसवच्च भवति ऊषरे तु विपरीतम्, **एवं सर्वेषामपि** श्रोतॄणां **स्वभाषया जिनभाषा परिणमत** इति गथार्थः ।।५७७।।

R आव० नि० ५८० [चतु० गा० २० वृ०]

**सव्वाउअंपि सोया खवेज्ज जइ हु सययं जिणो कहए ।**
**सीउण्हखुप्पिवासापरिस्समभए अविगणेंतो।।५७९।।**

व्याख्या-भगवति कथयति सति **सर्वायुष्कमपि श्रोता क्षपयेत्** भगवत्समीपवर्त्येव, **यदि हु सततम्** अनवरतं **जिनः कथयेत्** । किंविशिष्टः सन्नित्याह-**शीतोष्णक्षुत्पिपासापरिश्रमभयान्यविगणयन्नि**ति गाथार्थः ।।५७९।।

S आव० म० वृ० ९२३ [चतु० गा० २२ वृ०]

इदानीममोघताख्यापनार्थमपान्तरालिकं नमस्कारफलमुपदर्शयति-

**अरिहंतनमुक्कारो जीवं मोएइ भवसहस्साओ ।**
**भावेण कीरमाणो होइ पुणो बोहिलाभाए।।९२३।।**

अर्हतां नमस्कारोऽ**र्हन्नमस्कारः,** इह अर्हच्छब्देन बुद्धिस्था अर्हदाकारवती स्थापना गृह्यते, नमस्कारस्तु नमःशब्द एव, **भावेन**-उपयोगेन **क्रियमाणः,** अनेन नामस्थापनाद्रव्यभावलक्षणश्चतुर्विधो यद्यपि नमस्कारस्तथाऽप्यत्र भावनमस्कारो द्रष्टव्य इत्युक्तं वेदितव्यम्, **जीवम्**-आत्मानं **मोचयति**-अपनयति **भवसहस्रेभ्यः,** यद्यपि सहस्रशब्दो दशशतसङ्ख्यायां वर्त्तते तथाऽप्यत्रार्थादनन्तसङ्ख्यायामवगन्तव्यः, अनन्तभवमोचनान्मोक्षं प्रापयतीत्युक्तं द्रष्टव्यम् । आह-न सर्वस्यैव भावतोऽपि नमस्कारकरणे तद्भव एव मोक्षः तत्कथमुच्यते-जीवं मोचयतीत्यादि ? उच्यते, यदि तद्भव एव मोक्षाय न भवति, तथापि भावनाविशेषा**द्भवति पुनर्बोधिलाभाय,** बोधिलाभश्चाचिरादविकलो मोक्षहेतुरित्यतो न दोषः ।।९२३।।

S वि०आ०भा० ३००९

इदानीममोघताख्यापनार्थमपान्तरालिकं नमस्कारफलमुपदर्शयति-

इह नाम-स्थापना-द्रव्य-भावलक्षणनमस्कारश्चतुर्विधो गृहीतः । तत्रार्हच्छब्देन बुद्धिस्था अर्हदाकारवती स्थापना गृह्यते, तस्या नमस्कारः स्थापनानमस्कार इति व्युत्पत्त्या स्थापनानमस्कारः संगृहीतः । **नमोक्कारो त्ति** इत्यनेन नामनमस्कारः । **कीरमाणो** त्ति अञ्जलि-प्रग्रहादिना क्रियमाण इत्यनेन द्रव्यनमस्कारः । **भावेण त्ति** अनेन तु भावनमस्कार इति । तत्रार्हन्नमस्कारः क्रियमाणो **जीवं मोचयति भवसहस्रात्**

प्रस्तावादनन्तभवेभ्य इत्यर्थः । अनन्तभवमोचनाच्च मोक्षं प्रापयतीत्युक्तं भवति । यद्यपि च कांश्चित् तद्भव एव मोक्षं न प्रापयति तथापि भावेनोपयोगविशेषेण क्रियमाणो भावना विशेषत एवान्यस्मिन्नपि जन्मनि **पुनरपि बोधिलाभाय** भवति । बोधिलाभश्च निश्चितोऽचिराद् मोक्षहेतुरिति । एवं बाह्याभ्यन्तरेण नामादिचतुर्विधविधानेन नमस्कारः क्रियमाणो जीवं भवाद् मोचयति, पुनर्बोधिबीजं च जायते ।। इति निर्युक्ति गाथार्थः ।।३००९।।

**T आव०म०वृ० ९७७ [चतु० गा० २४ वृ०]**

साम्प्रतं सिद्धानेव लक्षणतः प्रतिपादयति-

**असरीरा जीवघणा उवउत्ता दंसणे य णाणे य ।**
**सागारमणागारं लक्खणमेयं तु सिद्धाणं ।।९७७।।**

अविद्यमानशरीरा **अशरीराः,** औदारिकादिपञ्चविधशरीररहिता इत्यर्थः, जीवाश्च ते घनाश्च शुषिरापूरणात् **जीवघनाः, उपयुक्ता दर्शने** च-केवलदर्शने **ज्ञाने च**-केवलज्ञाने । इह सामान्यसिद्धलक्षणमेतदितिज्ञापनार्थं सामान्यालम्बनदर्शनाभिधानमादावुक्तम्, तथा च सामान्यविषयं दर्शनं विशेषविषयं ज्ञानम्, तत् **साकारानाकारं**-सामान्यविशेषरूपं **लक्षणं**तदन्यव्यावृत्तं स्वस्वरूपम् **एतद**नन्तरोक्तम्, **तु**शब्दो निरुपमसुखसञ्चयार्थः, **सिद्धानां**निष्ठितार्थानामिति ।।९७७।।

**U आव०नि० ९७८ [चतु० गा० २४ वृ०]**

**केवलनाणुवउत्ता जाणंती सव्वभावगुणभावे ।**
**पासंति सव्वओ खलु केवलदिट्ठीहिंऽणंताहिं।।९७८।।**

केवलज्ञानेनोपयुक्ताः **केवलज्ञानोपयुक्ताः** न त्वन्तःकरणेन, तदभावादिति, किम् ? **जानन्ति** अवगच्छन्ति **सर्वभावगुणभावान्** सर्वपदार्थगुणपर्यायानित्यर्थः, प्रथमो भावशब्दः पदार्थवचनः द्वितीयः पर्यायवचन इति, गुणपर्यायभेदस्त्वयं सहवर्त्तिनो गुणाः क्रमवर्तिनः पर्याया इति, तथा **पश्यन्ति सर्वतः खलु** खलुशब्दस्यावधारणार्थत्वात् सर्वत्त एव, **केवलदृष्टिभिरनन्ताभिः** केवलदर्शनैरनन्तैरित्यर्थः, अनन्तत्वात् सिद्धानामिति, इह चाऽऽदौ ज्ञानग्रहणं प्रथमतया तदुपयोगस्थाः सिद्ध्यन्तीति ज्ञापनार्थमिति गाथार्थः ।।९७८।।

**V आव०म०वृ० ९६५ [चतु० गा० २५ वृ०]**

तथा चाह-

**ईसीपब्माराए उवरिं खलु जोअणस्स जो कोसो ।**
**कोसस्स य छब्भाए सिद्धाणोगाहणा भणिआ।।९६५।।**

**ईषत्प्राग्भारायाः** पृथिव्या **उपरि** यत् **खलु** योजनं तस्य **योजनस्य** उपरितनः **क्रोशो**-गव्यूतं तस्य **क्रोशस्यो**परितने भागे **सिद्धानामवगाहना** तीर्थकरगणधरै**र्भणिता**, 'लोकाग्रे च प्रतिष्ठिता' इति वचनात् ।।९६५।।

**W आव०म०वृ० ९८८ [चतु० गा० २५ वृ०]**

साम्प्रतमुपसंहरति-

**निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का ।**
**अव्वाबाहं सोक्खं अणुहवंती सया कालं।।९८८।।**

निस्तीर्णमतिक्रान्तं सर्वमशेषं दुःखं यैस्ते **निस्तीर्णसर्वदुःखाः**, **जातिः**-जन्म, **जरा**-वयोहानिः, **मरणं**-प्राणत्यागः **बन्धनं**-संसारबन्धहेतुरष्टप्रकारं कर्म्म तै**र्विमुक्ताः**, **अव्याबाधं**व्याबाधारहितं **सौख्यं सदाकालमनुभवन्ति** ।।९८८।।

**X आव०नि० ९८६ [चतु० गा० २६ वृ०]**

**इय सव्वकालतित्ता, अउलं निव्वाणमुवगया सिद्धा ।**
**सासयमव्वाबाहं, चिट्ठंति सुही सुहं पत्ता ।।९८६।।**

**'इअ'** एवं **सर्वकालतृप्ताः** स्वस्वभावावस्थितत्वात्, **अतुलं निर्वाणमुपगताः सिद्धाः**, सर्वदा सकलौत्सुक्यविनिवृत्तेः, यतश्चैवमतः **शाश्वतं** सर्वकालभावि **अव्याबाधं** व्याबाधापरिवर्जितं **सुखं प्राप्ताः सुखिनः** सन्तः **तिष्ठन्तीति** योगः । सुखं प्राप्ता इत्युक्ते सुखिन इत्यनर्थकम्, न, दुःखाभावमात्रमुक्तिसुखनिरासेन वास्तवसुखप्रतिपादनार्थत्वादस्य, तथाहि-

अशेषदोषक्षयतः शाश्वतमव्याबाधं सुखं प्राप्ताः सुखिनः सन्तस्तिष्ठन्ति न तु दुःखाभावमात्रान्विता एवेति गाथार्थः ।।९८६।।

Y आव०नि०घ्या०श० १०१ [चतु० गा० २७ वृ०]

**जह चिरसंचिमर्मिधणमनलो पवणसहिओ दुयं दहइ ।**
**तह कर्म्मेधणममियं खणेण झाणाणलो डहइ ।।१०१।।**

व्याख्या-**यथा चिरसञ्चितं** प्रभूतकालसञ्चितम् **इन्धनं** काष्ठादि **अनलः** अग्निः **पवनसहितः** वायुसमन्वितः **द्रुतं** शीघ्रं च **दहति** भस्मीकरोति, **तथा** दुःखतापहेतुत्वात् कर्मैवेन्धनं **कर्मेन्धनम् अमितम्** अनेकभवोपात्तमनन्तं **क्षणेन** समयेन ध्यानमनल इव **ध्यानानलः** असौ दहति भस्मीकरोतीति गाथार्थः ।।१०१।।

Z वि०आ०मा० ३४५ [चतु० गा० २८ वृ०]

**लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धम्मि ।**
**उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ।।३४५।।**
**नयणिंदियस्स तम्हा विसयपमाणं जहा सुए भिहियं ।**
**आ उस्सेहपमाणंगुलाण एक्केण वि ण जुत्तं ।।३४६।।**

ननु **पुष्करवरद्वीपस्य** मानुषोत्तरपर्वतद्विधाकृतस्याऽर्वाग्भागवर्तिन्यर्धे मानुषोत्तर-संनिधा**वुत्कृष्टे दिवसे** कर्कटकसंक्रान्त्या**मुदये,** उपलक्षणत्वादस्तमयसमये च **नरा** मनुष्याः **सूर**मादित्यं **पश्यन्ति**-अवलोकयन्ति । कियद्दूरं व्यवस्थितम् ?, इत्याह-**सातिरेकैरेकविंशतिलक्षै**र्योजनानाम् । एतदुक्तं भवति-

**"सीयालीससहस्सा दो य सया जोयणाणं ते बद्धा ।**
**एगवीससट्ठिभागा कक्कडमाइम्मि पेच्छ नरा" ।।१।।**

इतिवचनाद् यथाऽत्र कर्कसंक्रान्तावुत्कृष्टे दिवसे एतावति दूरे व्यवस्थितं सूर्यं मनुष्याः पश्यन्ति, तथा पुष्करार्धेऽपि मानुषोत्तरसमीपे प्रमाणाङ्गुलनिष्पन्नैः सातिरेकैरेकविंशति-योजनलक्षैर्व्यवस्थितमादित्यं तत्र दिने तन्निवासिनो लोकाः समवलोकयन्ति । तत्र भ्रमितिबाहुल्यात्, सूर्याणां च शीघ्रतरगतित्वात्; उक्तं च-

**"एगवीसं खलु लक्खा चउतीसं चेव तह सहस्साइं ।**
**तह पंच सया भणिया सत्तत्तीयाए अइरित्ता ।।१।।**
**इति नयणविसयमाणं पुक्खरदीवद्धवासिमणुआणं ।**
**पुव्वेण य अवरेण य पिहं होइ नायव्वं" ।।२।।**

इत्यादि । **तस्माद् नयनेन्द्रियस्य** सातिरेकयोजनलक्षस्वरूपं **विषयपरिमाणं यथा श्रुते** प्रज्ञापनादिकेऽ**भिहितम्,** तथा तेन प्रकारेणाऽऽत्माङ्गु**लोत्सेधाङ्गुलप्रमाणाङ्गुलानामेकेनापि** गृह्यमाणं **न युक्तम्,** प्रमाणाङ्गुलनिष्पन्नस्यापि योजनलक्षस्य तन्निष्पन्नसातिरेकैकविंशतियोजनलक्षेभ्य एकविंशतितमभागवर्तित्वेन बृहदन्तरत्वात् । तस्मादेकत्र सातिरेकं लक्षम्, अन्यत्र तु सातिरेकैकविंशतिलक्षाणि योजनानां नयनस्य विषयप्रमाणं ब्रुवतः श्रुतस्य पूर्वापरविरोधः । इति परस्याऽऽकूतम् ।। इतिगाथाद्वयार्थः।।३४५।।३४६।।

**1 प्रशम० प्र० ७२ [चतु० गा० ३० वृ०]**

सम्प्रति विनयस्य पारम्पर्येण पर्यन्तवर्ति मोक्षाख्यं फलं दर्शयन्नाह-

**विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः।।९२३।।**

**विनयस्य फलं शुश्रूषा** श्रोतुमिच्छा यदाचार्य उपदिशति तत् सम्यक् शुश्रूषते श्रुत्वा चानुतिष्ठति । गुरोः सकाशादाकर्ण्य किं फलमिहावाप्यतेऽत आह-**गुरुशुश्रूषायाः फलं श्रुतज्ञान**मागमज्ञानलाभ इत्यर्थः । **ज्ञानस्य** किं **फलं** ? **विरति**राश्रवद्वारेभ्यो निवृत्तिः । **विरतेः फलमाश्रवद्वारस्थगनम्** । विरतौ सत्यामाश्रवद्वाराणि स्थगितानि भवन्ति । ततश्चाश्रवद्वारस्थगनात् संवरो जायते फलभूतः संवरात्मा भवति अपूर्वकर्मप्रवेशनिरोधः।।७२।।

**2 प्रशम०प्र० ७३ [चतु० गा० ३० वृ०]**

**संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् ।**
**तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम्।।७३।।**

संवरस्य फलं तपोऽनुष्ठानं प्राक्तनकर्मक्षपणार्थम् । तपसि बलं **तपोबलं** तपसि कर्तव्ये शक्तिविशेषः । **तपसस्तु निर्जराफलं** कर्मपरिशाटनम् । **तस्मात्** कर्मापगमात् **क्रिया निवर्तते** सैव फलं निर्जरायाः । **क्रियानिवृत्ते**र्निरूद्धयोगः स्यात् **अयोगित्वात्** ।।७३।।

**3 प्रशम०प्र० ७४ [चतु० गा० ३० वृ०]**

**योग निरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।**
**तस्मात्कल्याणानां सर्वेषां भाजनं विनयः।।९२३।।**

**योगनिरोधस्य** फलं जन्मजरामरणप्रबन्धलक्षणाया नरकादि**भवसन्ततेः**रात्यन्तिकः क्षयः । जन्मादि**सन्ततिक्षयाच्च मोक्षा**वाप्तिः । ऐकान्तिकात्यन्तिकादिगुणयुक्तं स्वात्मन्यवस्थानं मोक्षः । **तस्मात्पारंपर्यद्वारेण सर्वकल्याणानां भाजनमाश्रयो विनयः** सर्वगुणरूपो (सर्व-कल्याणरूपो) मोक्षः । अथवा गुरुशुश्रूषादि कल्याणं यावदयोगित्वं भवसन्ततिक्षयश्च । सर्वाण्येतानि कल्याणानि । एषां फलं मोक्ष इति ।।७४।।

**4 प्रशम०प्र० ७४ [चतु० गा० ३१ वृ०]**

**आराहणोवउत्तो कालं काऊण सुविहिओ सम्मं ।**
**उक्कोसं तिन्नि भवे गंतूणं लहइ निव्वाणं।।६२।।**
**आराधनोपयुक्तः कालं कृत्वा सुविहितः सम्यक् ।**
**उत्कृष्टतस्त्रीन् भवान् गत्वा लभते निर्वाणम् ।।६२।।**

आराधकस्य किं फलं 'आरा'० **आराधनया** उत्तमार्थप्रतिपत्त्या **उपयुक्तः** उद्यतः **कालं कृत्वा सुविहितः** सुसाधुः **सम्यक् उत्कृष्टतो**ऽतिशयेन सम्यगाराधनां कृत्वा **त्रीन् भवान् गत्वा लभते निर्वाणं** मोक्षमित्यर्थः । एतदुक्तं भवति । यदि परमसमाधानेन कालं करोति सम्यक् । ततस्तृतीये भवे अवश्यं सिध्यति।।६२।।

अ० अथ आराधकस्य किं फलमित्याह - आराहणा० आराधनया उत्तमार्थप्रति-पत्त्याऽऽराधनायां वोपयुक्त उद्यतः सावधान इत्यर्थः कालं मरणं कृत्वा सुविहितः सुसाधुः सम्यग् शुद्धभावेनोत्कृष्टत उत्कृष्टाराधनाबलात् त्रीन् भवान् गत्वा लभते निर्वाणं मोक्षमित्यर्थः, यदि परमसमाधिना कालं मरणं करोति ततस्तृतीये भवेऽश्यं सिध्यतीति भावः । अत्राह शिष्यः-ग्रन्थान्तरे उत्कृष्टतो निरन्तरमष्टभवाराधनया जघन्यतस्त्वेकभवा-राधनयाऽपि सिध्यतीत्युक्तम् । अत्र तु तृतीयभवे सिध्यतीति तदेतन्नाप्युत्कृष्टं नापि जघन्यं ततश्च कथं न विरोधः ? उच्यते । यावदेकैनेव भवेन सिध्यतीत्युक्तं तद् वज्र-ऋषभनाराचसंहननमाश्रित्य एतच्च सेवार्त्तसंहननमङ्गीकृत्योच्यते सेवार्त्तसंहननो हि यद्युत्कृष्टाराधनां करोति ततस्तृतीये भवे सिध्यतीति उत्कृष्टशब्दश्चात्रातिशयार्थः, आराधनाविशेषणं च द्रष्टव्यः न तु भवानङ्गीकृत्य, भवाङ्गीकारे पुनरुकृष्टतोऽष्टभिरेव भवैः सेवार्त्तसंहननः सिध्यतीति न विरोधः ।।६२।।

5 आव०नि० १०९१ [चतु० गा० ३२ वृ०]

**कसिणं केवलकप्पं लोगं जाणंति तह य पासंति ।**
**केवलचरित्तनाणी तम्हा ते केवली हुंति।।१०९१।।**

**कृत्स्नं** सम्पूर्णं **केवलकल्पं** केवलोपमं, इह कल्पशब्द औपम्ये गृह्यते, उक्तं च-

**"सामर्थ्ये वर्णनायां च, छेदने करणे तथा ।**
**औपम्ये चाधिवासे च, कल्पशब्दं विदुर्बुधाः ।।१।।"**

**लोकं** पञ्चास्तिकायात्मकं **जानन्ति** विशेषरूपतया, **तथैव** सम्पूर्णमेव, चशब्दास्यावधारणार्थत्वात्, **पश्यन्ति** सामान्यरूपतया, इह ज्ञानदर्शनयोः सम्पूर्णलोकविषयत्वे बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थविस्तरभयात्, केवलं

**'निर्विशेषं विशेषाणां, ग्रहो दर्शनमुच्यते ।**
**विशिष्टग्रहणं ज्ञानमेवं सर्वत्रगं द्वयम् ।।१।।'**

इत्यनया दिशा स्वयमेवास्यूह्यं, धर्म्मसङ्ग्रहणी-टीका च परिभावनीया, यतश्चैवं **केवलचारित्रिणः केवलज्ञानिनश्च तस्मात्ते केवलिनो भवन्ति,** केवलमेषां विद्यते इति केवलिनः इति व्युत्पत्तेः, अहोऽत्राकाण्ड एव केवलचारित्रिण इति किमर्थमुक्तं ?, उच्यते, केवलचारित्रप्राप्तिपूर्विका नियमतः केवलज्ञानावाप्तिरिति न्यायदर्शनार्थमित्यदोषः ।

6 वि०आ०भा० ६८९ [चतु० गा० ३२ वृ०]

अथ विनेयानुग्रहार्थं प्रासङ्गिकं किञ्चिदभिधित्सुर्वक्ष्यमाणं च सम्बन्धयितुमाह-

**परमोहिन्नाणविओ केवलमंतोमुहुत्तमित्तेण ।**
**मणुयक्खओवसमिओ भणिओ, तिरियाण वोच्छामि।।६८९।।**

परमावधिज्ञानेन वेत्तीति परमावधिज्ञानवित् तस्य **परमावधिज्ञानविदः** परमावधौ समुत्पन्ने सति किला**न्तर्मुहूर्तेना**वश्यमेव **केवलज्ञानमु**त्पद्यते । केवलज्ञानसूर्यस्य ह्युदयपदवीमासादयतः प्रथमप्रभास्फोटकल्पं परमावधिज्ञानम्, अतस्तदनन्तरमवश्यं भवत्येव केवलज्ञानभास्करोदय इति । तदेवं **भणितो मनुष्यसम्बन्धी क्षायोपशमिको**ऽवधिः । इदानीं **तिरश्चाममुं वक्ष्यामि** ।। इति गाथाचतुष्टयार्थः ।।६८९।।

**7 वि०आ०भा० १२७४ [चतु० गा० ३३ वृ०]**

ननु परिहारिकास्तावदिदमुक्तस्वरूपं तपः कुर्वन्ति, अनुपरिहारिक-कल्पस्थितानां तु का वार्ता ? इत्याह-

**सेसा उ निययभत्ता पायं भत्तं च ताणमायामं ।**
**होइ नवण्हं वि नियमा न कप्पए सेसयं सव्वं ।।१२७४ ।।**

**शेषाः** पुनरनुपरिहारिक-कल्पस्थिताः पञ्चापि **प्रायो नियतभक्ता** नित्यभोजिनो भवन्ति । प्रायोग्रहणाद् निजेच्छया कदाचिदुपवासमपि कुर्वन्ति । **भक्तं** च **तेषां** सर्वदैवाऽनु-परिहारिककल्पस्थितानां पारणके परिहारिकाणां च सर्वेषा**माचाम्लमे**व **भवति** । **शेषं** तु विकृतिलेपकृदादिकं वस्तु **सर्वं नवानामपि नियमाद् न कल्पत** इति ।।१२७४ ।।

**8 वि०आ०भा० ७९९-८०० [चतु० गा० ३४ वृ०]**

अत एवाह भाष्यकारः-

**खीर-महु-सप्पिसाओवमाउवयणा तयासवा होंति ।**
**कोट्ठयधन्नसुनिग्गलसुत्तत्था कोट्ठबुद्धीया ।।७९९ ।।**
**जो सुत्तपएण बहुं सुयमणुधावइ पयाणुसारी सो ।**
**जो अत्थपएणत्थं अणुसरइ स बीयबुद्धी उ ।।८०० ।।**

चीर्णग्रन्थिपर्णकादिवनस्पतिविशेषस्य चक्रवर्तिसम्बन्धिनो गोलक्षस्याऽर्धार्धक्रमेण पीतगो-क्षीरस्य पर्यन्ते यावदेकस्या गोः सम्बन्धि यत् क्षीरं तदिह गृह्यते । मध्वपि किमप्यति-शायिशर्करादिमधुरद्रव्यम् । एवं सर्पिरपि किमप्यतिशायि द्रष्टव्यम् । एवंभूत**क्षीर-मधुसर्पिषां** य **आस्वाद**स्तदुपमा**प्यायकवचना** ये तीर्थकरगणधरादयस्ते **तदाश्रवा** मन्तव्याः, क्षीर-मधु-सर्पिराश्रवा इत्यर्थः, वचनेन यथोक्तक्षीरादीनिव ते स्रवन्तः सकलजनं सुखयन्ति । मकारस्य दीर्घत्वम्, उकारश्चाऽलाक्षणिकः । तथा, कोष्ठकधान्यवत् सुनिर्गलौ-अविस्मृतत्वाच्चिरस्थायिनौ सूत्रार्थौ येषां ते **कोष्ठकधान्यसुनिर्गलसूत्रार्थाः कोष्ठबुद्धयः** । **यस्त्व**ध्यापकादेकेनापि **सूत्रपदेना**ऽधीतेन बह्वपि सूत्रं स्वप्रज्ञयाऽभ्यूह्य गृह्णाति स पदानुसारिलब्धिः । "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" इत्यादिवदर्थप्रधानं पद**मर्थपदं** तेनैकेनापि बीजभूतेनाऽधिगतेन **यो**ऽन्यं प्रभूतमप्यर्थ**मनुसरति स बीजबुद्धि**रिति ।।७९९ ।।८०० ।।

9 दश०नि० २५९ [चतु० गा० ३९ वृ०]

साम्प्रतं काममाह-

**कामो चउवीसविहो संपत्तो खलु तहा असंपत्तो ।**
**संपत्तो चउदसहा दसहा पुण होअसंपत्तो।।२५९।।**

**कामश्चतुर्विंशतिविधः** ओघतः, **संप्राप्तः खलु तथा असंप्राप्तो** वक्ष्यमाणस्वरूपः, **संप्राप्तः चतुर्दशधा**-चतुर्दशप्रकारः, **दशधा पुनर्भवत्यसंप्राप्त** इति गाथासमासार्थः ।।२५९।।

व्यासार्थं त्वाह, तत्राप्यल्पतरवक्तव्यत्वादसंप्राप्तमाह-

10 दश०नि० २६० [चतु० गा० ३९ वृ०]

**तत्थ असंपत्तो अत्थो १ चिंता २ तह सद्ध ३ संसरणमेव ४ ।**
**विक्कवय ५ लज्जनासो ६ पमाय ७ उम्माय ८ तब्भावो ९।।२६०।।**

**तत्रासंप्राप्तो**ऽयं कामः, **अर्थे**ति अर्थनमर्थः, अदृष्टेऽपि विलयादौ, श्रुत्वा तदभिप्रायमात्रमित्यर्थः, तत्रैवाहो रूपादिगुणा इत्यभिनिवेशेन चिन्तनं **चिन्ता, तथा श्रद्धा**-तत्सङ्गमाभिलाषः, **संस्मरणमेव**-संकल्पिकतद्रूपस्यालेखादिदर्शनम्, वियोगतः पुनः पुनरति**विक्लवता**-तच्छोकातिरेकेणाहारादिष्वपि निरपेक्षता, **लज्जानाशो**-गुर्वादिसमक्षमपि तद्गुणोत्कीर्तनम्, **प्रमादः**--तदर्थमेव सर्वारम्भेष्वपि प्रवर्तनम्, **उन्मादो**-नष्टचित्ततया आलजालभाषणम्, **तद्भावना**-स्तम्भादीनामपि तद्बुद्ध्याऽऽलिङ्गनादिचेष्टेति गाथार्थः ।। २६० ।।

11 दश०नि० २६१ [चतु० गा० ३९ वृ०]

**मरणं १० च होइ दसमो संपत्तं पिअ समासओ वोच्छं ।**
**दिट्ठीए संपाओ १ दिट्ठीसेवा य संभासो २।।२६१।।**

**मरणं च**-शोकाद्यतिरेकेण क्रमेण **भवति दशमः** असंप्राप्तकामभेदः । **सम्प्राप्तमपि च** कामं **समासतो वक्ष्य** इति, तत्र **दृष्टेः** पुनः **सम्पातः** स्त्रीणां कुचाद्यवलोकनं **दृष्टिसेवा च**-भावसारं तद्दृष्टेर्दृष्टिमेलनम्, **संभाषणम्**-उचितकाले स्मरकथाभिर्जल्प इति गाथार्थः ।।२६१।।

12 दशा०नि० २६२ [चतु० गा० ३९ वृ०]

**हसिअ ३ ललिअ ४ उवगूहिअ ५ दंत ६ नहनिवाय ७ चुंबणं ८ होइ ।**
**आलिंगण ९ मायाणं १० कर ११ सेवण १२ संग १३ किड्डा १४ अ ।।२६२।।**

**हसितं**-वक्रोक्तिगर्भं प्रतीतं **ललितं**-पाशकादिक्रीडा **उपगूहितं**-परिष्वक्तं **दन्तनिपातो**-दशनच्छेद्यविधिः **नखनिपातो**-नखरदनजातिः **चुम्बनं** चैवेति-चुम्बनविकल्पः **आलिङ्गनम्**-ईषत्स्पर्शनम् **आदानं** कुचादिग्रहणं **'करसेवणं'**ति प्राकृतशैल्या **करणासेवने,** तत्र करणं नाम-नागरकादिप्रारम्भयन्त्रम् आसेवनं-मैथुनक्रिया अनङ्ग**क्रीडा** च-अस्यादावर्थक्रियेति गाथार्थः ।

13 वि०आ०भा० ११९४ [चतु० गा० ४२ वृ०]

**अंतिमकोडाकोडीए सव्वकम्माणमाउवज्जाणं ।**
**पलियासंखिज्जइमे भागे खीणे भवइ गंठी।।११९४।।**

यदा किल क्षप्यमाणाना**मायुर्वर्जसप्तकर्मणां** स्थितेरन्त्या सागरोपम**कोटाकोटी** अवतिष्ठते, तदा तन्मध्यादपि **पल्योपमासङ्ख्येयभागे क्षपिते ग्रन्थिराविर्भवति** ।।११९४।।

14 वि०आ०भा०१२१८ [चतु० गा० ४२ वृ०]

केन पुनः कारणेन मदनकोद्रवस्थानीयं मिथ्यात्वं शोधयति ?, इत्याह-

**अपुव्वेण तिपुंजं मिच्छत्तं कुणइ कोद्दवोवमया ।**
**अनियट्टीकरणेण उ सो सम्मद्दंसणं लहइ।।१२१८।।**

इह यथा कस्यचिद् गोमयादिप्रयोगेण शोधयतस्त्रिधा कोद्रवा भवन्ति; तद्यथा-शुद्धाः, अर्धविशुद्धाः, अविशुद्धाश्चेति; तथा**ऽपूर्वकरणेन मिथ्यात्वं** शोधयित्वा जीवाः शुद्धादिभेदेन **त्रिभिः पुञ्जै**र्व्यवस्थापयन्ति । तत्र सम्यक्त्वावारककर्मरसं क्षपयित्वा विशोधिता ये मिथ्यात्वपुद्गलास्तेषां पुञ्जः सम्यग् जिनवचनरुचेरनावारकत्वादुपचारतः सम्यक्त्वमुच्यते । अर्धशुद्धपुद्गलपुञ्जस्तु सम्यग्मिथ्यात्वम् । अविशुद्धपुद्गलपुञ्जः पुनर्मिथ्यात्वमिति । तदेवं पुञ्जत्रये सत्यप्यनिवर्तिकरणविशेषात् सम्यक्त्वपुञ्जमेव गच्छति जीवः, नेतरौ द्वौ । यदापि प्रतिपतितसम्यक्त्वः पुनरपि **सम्यक्त्वं लभते,** तदाऽप्यपूर्वकरणेन पुञ्जत्रयं कृत्वा**ऽनिवर्तिकरणेन** तल्लाभादेष एव क्रमो द्रष्टव्यः ।

ननु तदाऽपूर्वकरणस्य पूर्वलब्धस्यैव लाभात् कथमपूर्वता ? इति चेत् । सत्यम्, किन्तु 'अपूर्वमिवाऽपूर्वं स्तोकवारमेव लाभात्' इति वृद्धाः, सैद्धान्तिकमतं च सर्वमप्येतत्, कार्मग्रन्थिकमतेन तु- 'मिथ्यात्वस्यान्तरकरणं करोति, तत्प्रविष्टश्चौपशमिकं सम्यक्त्वं लभते, तेन च मिथ्यात्वस्य पुञ्जत्रयं करोति, ततः क्षायोपशमिकपुञ्जोदयात् क्षायोपशमिकसम्यक्त्वं लभते' इत्यलं विस्तरेणेति ।।१२१८।।

**15 वि०आ०भा० १२२२ [चतु० गा० ४२ वृ०]**

ननूक्तं इत्थं सम्यक्त्वलाभः, अथ देशविरत्यादिलाभः कथम् ? इत्याह-

**सम्मत्तम्मि उ लद्धे पलियपुहत्तेण सावओ होज्जा ।**
**चरणो-वसम-खयाणं सागर संखंतरा होंति।।१२२२।।**

यावत्यां कर्मस्थितौ **सम्यक्त्वं लब्धं** तन्मध्यात् **पल्योपमपृथक्त्व**लक्षणस्थितिखण्डे क्षपिते **श्रावको** देशविरतो **भवेत्** । ततोऽपि सङ्ख्यातेषु सागरोपमेषु क्षपितेषु चारित्रमवाप्नोति । ततोऽपि **सङ्ख्यातेषु सागरोपमेषु** क्षपिते**षूपशमश्रेणीं** प्रतिपद्यते, ततोऽपि **सङ्ख्यातेषु सागरोपमेषु** क्षपितेषु **क्षपकश्रेणि**र्भवतीति ।।१२२२।।

**16 वि०आ०भा० १२२३**

कियत्सु भवेष्वेवं देशविरत्यादिलाभो भवति ? इत्याह-

**एवं अपरिवडिए सम्मत्ते देव-मणुयजम्मेसु ।**
**अण्णयरसेढिवज्जं एगभवेणं व सव्वाइं।।१२२३।।**

**एवमप्रतिपतितसम्यक्त्वस्य देव-मनुष्यजन्मसु** संसरणं कुर्वतोऽन्योन्यमनुष्यभवे देशविरत्यादिलाभो भवति । यदिवा तीव्रशुभपरिणामवशात् क्षपितबहुकर्मस्थितेरेकस्मिन्नपि भवे**ऽन्यतरश्रेणिवर्जा**ण्येतानि **सर्वाण्यपि** भवन्ति । श्रेणिद्वयं त्वे**कस्मिन् भवे** सैद्धान्तिकाभिप्रायेण न भवत्येव, किन्त्वेकैवोपशमश्रेणिः, क्षपकश्रेणिर्वा भवतीति ।। तदेवमभिहितं क्रमद्वारम् ।।१२२३।।

17 वि०आ०भा० २७०८ [चतु० गा० ४५ वृ०]

साम्प्रतं कालद्वारमभिधित्सुराह-

**सम्मत्तस्स सुयस्स य पडिवत्ती छव्विहे वि कालम्मि ।**
**विरइं विरयाविरइं पडिवज्जइ दोसु तिसु वावि।।२७०८।।**

**सम्यक्त्वस्य श्रुतस्य च** द्वयोरप्यनयोः सामायिकयोः **प्रतिपत्तिः षड्विधेऽपि** सुषमदुःषमादिके **काले** सम्भवति । पूर्वप्रतिपन्नकास्त्वनयोर्विद्यन्त एव । **विरतिं** समग्रचारित्रलक्षणां ताम्, तथा, **विरताविरतिं** देशचारित्रात्मिकां **प्रतिपद्यते** कश्चिदुत्सर्पिण्यां **द्वयोः** कालयोः दुःषमसुषमायाम्, सुषमदुःषमयां चेति; अवसर्पिण्यां तु **त्रिषु** कालेषु सुषमदुःषमायाम्, दुःषमसुषमायाम्, दुःषमायां चेति । पूर्वप्रतिपन्नस्त्विह विद्यत एव । अपिशब्दात् संहरणं प्रतीत्य पूर्वप्रतिपन्नकः सर्वकालेष्वेव सम्भवति । प्रतिभागकालेषु तु त्रिषु सम्यक्त्वश्रुतयोः प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येव, चतुर्थे च प्रतिभागे चतुर्विधस्यापि सामायिकस्य प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्तु विद्यत एव । बाह्यद्वीपसमुद्रेषु तु कालरहितेषु त्रयाणां सामायिकानां प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येव, चरणस्यापि नन्दीश्वरादौ विद्याचारणादिगमने पूर्वप्रतिपन्नः सम्भवति ।। इति निर्युक्तिगाथार्थः ।।२७०८।।

18 उत्तरा०९/५३ [चतु० गा० ४६ वृ०]

**सल्लं कामा विसं कामा, कामा आसीविसोपमा ।**
**कामे पत्थेमाणा, अकामा जंति दुग्गइं ।।५३।।**

शलति-देहान्तश्चलतीति **शल्यं**-शरीरान्तःप्रविष्टं तोमरादि शल्यमिव शल्यम्, के ते ? काम्यमानत्वात् **कामाः**-मनोज्ञशब्दादयः, यथा हि शल्यमन्तश्चलद्विविधबाधाविधायि तथैतेऽपि, तत्त्वत एषामपि सदा बाधाविधायित्वात्, तथा वेवेष्टि-व्याप्नोतीति **विषं**-तालपुटादि, विषमिव विषं **कामाः**, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दर-मिवाऽऽभाति, अथ च परिणतावतिदारुणमेवमेतेऽपि कामाः, तथा **कामाः** आस्यो-दंष्ट्रा स्तासु विषमस्येत्**याशीविषस्तदुपमाः**, यथा ह्ययमज्ञैरवलोक्यमानः स्फुरन्मणिफणाभूषित इति शोभन इव विभाव्यते, स्पर्शनादिभिरनुभूयमानश्च विनाशायैव भवति तथैतेऽपि **कामाः**, किं च-**कामान् प्रार्थयमाना** अभिलषन्तोऽपिशब्दस्य लुप्तनिर्दिष्टत्वात् प्रार्थयमाना अपि **अकामा** इष्यमाणकामाभावात् **यान्ति** गच्छन्ति **दुर्गतिं** दुष्टां नरकादिगतिम्,

तदनेन न केवलं शल्यादिवदनुभूयमाना एवामी दोषकारिणः, किन्तु प्रार्थ्यमाना अपीत्युक्तं भवति । तथा च-'यः सद्विवेको नासौ प्राप्तमप्राप्तकाङ्क्षया' इत्यादौ सद्विवेकत्वमनैकान्तिको हेतुः, न ह्ययमेकान्तः यथा प्राप्तमप्राप्तार्थे न परिहियते, प्राप्तस्याप्यपायहेतोः तदुच्छेदकाप्राप्यर्थं विवेकिभिः परिह्रियमाणत्वाद्, अनभ्युपगतो-पालम्भश्चायम्, मुमुक्षूणां क्वचिदाकाङ्क्षाया एवासम्भवात्, उक्तं हि- 'मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः' इति सूत्रार्थः ।।१०१।।

**19 दश०वै०सू० १ [चतु० गा० ४८ वृ०]**

**धम्मो मंगलमुक्किट्ठं, अहिंसा संजमो तवो ।**
**देवावि तं नमंसंति, जस्स धम्मे सया मणो ।।१।।**

तत्रास्खलितपदोच्चारणं संहिता, सा पाठसिद्धैव । अधुना पदानि-**धर्मः मङ्गलम् उत्कृष्टम् अहिंसा संयमः तपः देवाः अपि तं नमस्यन्ति यस्य धर्मे सदा मनः** । तत्र "धृञ् धारणे" इत्यस्य धातोर्मप्रत्ययान्तस्येदं रूपं धर्म इति । मङ्गलरूपं पूर्ववत् । तथा "कृष् विलेखने" इत्यस्य धातोरुत्पूर्वस्य निष्ठान्तस्येदं रूपमुत्कृष्टमिति । तथा "तृहि हिंसि हिंसायाम्" इत्यस्य "इदितो नुम् धातो." (पा० ७-१-५८) इति नुमि कृते स्त्र्यधिकारे टाबन्तस्य नञ्पूर्वस्येदं रूपं यदुताहिंसेति । तथा "यमु उपरमे" इत्यस्य धातोः संपूर्वस्याप्प्रत्ययान्तस्य संयम इति रूपं भवति । तथा "तप सन्तापे" इत्यस्य धातोरसुन्प्रत्ययान्तस्य तप इति । तथा "दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिस्वप्नकान्तिगतिषु" इत्यस्य धातोरच्प्रत्य-यान्तस्य जसि देवा इति भवति । अपिशब्दो निपातः । तदित्येतस्य सर्वनाम्नः पुंस्त्वविवक्षायां द्वितीयैकवचनं तमिति भवति । तथा नमसित्यस्य प्रातिपदिकस्य "नमोवरिवश्चित्रङः क्यच्" (पा० ३-१-१९) इति क्यजन्तस्य लट् क्रियान्तादेशस्ततश्च नमस्यन्तीति भवति । तथा यदितिसर्वनाम्नः षष्ठयन्तस्य यस्येति भवति । धर्मः पूर्ववत् । सदेति सर्वस्मिन् काले "सर्वैकान्यकिंयत्तदः काले दा" (पा० ५-३-१५) इति दाप्रत्ययः "सर्वस्य सोऽन्यतरस्यां दि" (पा० ५-३-१६) इति स आदेशः सदा । तथा "मन ज्ञाने"इत्यस्य धातोरसुत्प्रत्ययान्तस्य मन इति भवति । इति पदानि । साम्प्रतं पदार्थ उच्यते-तत्र दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तथा चोक्तम् -

"दुर्गति प्रसृतान् जीवान्, यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने, तस्माद् धर्म इति स्मृतः ।।१।।"

मङ्ग्यते हितमनेनेति **मङ्गलमि**त्यादि पूर्ववत्, **उत्कृष्टं** प्रधानम्, न हिंसा **अहिंसा** प्राणातिपातविरतिरित्यर्थः, **संयमः** आश्रवद्वारोपरमः, तापयत्यनेकभवोपात्तमष्टप्रकारं कर्मेति **तपः**- अनशनादि, दीव्यन्तीति देवाः क्रीडन्तीत्यादि भावार्थः अपिः सम्भावने **देवा अपि** मनुष्यास्तु सुतरां, **त** मित्येवंविशिष्टं जीवं, **नमस्यन्ती**ति प्रकटार्थम्, **यस्य** जीवस्य किम् ?-**धर्मे** प्रागभिहितस्वरूपे **सदा** सर्वकालं **मन** इत्यन्तःकरणम् । अयं पदार्थ इति । पदविग्रहस्तु परस्परापेक्षसमासभाक्पदपूर्वकत्वेनेह निबन्धनाभावान्न प्रदर्शित इति ।।

**20 स्थानाङ्ग सू. ६७३-१ [चतु० गा० ४८ वृ०]**

एगमेगे णं महानिधी णं णव णव जोयणाइं विक्खंभेणं पण्णत्ते एगमेगस्स णं रन्नो चाउरंतचक्कवट्टिस्स नव महानिहओ पं० तं० -

**"णेसप्पे १ पंडुयए २ पिंगलते ३ सव्वरयण ४ महापउमे ५ ।**
**काले य ६ महाकाले ७ माणवग ८ महानिही संखे ९ ।।१।।**
**णेसप्पंमि निवेसा गामागरनगरपट्टणाणं च ।**
**दोणमुहमडंबाणं खंधाराणं गिहाणं च ।।२।।**
**गणियस्स य बीयाणं माणुम्माणस्स जं पमाणं च ।**
**धन्नस्स य बीयाणं उप्पत्ती पंडुते भणिया ।।३।।**
**सव्वा आभरणविही पुरिसाणं जा य होइ महिलाणं ।**
**आसाण य हत्थीण य पिंगलगनिहिंमि सा भणिया ।।४।।**
**रयणाइं सव्वरयणे चोद्दस पवराइं चक्कवट्टिस्स ।**
**उप्पज्जंति एगिंदियाइं पंचिंदियाइं च ।।५।।**
**वत्थाण य उप्पत्ती निप्पत्ती चेव सव्वभत्तीणं ।**
**रंगाणं य धोयाण य सव्वा एसा महापउमे ।।६।।**
**काले कालण्णाणं भव्वपुराणं च तीसु वासेसु ।**
**सिप्पसतं कम्माणि य तिन्नि पयाए हियकराइं ।।७।।**
**लोहस्स य उप्पत्ती होइ महाकालि आगराणं च ।**
**रुप्पस्स सुवन्नस्स य मणिमोत्तिसिलप्पवालाणं ।।८।।**

जोधाण य उप्पत्ती आवरणाणं च पहरणाणं च ।
सव्वा य जुद्धनीती माणवते दंडनीती य ।।९।।
नट्टविही नाडगविही कव्वस्स चउव्विहस्स उप्पत्ती ।
संखे महानिहिम्मी तुडियंगाणं च सव्वेसिं ।।१०।।
चक्कट्ठपइट्ठाणा अट्ठुस्सेहा य नव य विक्खंभे ।
बारसदीहा मंजूससंठिया जह्नवीई मुहे ।।११।।
वेरुलियमणिकवाडा कणगमया विविधरयणपडिपुन्ना ।
ससिसूरचक्कलक्खणअणुसमजुगंबाहुवतणा त ।।१२।।
पलिओवमट्ठितीया णिहिसरिणामा य तेसु खलु देवा ।
जेसिं ते आवासा अक्किज्जा आहिवञ्चा वा ।।१३।।
एए ते नवनिहओ पभूतधण-रयणसंचयसमिद्धा ।
जे वसमुवगच्छंती सव्वेसिं चक्कवट्टीणं ।।१४।। (सू० ६७३)

"एगमेगे' इत्यादि सुगमं, नवरं

**"नेसप्पे १ पंडुयए २ पिंगले ३ सव्वरयण ४ महापउमे ५ ।**
**काले अ ६ महाकाले ७ माणवगमहानिही ८ संखे ९" ।।१।।**
**(नैसर्पः पाण्डुकः पिंगलः सर्वरत्नः महापद्मः**
**कालश्च महाकालः माणवकः शङ्ख इति नव महा निधयः ।।१।।)**

"**नेसप्पंमि**'गाहा, इह निधानतन्नायकदेवयोरभेदविवक्षया **नैसप्पो** देवस्तस्मिन् सति तत इत्यर्थः, **निवेशाः**-स्थापनानि अभिनवग्रामादीनामिति, अथवा चक्रवर्त्तिराज्योपयोगीनि द्रव्याणि सर्वाण्यपि नवसु निधिष्ववतरन्ति, नव निधानतया व्यवह्रियन्त इत्यर्थः, तत्र ग्रामादीनामभिनवानां पुरातनानां च ये सन्निवेशा-निवेशनानि ते नैसर्प्पनिधौ वर्त्तन्ते, नैसर्प्पनिधितया व्यवह्रियन्त इति भावः, तत्र **ग्रामो**-जनपदप्रायलोकाधिष्ठितः, **आकरो** यत्र सन्निवेशे लवणाद्युत्पद्यते, न करो यत्रास्ति तन्न**करं पत्तनं**-देशीस्थानं **द्रोणमुखं**-जलपथ-स्थलपथयुक्तम् **मडंबं**-अविद्यमानप्रत्यासन्नवसिमं **स्कन्धावारः**-कटकनिवेशो **गृहं**-भवनमिति ।।१।।
'**गणित**'गाहा, **गणितस्य**-दीनारादिपूगफलादिलक्षणस्य, चकारस्य व्यवहितः

सम्बन्धः स च दर्शयिष्यते, तथा **बीजानां**-तन्निबन्धनभूतानां तथा **मानं** सेतिकादितद्विषयं यत्तदपि मानमेव धान्यादि मेयमिति भावः, तथो**न्मानं**-तुलाकर्षादि तद्विषयं यत्तदप्युन्मानं खण्डगुडादि धरिममित्यर्थः, ततो द्वन्द्वसमाहारः कार्यस्ततस्तस्य च, किमित्याह-**यत्प्रमाणम्,** चकारो व्यवहितसम्बन्ध एव, तथैव दर्शयिष्यते, तत्पाण्डुके भणितमिति लिङ्गपरिणामेन सम्बन्धः, तथा **धान्यस्य**-व्रीह्यादे**र्बीजानां** च-तद्विशेषाणा**मुत्पत्तिश्च** या सा **पाण्डुके**-पाण्डुकनिधिविषया, तद्‌व्यापारोऽयमिति भावो, **भणिता**-उक्ता जिनादिभिरिति २ । **'सव्वा'** गाहा कण्ठ्या ३। **'रयण'**गाहा, अक्षरघटनैवं-रत्ना**न्येकेन्द्रियाणि** चक्रादीनि सप्त **पञ्चेन्द्रियाणि** सेनापत्यादीनि सप्त **उत्पद्यन्ते**-भवन्ति यानि **चक्रवर्त्तिन**स्तानि सर्वाणि 'सर्वरत्ने' सर्व्वरत्ननामनि निधौ द्रष्टव्यानीति ४ । **'वत्थाणं'**गाहा, **वस्त्राणां** वाससां **योत्पत्तिः** सामान्यतो या च विशेषतो **निष्पत्तिः** सिद्धिः **सर्वभक्तीनां**-सर्ववस्त्रप्रकाराणां सर्वा वा भक्तयः- प्रकारा येषां तानि तथा तेषाम्, किंभूतानां वस्त्राणामित्याह-**रङ्गाणां**-रङ्गवतां रक्तानामित्यर्थः, **धौतानां**-शुद्धस्वरूपाणां, **सर्वैषा महापद्मे**-महापद्मनिधिविषया ५ । **काले**गाहा, **काले** कालनामनि निधौ **कालज्ञानं** कालस्य शुभाशुभरूपस्य ज्ञानं वर्त्तते, ततो ज्ञायत इत्यर्थः, किम्भूतमित्याह-भाविवस्तुविषयं **भव्यं** पुरातनवस्तुविषयं **पुराणं,** चशब्दाद् वर्त्तमान-वस्तुविषयं वर्त्तमानं, **'तीसु वासेसु'**त्ति अनागतवर्षत्रयविषयमतीतवर्षत्रयविषयं चेति, तथा **शिल्पशतं** कालनिधौ वर्त्तते, शिल्पशतं च घट १ लोह २ चित्र ३ वस्त्रं ४ नापित ५ शिल्पानां प्रत्येकं विंशतिभेदत्वादिति, तथा **कर्माणि** च कृषिवाणिज्यादीनि कालनिधाविति प्रक्रमः, एतानि च **त्रीणि** कालज्ञानशिल्पकर्माणि **प्रजायाः**-लोकस्य **हितकराणि** निर्वाहाभ्युदयहेतुत्वेनेति ६ । **'लोह'**गाहा, **लोहस्य चोत्पत्तिर्महाकाले** निधौ **भवति**-वर्त्तते, तथा **आकराणां** च लोहादिसत्कानामुत्पत्तिराकरीकरणलक्षणा, एवं **रूप्यादी**ना-मुत्पत्तिः सम्बन्धनीया केवलं **मणयः**-चन्द्रकान्तादयः मुक्तामुक्ताफलानि **शिलाः**-स्फटिकादिकाः **प्रवालानि**-विद्रुमाणीति ७ । **'जो'**गाहा **योधानां**-शूरपुरुषाणां **योत्पत्तिरावरणानां**-सन्नाहानां **प्रहरणानां**-खड्‌गादीनां सा **युद्धनीतिश्च**-व्यूहरचनादिलक्षणा **माणवके** निधौ निधिनायके वा भवति, ततः प्रवर्त्तत इति भावः, दण्डेनोपलक्षिता नीति**र्दण्डनीतिश्च**-सामादिश्चतुर्विधा, अत एवोक्तमावश्यके-'सेसा उ दंडनीई माणवगनिहीउ होइ भरहस्स'त्ति ८ । **'नट्ट'**

